1306*	—	—	37^{cd}	—
2	2	2	38	33
1307*	—	—	39–40	—
3-4	3-4	3-4	41–42	34–35
1309*	—	—	43^{ab}	36^{ab}
5-8	5-8	5-8	43^{c}–47^{b}	36^{c}–39
9–14^{b}	9–14^{b}	9–13^{f}	47^{c}–52	40–43, 45^{c}–49^{b}
1313*	—	—	—	44–45^{b}
1314* l 4	—	—	56^{cd}	—
{ 1315* l 3-4	—	—	—	—
,, ,, l 7-8	—	—	—	—
,, ,, l 11	—	—	—	50^{ab}
1316* l 1	—	—	53^{cd}	50^{cd}
,, l 2-4	—	—	—	51–52^{b}
14^{c}–15	14^{c}–15	14–15^{b}	53^{ab}, 54	49^{cd}, 52^{c}–53^{b}
{ 1317* l 2	—	—	—	—
1318* l 1-2	—	—	—	53^{c}–54^{b}
,, l 3	—	—	—	54^{cd}
1319*	—	—	—	—
1320*	—	—	—	54^{ab} fn
16^{ab}	16^{ab}	15^{cd}	55^{cd}	58^{ab}
16^{cd}	16^{cd}	16^{ab}	55^{ab}	55^{ab}
1321*	—	—	—	55^{c}–57
17^{ab}	17^{ab}	16^{cd}	56^{ab}	58^{cd}
17^{cd}	17^{cd}	17^{ab}	57^{ab}	59^{ab}
1325* l 1	—	—	57^{cd}	—

Crit Ed	Bom Ed	Kumbh Ed	Gorresio Ed	Lahore Ed
1325* l 2-3	—	—	58	63
1326*	—	—	—	59^{c}–62
18–19	18–19	17^{c}–19^{b}	59–61	64–65
1327* l 2-3	—	—	—	66
20^{ab}	20^{ab}	19^{cd}	62^{ab}	67^{ab}
1328*	—	—	62^{cd}	—
20^{c}–21^{b}	20^{c}–21	19^{e}–20	63, 64^{cd}	67^{c}–68
1330* l 1	—	—	64^{ab}	69^{ab}
,, l 2	—	—	—	69^{cd}
,, l 3-6	—	—	65–66	70–71^{b}
1330 (A)*	—	—	—	71^{cd}
1330* l 7-8	—	—	67	72
22–23	22–23	21–22^{d}	68–69	73–74
24^{ab}	24^{cd}	22^{ef}	70^{cd}	75^{cd}
24^{cd}	24^{ab}	23^{ab}	70^{ab}	75^{ab}
25–26	25–26	23^{c}–25^{b}	71–72	76–77
{ 1333*	—	—	—	78
27	27	25^{c}–26^{b}	73	79
1334*	—	—	74	—
28	28	26^{c}–27^{b}	75	80
29^{ab}	29^{ab}	27^{cd}	76^{ab}	—
1335*	—	—	76^{cd}	—
29^{c}–30	29^{c}–30	28–29^{b}	77–78^{b}	81–82^{b}
1336*	—	—	78^{c}–82^{b}	—
31	31	29^{c}–30^{b}	82^{c}–83^{b}	82^{c}–83^{b}
1338*	—	—	83^{c}–85^{b}	—
32^{ab}	32^{ab}	30^{cd}	85^{cd}	83^{cd}
1339*	—	—	—	—
32^{cd}	32^{cd}	31^{ab}	86^{ab}	84^{ab}
1340*	—	—	86^{c}–89^{b}	—
1341*	—	—	—	—
33^{ab}	33^{ab}	31^{cd}	89^{cd}	84^{cd}
1342*	—	—	90	—
33^{c}–34	33^{c}–34	32^{a-f}	91–92^{ab}	85–86
1343*	—	—	92^{c}–96	—
1344*	—	—	—	—
35	35	33	97	87
65 1	66 1	66 1	2 1	57 1
1345*	—	—	—	—
2	2	2	2	2
1346*	—	—	3–9^{b}	—
3–4^{b}	3–4^{b}	3–4^{b}	9^{c}–10	3–4^{b}
4^{c}–5	4^{c}–5	4^{c}–5	—	4^{ab} fn
6^{ab}	6^{ab}	6^{ab}	—	4^{cd}
6^{c}	6^{c}	6^{c}	11^{a}	5^{a}
6^{d}–7^{a}	6^{d}–7^{a}	6^{d}–7^{a}	11^{bc}	5^{b} fn
7^{b}	7^{b}	7^{b}	11^{d}	5^{b}
7^{cd}	7^{cd}	7^{cd}	12^{ab}	5^{cd}
1347*	—	—	—	6
8^{ab}	8^{ab}	8^{ab}	12^{cd}	7^{ab}
8^{cd}	8^{cd}	8^{cd}	14^{ab}	8^{ab}
1348*	9^{ab}	9^{ab}	—	—
1349*	—	—	14^{cd}	8^{cd}
9	9^{c}–10^{b}	9^{c}–10^{b}	13	7^{c}–8^{b}
10^{ab}	[10^{cd}]	10^{cd}	15^{ab}	9^{ab}
10^{cd}	10^{ef}	11^{ab}	15^{cd}	9^{cd}
11^{ab}	11^{cd}	11^{ef}	16^{ab}	10^{ab}
11^{cd}	11^{ab}	11^{cd}	16^{cd}	10^{cd}
12–13	12–13	12–13	17–18	11–12

Crit Ed	Bom Ed	Kumbh Ed	Gorresio Ed	Lahore Ed
1350*	—	—	—	—
14–16^{a}	14–16^{a}	14–16^{a}	19–21^{a}	13–15^{a}
1351*	—	—	—	—
16^{b}–18	16^{b}–18	16^{b}–18^{b}	21^{b}–23	15^{b}–17
1352*	—	—	—	—
1353*	19	18^{c-f}	—	—
1354*	—	—	—	—
1355*	—	—	—	—
1356* l 1–2	—	—	—	—
,, l 3	20^{ab}	19^{ab}	—	—
,, l 4–7	—	—	—	—
,, l 8	20^{cd}	19^{cd}	—	—
19	21	20	25	19
1358*	—	—	—	21–23
20	22	21	26	20
—	—	—	—	24–25^{b} (r.)
1359*	—	—	—	25^{cd}
21^{ab}	23^{ab}	22^{ab}	27^{ab}	26^{ab}
1360*	—	—	28^{ab}	—
1361*	—	—	—	—
21^{cd}	23^{cd}	22^{cd}	27^{cd}	—
22	24	23	28^{c}–29^{b}	26^{c-f}
23–25	25–27	24–26	—	27–29
1365*	—	—	—	—
26–27^{b}	28–29^{b}	27–28^{b}	—	30–32
27^{c}–28^{b}	29^{c}–30^{b}	28^{cd}, 30^{ab}	24	18
1367*	—	[29^{a-f}]	—	—
1368*	—	—	—	—
28^{cd}	30^{cd}	30^{cd}	29^{cd}	33^{ab}
1369*	—	—	—	—
29	31	31	30	33^{c-f}
30–31	32–33	32–33	31–32	—
32–33^{b}	34–35^{b}	34–35^{b}	33–34^{b}	34–35
1372* l 1–3	—	—	34^{c}–35	36–37^{b}
,, ,, l 4	—	—	36^{ab}	38
,, ,, l 5	—	—	36^{cd}	—
,, ,, l 6–7	—	—	37	37^{c-f}
,, ,, l 8–17	—	—	38–42	38–43
33^{cd}	35^{cd}	35^{cd}	43^{ab}	45^{cd}
34	36	36	43^{c}–44^{b}	46
35	37	37	44^{c}–45^{b}	44
1373*	—	—	45^{cd}	45^{ab}
36	38	38	46	47
66 1374*	67 1–3	67 1–3	3 —	58 —
1–2	4–5	4–5	1–2	1–2
1375* l 1–4	—	—	—	3–4
,, l 5–6	—	—	3	5
3	6	6	4	6
1376*	—	—	—	—
4	7	7	5	7
1377*	—	—	—	—
1378*	—	—	—	—
5	8	8	6	8
App (No 25) l 1–2	—	—	7	10
,, ,, l, 3–4	—	—	8	9
App (No 25) l 5–11	—	—	9–12^{b}	11–14^{b}
,, ,, l 12–32	—	—	12^{c}–22	14^{c}–24
,, ,, l 32 fn	—	—	—	25
,, ,, l 33–36	—	—	23–24	26–27

Crit Ed	Bom Ed	Kumbh Ed	Gorresio Ed	Lahore Ed
App (No 25) l 36 fn	—	—	25-26	—
,, ,, l 37-42	—	—	27-29	28-30
,, ,, l 43-44	—	—	—	31
,, ,, l 45-52	—	—	30-33	$32-36^{b}$
,, ,, l 52 fn	—	—	—	—
,, ,, l 53	—	—	34^{ab}	36^{cd}
6-7	9-10	9-10	$34^{c}-36^{b}$	37-38
1379*	—	—	—	—
8	11	11	$36^{c}-37^{b}$	39
9^{ab}	12^{ab}	12^{ab}	38^{cd}	45^{ab}
9^{cd}	12^{cd}	12^{cd}	39^{ab}	45^{cd}
10	13	13	$37^{c}-38^{b}$	44
11	14	14	$39^{c}-40^{b}$	42
1382*	—	—	—	—
1383*	—	—	—	—
12	15	15	41	40
1384*	—	—	—	41^{ab}
13^{ab}	16^{ab}	16^{ab}	40^{cd}	41^{cd}
1385*	—	—	—	—
$13^{c}-14^{b}$	$16^{c}-17^{b}$	$16^{c}-17^{b}$	42	43
$14^{c}-15^{b}$	$17^{c}-18^{b}$	$17^{c}-18^{b}$	—	46
$15^{c}-16$	$18^{c}-20^{b}$	$18^{c}-20^{b}$	43-44	47-48
1387* l 1-3	—	—	$45-46^{b}$	—
1387*(A)	—	—	—	—
,, l 4-20	—	—	$46^{c}-54$	—
17-19	$20^{c}-22$	$20^{c}-23^{b}$	55-57	49-51
1388* l 1-2	—	[24^{a-d}]	—	52^{a-d}
,, l 3	—	—	—	52^{ef}
1389* l 1-3	—	—	$58-59^{b}$	—
,, l 4	—	[24^{ef}]	59^{cd}	53^{ab}
,, l 5	—	—	—	53^{cd}
,, l 6	—	—	60^{cd}	54^{ab}
,, l 7	—	—	60^{ab}	54^{cd}
,, l 8	—	—	61^{ab}	55^{ab}
1389 (A)*	—	—	—	—
1389* l 9-10	—	—	$61^{c}-62^{b}$	$55^{c}-56^{b}$
20^{ab}	23^{ab}	23^{cd}	62^{cd}	56^{cd}
20^{c-f}	23^{c-f}	25	63	57
1390*	—	—	—	—
1391*	—	—	—	—
$21-23^{b}$	$24-26^{b}$	$26-28^{b}$	$64-66^{b}$	$58-60^{b}$
1392*	—	—	—	—
23^{cd}	26^{cd}	28^{cd}	66^{cd}	60^{cd}
$24-25^{d}$	27-28	29-30	67-68	61-62
1394*	—	—	69^{ab}	—
1395*	—	—	—	63^{ab}
25^{ef}	29^{ab}	31^{ab}	69^{cd}	63^{cd}
1397*	—	—	—	—
26^{ab}	29^{cd}	31^{cd}	70^{ab}	64^{ab}
1398*	30	32	—	—
$26^{c}-30$	$31-35^{b}$	$33-36^{d}$	$70^{c}-74$	$64^{c}-68$
1401* l 1-4	—	—	75-76	69-70
,, l 5-10	—	—	—	71-72
31-33	$35^{c}-37^{b}$, $38^{c}-39^{b}$	$36^{e}-37$, 39	77-79	60 1-3
1402*	$37^{c}-38^{b}$	38	—	—
1404*	—	—	4 1-2	4-5
34-35	$39^{c}-40$	40-41	3-4	6-7
36^{ab}	41^{ab}	42^{ab}	5^{cd}	8^{cd}
36^{cd}	41^{cd}	42^{cd}	5^{ab}	8^{ab}

Crit. Ed.	Bom. Ed.	Kumbh. Ed.	Gorresio Ed.	Lahore Ed.
37^{ab}	42^{ab}	43^{ab}	6^{ab}	9^{ab}
1406*	—	—	6^{cd}	9^{cd}
37^{c}–39	42^{c}–44	43^{c}–45^{b}	7-9	—
1409* l. 1–4	—	—	—	—
„ l. 5-6	—	—	10	—
40–41	45–46	45^{c}–47^{b}	11–12	—
42	47	47^{c-f}	—	—
43	48	48	13	—
44	49	49	—	58 73
App. I (No. 26) l. 1-17	—	—	—	59 1-9^{b}
„ „ l. 17 fn.	—	—	—	—
„ „ l. 18-26	—	—	—	9^{c}–13

CONTENTS OF THE KISKINDHĀKĀNDA

(N B The figures within brackets show the number of stanzas)

SARGA		PAGE
1	Description of Pampā and Rāma's melancholy joy at its sight (49)	3
2	Hanumat, commanded by Sugrīva, goes to interview Rāma (28)	17
3	Courteously greeting Rāma, Hanumat informs him of Sugrīva's desire for his friendship (25)	22
4	Hanumat takes Rāma and Laksmana to Sugrīva (26)	26
5	Sugrīva and Rāma pledge their alliance in the presence of Agni (18)	32
6	Sugrīva shows Rāma the cloak and ornaments dropped by Sītā. (23)	35
7	Sugrīva consoles Rāma who offers to succor him (23)	39
8	Sugrīva beseeches Rāma's assistance against Vālin (45)	42
9	Sugrīva narrates to Rāma the real cause of his enmity with Vālin. (24)	48
10	Sugrīva further narrates his humiliation at the hands of Vālin (29)	52
11	Sugrīva's narration of the Vāli-Dundubhi episode (52)	57
12	Description of the first combat between Sugrīva and Vālin (38)	70
13	Description of the hermitage of the Saptajanas (27)	78
14	Sugrīva challanges Vālin to fight again (21)	82
15	Tārā advises Vālin to reconcile himself with Sugrīva (23)	87
16	Second combat between Sugrīva and Vālin. (27)	91
17	Vālin reproaches Rāma who struck at him unawares (45)	98
18	Rāma's justification of his own action (57)	107
19	At the sad news of Vālin's demise, Tārā rushes to see him (28)	117
20	Tārā laments the death of her husband (25)	122
21	Hanumat consoles Tārā whose reply bespeaks her devotion and wisdom (16)	128
22	Vālin's last advice to Sugrīva and Angada (26)	131
23	Tārā laments the death of Vālin (30)	136
24	The description of Vālin's funeral rites. (44)	141
25	Sugrīva is enthroned as King (38)	148
26	Rāma resides in a cavern of Prasravana during the rainy season (23)	153
27	Rāma's description of the rainy season (46)	157
28	Hanumat reminds Sugrīva of his promise to assist Rāma (32)	169
29	Rāma bids Laksmana to warn Sugrīva of the evil consequences of dishonouring his pledge (52)	175
30	Laksmana goes to Kiskindhā to convey Rāma's ultimatum to Sugrīva (43)	184
31	Hanumat reminds Sugrīva of his promise to Rāma (22)	193
32	Laksmana's entry into the palace of Sugrīva (27)	197
33	Laksmana bitterly reproaches Sugrīva (19)	202
34	Tārā pacifies Laksmana (23)	207
35	Laksmana is convinced of Sugrīva's sincerity (20)	212
36	Sugrīva issues orders to assemble all his Forces (37)	215
37	Sugrīva with Laksmana calls on Rāma (34)	221
38	Sugrīva's Generals arrive with their vast Armies (37)	226
39	Sugrīva dispatches Vinata and his party to search for Sītā in the East (63)	235
40	Angada and his party to search in the South (47)	246
41	Susena and his party to search in the West (52)	258
42	Śatabala and his party to search in the North (62)	271

SARGA		PAGE
43	Rāma hands over his signet ring to Hanumat (16)	285
44	The monkey-leaders declare their prowess (15)	289
45	Sugrīva describes his visit to all the parts of the world (17)	293
46	Three search-parties return in vain. (14)	297
47	The vain search in the Vindhyas (22)	301
48	Angada's party searches in the Southern region in vain (22)	305
49	The entry of the Vānaras into the Rksabila (32)	310
50	Svayamprabhā's description of the Kāncana forest (19)	317
51	Hanumat tells Svayamprabhā the mission of their arrival (19)	320
52	Unable to keep to schedule, Angada proposes fast unto death (33)	323
53	Hanumat dissuades Angada from *Prāyopaveśana* (21)	332
54	Angada and his party resolve to fast unto death (20)	336
55	Sampāti's surprise appearance before the monkeys (21)	339
56	Angada acquaints Sampāti with his party's mission (19)	345
57	Sampāti informs the monkeys of the whereabouts of Sītā. (34)	349
58	Sampāti encourages the monkeys to pursue their search (29)	355
59	The story of the sage Niśākara (21)	361
60	Sampāti acquaints Niśākara with his own life (16)	365
61	Niśākara's narration of what he foresaw (15)	369
62	Sampāti regains wings and vigour (15)	372
63	The sight of the ocean makes the monkeys despondent (23)	378
64	The monkey leaders estimate their strength severally (35)	384
65	Jāmbavat exhorts Hanumat to leap over the Ocean (36)	394
66	Hanumat, ready to leap to Lankā, ascends the mountain Mahendra (44)	402

॥ वाल्मीकिरामायणम् ॥

॥ किष्किन्धाकाण्डम् ॥

१

स तां पुष्करिणीं गत्वा पद्मोत्पलझषाकुलाम् ।
रामः सौमित्रिसहितो विललापाकुलेन्द्रियः ॥ १

तस्य दृष्ट्वैव तां हर्षादिन्द्रियाणि चकम्पिरे ।
स कामवशमापन्नः सौमित्रिमिदमब्रवीत् ॥ २

G 3 7
B. 4
L 3 8

1

☞ V4 illeg for the whole Kānda and so not included in the apparatus of this Kānda V1 2 B4 (available only for Kiṣkindhā) D1 4 11 do not contain the first Sarga These MSS begin this Kānda from Sarga 2 V1 variants for Sarga 1 are given from a different MS taken in the Crit App of Aranya as V1 which along with Ś1 Ñ2 V2 B1-3 D2 3 7 12 13 (D12 13 not taken up in the Crit. App of Araṇya) completes the Aranyakānda after 4 1 However the post-colophon entries after it are given at the end of Aranya under the symbols used for the above MSS in Aranya.

D5 begins with श्रीगणेशाय नम । श्रीराम जय ।, D6 begins with श्रीमते रामानुजाय नम and then ins (introductory st)

स जयति रघुवशतिलक कौसल्याहृदयनन्दनो राम ।
दशवदननिधनकारी दाशरथि पुण्डरीकाक्ष ।
कूजन्त राम रामेति मधुर मधुराक्षरम् ।
आरुह्य कविताशाखा वन्दे वाल्मीकिकोकिलम् ।
वाल्मीकेर्मुनिसिंहस्य कवितावनचारिण ।
शृण्वन्रामकथानाद को न याति परा गतिम् ।
वाल्मीकिगिरिसभूता रामसागरगामिनी ।
पुनाति भुवन पुण्या रामायणमहानदी ।
य कर्णाञ्जलिसपुटैरहरह सम्यक्पिबत्यादरा
वाल्मीकेर्वदनारविन्दगलित रामायणाख्य मधु ।
जन्मव्याधिजराविपत्तिमरणैरत्यन्तसोपद्रव
ससार स विहाय गच्छति पुमान्विष्णो पदं शाश्वतम् ।
चरित रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षर प्रोक्त महापातकनाशनम् ।
पठितसकलवेद शास्त्रपार गतो वा
यमनियमपरो वा धर्मशास्त्रार्थकृद्वा ।
अपि तु सकलतीर्थव्राजको वा हुताग्नि-
र्न हि हृदि यदि राम सर्वमेतद्वृथा स्यात् ।
रामेति वर्णद्वयमादरेण सदा स्मरन्मुक्तिमुपैति जन्तु ।
कलौ युगे कल्मषमानसानामन्यत्र धर्मे खलु नाधिकार ।
यत्र यत्र रघुनाथकीर्तन तत्र तत्र कृतमस्तकाञ्जलिम् ।
बाष्पवारिपरिपूर्णलोचन मारुति नमत राक्षसान्तकम् ।
जित भगवता तेन हरिणा लोककारिणा ।
अजेन विश्वरूपेण निर्गुणेन गुणात्मना ।
क्वाहं मन्दमतिर्गभीरमधुर(m also °हृदय) रामायणं तत्क च
व्याख्यानेऽस्य परिश्रमस्त्वहमहो हास्यास्पद धीमताम् ।
को भारोऽत्र मम स्वयं कुलगुरु कोदण्डपाणि कृपा-
कूपारो रचयत्यद सपदि मज्जिह्वाग्रसिंहासन· ।

D8 begins with श्रीजानकीवल्लभो विजयते and then ins अध्यात्मरामायणपारायणविधि

D9 begins with श्रीरामाय नम and then ins

सुग्रीवस्यावन तुर्ये इन्द्रसूनोश्च मर्दनम् ।
मारुतेर्मुद्रिकादान कृत येन स मे गुरु ।
श्रीमते रामानुजाय नम

D10 begins with ॐ नम रामाय, D12 ॐ, T3 श्रीरामाय नम , हरि ॐ, G1 (in marg) हरि ॐ शुभमस्तु, G3 ॐ (marg हरि ॐ शुभमस्तु । श्रीगुरुभ्यो नम)

1 Ñ1 illeg for 1–16^{ab} —^{ab}) Ś1 B1 D2 12 13 रम्याः D3 दृष्ट्वा (for गत्वा) Ś1 B1 D2 12 13 -समायुता, V1 3 B2 3 -समाकुला (for -झषाकुलाम्) G(ed) ता समतात्समालोक्य रम्या पुष्करिणीं शुभा —^{c}) Ñ2 V1 3 B2.3 D7 राम सौमित्रि-माभाष्य —For 1^{cd}, Ś1 B1 D2 3 12 13 subst

1* राम सौमित्रिणा सार्धं ददर्शोपससर्प च ।

[D13 [अ]पमसार (for [उ]पससर्प) Ś1 D12 पस्पर्श च ददर्श च (for the post half)]

2 Ñ1 illeg (cf v l 1) V1 D3 om 2 —^{a}) D6 8–10 तत्र, Cg k t as in text (for तस्य) G1 [ए]वं भ्रमतो, M3 दृष्टवतो (for दृष्ट्वैव ता) —For 2, Ś1 B1 D2 12 13 subst

2* ता समन्तात्समालोक्य विचित्रां सुमनोहराम् ।
सोन्मादो विश्रुत साश्रु सौमित्रिमिदमब्रवीत् ।

[(1 2) D2 13 विस्मित (for विश्रुत) Ś1 सास्र (for साश्रु) B1 राम' सौमित्रिमाभाष्य विललापाकुलेन्द्रिय],

whereas Ñ2 V3 B2 3 D7 subst

सौमित्रे पश्य पम्पायाः काननं शुभदर्शनम् ।
यत्र राजन्ति शैलाभा द्रुमाः सशिखरा इव ॥ ३
मां तु शोकाभिसंतप्तमाधयः पीडयन्ति वै ।
भरतस्य च दुःखेन वैदेह्या हरणेन च ॥ ४

अधिकं प्रविभात्येतन्नीलपीतं तु शाद्वलम् ।
द्रुमाणां विविधैः पुष्पैः परिस्तोमैरिवार्पितम् ॥ ५
सुखानिलोऽयं सौमित्रे कालः प्रचुरमन्मथः ।
गन्धवान्सुरभिर्मासो जातपुष्पफलद्रुमः ॥ ६

3* स तां दृष्ट्वा नदीं रम्यां नानाकुसुमभूषिताम् ।
उवाच लक्ष्मणं वीरः प्रियां सीतामनुस्मरन् ।

[(l 1) V3 illeg from नदीं upto भूषिता —V3 illeg for l 2 (except उवाच) —(l 2) D7 प्रिय- (for प्रियां)] —After 2, D5 6 8–10 T G1 2 M ins, G3 cont after the first occurrence of l 1 of App I (No 2)

4* सौमित्रे शोभते पम्पा वैदूर्यविमलोदका ।
फुल्लपद्मोत्पलवती शोभिता विविधैर्द्रुमैः ।

[(l 1) D5 6 8–10 G M वैड्ड(D6 °डु)र्य-]

—After 2, G3 reads l 6 of 63* and l 1 of App I (No 2) for the first time, repeating them in their proper place

3 Ñ1 illeg (cf v l 1) —^{a}) B1 D2 13 पपाया (for °या) —V3 illeg for ^{b} —^{c}) Ñ2 V1 3 B1–3 D7 भ्राजते यत्र (V1 तत्र, B2 यस्य), D3 6 M1 Ck*p* यत्र भ्राजन्ति (for यत्र राजन्ति) D8–10 Ck*p* t शैला वा, Cv*p* r*p* नीलाभा, Cv r m g as in text —After 3, Ś1 D2 12 13 read 5^{cd}, 5^{ab}, 4^{cd} and 4^{ab}

4 Ñ1 illeg (cf v l 1) For sequence in Ś1 D2 12 13, cf v l 3 Ñ2 V1 B2 3 D7 om 4 and 5 B1 om 4 V3 reads 4 and 5 (including 7*) after 8 —^{a}) Ś1 D2 3 12 13 हत (for मां तु) Ś1 D12 -[अ]भितप्त मां (for -[अ]भिसंतप्तम्) —^{b}) Ś1 D2 12 13 स(D2 13 मा)-दीपयति दु लितं, V3 पीडयत्यत्र लक्ष्मण, D3 सौमित्रे दीपयति मां, D6 G1 2 M3 Cr m*p* g माधव पीडयन्निव, Cv m k t as in text ❀ Cr माधव पीडयन्निव वर्तत इति शेष । इव शब्दो वाक्यालंकारे । आधय पीडयन्ति वै इति पाठे वक्ष्यमाण वसन्तवर्णनस्वारस्य नास्तीति केषाचित्पक्ष । राज्यभ्रंशबन्धुवियोगादिना पूर्वमेव शोकाभिसन्तप्त मां भरतस्य दु खेन वैदेह्या हरणेन च भूयोपि आधय पीडयन्ति वै पीडयन्ति खलु । एतदुक्तविवक्षया समर्थ्यते ❀ —^{c}) V3 illeg from च upto हरणे in ^{d} M1 शोकेन (for दु खेन) —After 4, D5 6 8–10 S ins

5* शोकार्तस्यापि मे पम्पा शोभते चित्रकानना ।
व्यवकीर्णा बहुविधैः पुष्पैः शीतोदका शिवा ।
नलिनैरपि संछन्ना ह्यत्यर्थं शुभदर्शना ।
सर्पव्यालानुचरिता मृगद्विजसमाकुला ।

[(l 2) G2 अवकीर्णा D6 M3 शीतजलाशया (M3 °ला शुभा) (for शीतोदका शिवा). —(l 3) T2 समिन्ना (for °छन्ना) D5 6 8 10 पद्मकै-, D9 रक्तक- G2 -दर्शन (for -दर्शना) —(l 4) l2 M2 -[अ]नुचरित (M2 °त) (for °ता) D6 marg, l2 M2 -समाकुल, M1 -समाकुला (for -समाकुला)]

5 Ñ1 illeg (cf v l 1). For sequence in Ś1 D2 12 13, cf v l 3 Ñ2 V1 B2 3 D7 om 5 (cf v l 4) V3 reads 4 and 5 (including 7*) after 8 B1 transp ^{ab} and ^{cd} —^{a}) Ś1 B1 D2 3 5, 6 12 M1 7 Cv r प्रतिभान्ति (for प्रवि°) D3 [ए]प, M3 [ए]पा (sic) (for [ए]तन्) V3 D13 अधिकं प्रतिभात्येते —^{b}) Ś1 V3 B1 D2 7 12 13 नीलपीतश्च शाद्वलं (V3 illeg for श्च शाद्वलं) —After 5^{ab}, G2 ins

6* लताभिः पुष्पिताग्राभिरवगूढ समन्ततः ।

—^{c}) Ct as in text, Ct*p* उच्छ्रितैः (for विविधैः) V3 illeg from पुष्पै up to ^{d} D3 नाम्र॰ (for पुष्पै) Ck उच्छ्रितैर-विकं पुष्पैः —^{d}) M1 परिस्तोमम् Ś1 D12 [उ]द्गतं, B1 D2 [उ]ज्झितं D7 [ऊ]जितं; D13 [उ]त्थितं, G2 [आ]-चितं, L (cd) [उ]द्यतं (for [अ]र्पितम्) T1 परिस्तोम इवार्पितं —After 5, V3 ins

7* शुशुभे शाद्वला भूमिः कीर्णा ...... इव । (illeg); whereas G2 ins, M1 cont after l 1 of 9*

8* नानाप्रत्यातकुसुमैश्छन्ना भूर्भाति लक्ष्मण ।

—G2 cont, while D5 6 8–10 T G1 3 M ins after 5

9* पुष्पभारसमृद्धानि शिखराणि समन्ततः ।
लताभिः पुष्पिताग्राभिरुपगूढानि सर्वतः ।

[M1 transp l 1 and l 2 —(l 1) G1 -राशि- (for -भार-) —After l 1, M1 cont 8* G1 om l 2 —(l 2) Cf 6* D5 M1 उपगूढा (M1 °ढ) हि (for °ढानि) T3 G2 3 सर्वशः ❀ Ck उपगूढ व्याप्त, Cv r अधिकं प्रतिभातीत्यादेरर्थान्तरं द्रुमाणां विविधैः पुष्पैः परिस्तोमैरिवार्पितं । पुष्पभारसमृद्धानि शिखराणि समन्ततः इति पाठः ❀]

6 Ñ1 illeg (cf v l 1) —^{a}) Ś1 D2 12 13 सुखानुलोमः (for °निलोऽयं) —V1 om (hapl) 6^{b}–7^{a} V3 illeg from 6^{c} upto पुष्पित (cf variant) in 6^{d} —^{c}) B1 D2 गन्धैश्च (for गन्धवान्) D13 सौरभिः Ñ2 B1 3 D7 वातो, B2 वासो (for मासो) —^{d}) Ś1 D2 3 12 13 नानापुष्पफलैः(D2 12 °ल)द्रुमैः, Ñ2 V3 B1–3 D7 नानापुष्पित(V3 illeg upto °त)कानन ❀ Ck उक्तार्थस्य विवरणं नानेत्यादि ❀

पश्य रूपाणि सौमित्रे वनानां पुष्पशालिनाम् ।
सृजतां पुष्पवर्षाणि वर्षं तोयमुचामिव ॥ ७
प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः ।
वायुवेगप्रचलिताः पुष्पैरवकिरन्ति गाम् ॥ ८
मारुतः सुखसंस्पर्शो वाति चन्दनशीतलः ।
षट्पदैरनुकूजद्भिर्वनेषु मधुगन्धिषु ॥ ९
गिरिप्रस्थेषु रम्येषु पुष्पवद्भिर्मनोरमैः ।
संसक्तशिखराः शैला विराजन्ति महाद्रुमैः ॥ १०
पुष्पिताग्रांश्च पश्येमान्कर्णिकारान्समन्ततः ।
हाटकप्रतिसंछन्नान्नरान्पीताम्बरानिव ॥ ११

G 3 79 8
B 4 1 21
L 3 82 11

7 Ñ1 illeg (cf v l 1) V1 om 7[a] (cf v l 6) —[a]) Ñ2 V3 B1–3 D7 पुष्पाणि (for रूपाणि) Ś1 D2 12 13 रम्याणि —[b]) Ś1 वनानि, B1 वन्याना (for वनाना) D3 पुण्यशालिना, D6 पुष्पपानिना —V3 illeg from वर्षाणि in [c] up to मु in [d] —[c]) Ś1 D2 3 12 13 सृजति (for सृजता). —[d]) D6 T1 3 G2 M3 Cg तोय (for वर्षं) T2 इह (for इव) Ś1 D2 3 12 13 तोयमुचो यथा

8 Ñ1 illeg (cf v l 1) —[a]) D3 प्रचुरेषु (for प्रस्तरेषु) V1 सुरम्येषु —[b]) Ś1 D2 12 कानने द्रुमा —[c]) D8 वात- (for वायु-) —[d]) Ś1 D3 5 9 12 13 इव, D2 एव (for अव-) Ś1 Ñ2 V1,3 B1–3 D2 3 7 12 13 मा, D9 ह (for गाम्) —After 8, V3 reads 4 and 5 (including 7*), while D5 6 8–10 S ins

10* पतितै पतमानैश्च पादपस्थैश्च मारुत ।
कुसुमै पश्य सौमित्रे क्रीडतीव समन्तत ।
विक्षिपन्विविधा शाखा नगाना कुसुमोत्कटा ।
मारुतश्चलितस्थानै षट्पदैरनुगीयते ।
मत्तकोकिलसनादैर्नर्तयन्निव पादपान् । [5]
शैलकन्दरनिष्क्रान्त प्रगीत इव चानिल ।
तेन विक्षिपतात्यर्थं पवनेन समन्तत ।
अमी ससक्तशाखाग्रा ग्रथिता इव पादपा ।

[(l 1) D9 पातमानैश् (for पत°) —(l 2) T1 3 G2 M1 3 क्रीडन्निव (for क्रीडतीव) —(l 3) G1 पुष्पिता (for विक्षिपन्) G3 द्रुमाणा (for नगाना) D5 6 T2 M3 कुसुमोत्करा, G1 2 M1 2 Cv r m g k tp कुसुमोच्चया (G1 °च्चया), Ct as above —(l 4) D5 श्चाविन, B(ed) चलित (for चलित-) ❀ Cr चलितस्थानै स्वस्थानकुसुमोच्चलिते गीयत इव पुष्परसोत्कण्ठया स्तूयत इव । अनुगीयत इति पाठे अनुसृत्य गीयत इत्यर्थ, Cm चलितस्थानै स्वस्थानकुसुमोच्चालिते षट्पदै मारुत गीयत इव ❀ —(l 6) D5 प्रणीत (for प्रगीत) Cv वानिल (for चानिल) —(l 8) G1 सरक्त (for ससक्त-) D5 ते नीता (for ग्रथिता)]

9 Ñ1 illeg (cf v l 1) —[a]) D5 6 9 G M Cr g स एष, D8 10 T स एव (for मारुत) —[b]) D9 om चदन —After 9[ab], D5 6 8–10 S ins

11* गन्धमभ्यवहन्पुण्य श्रमापनयनोऽनिल ।
अमी पवनविक्षिप्ता विनदन्तीव पादपा ।

[(l 1) K(ed) Ck अभ्यावहन् D9 गधमस्य महत्पुण्य (for the prior half) T2 द्रुम- (for श्रम-) —(l 2) D9 विनदति, G1 M2 विनर्दति (for विनदन्ति)]

—V3 illeg from प in [c] to वै in [d] —[c]) Ñ2 V1 B1–3 D2 3 7 12 13 उप(D12 अभि)कूजद्भिर्, D5 6 9 T2 G2 M3 (before corr as in M1) Cm अनुकूजतो, M1 °गीयतो (for अनुकूजद्भिर्) Ś1 षट्पदा अभिकूजति —[d]) Ñ2 V1 B1–3 D7 च सुगधिषु (V1 °भि), V3 च सुगधि, D3 12 मद° (for मधुगन्धिषु) —After 9, Ñ2 V3 B2 3 D7 ins

12* तया हीनस्य सौमित्रे बाधते मे दृढ मन ।

[V3 om (hapl) from the post half upto 10[a]]

—Ñ2 D7 cont

13* सीता परवश याता पुष्पमासे सुमध्यमा ।

10 Ñ1 illeg (cf v l 1) V3 om 10[a] (cf v l 12*) —[a]) B1 D3 गिरिप्रस्थे च (D3 तु), G2 हरिप्र°, M2 (after corr sec m as in text) गिरीन्द्र°, Cmp प्रस्तरेषु च (for गिरिप्रस्थेषु) Ś1 D2 12 13 चित्रेषु, Ñ2 V1 B1–3 D3 7 सौमित्रे —[b]) D3 पुण्यवद्भिर्, D9 पुष्पोत्कर- (for पुष्पवद्भिर्) V1 D2 13 T2 M3 मनोहरै —[c]) Ś1 D12 स(D12 स)रक्त-, D1 Ck ससिक्त, Cv r m g t as in text (for ससक्त-) T3 ससक्तशिखराकारा —[d]) Ś1 D2 12 13 भाति (D2 13 भक्ति) चित्रैर्, D3 पुष्पिताग्रैर्, D9 विचरति (sic), M3 Cr m विराजते, Cv as in text (for °जन्ति) Ś1 मनोरमै ❀ Ct ससक्तशिखरा सपन्नशेखरा इवेत्यर्थ इति कतक । गिरिप्रस्थेषु स्पृष्ट्वा द्रुमै सजाताग्रभागा इत्यर्थ इति तीर्थ ❀ —For 10[cd], Ñ2 V1 3 B1–3 D7 subst

14* ससक्तविटपस्कन्धैर्दुर्निरीक्ष्य नभस्तलम् ।

[V3 illeg, B1 निरीक्षस्व, B2 3 अनिरीक्ष्य (for दुर्निरीक्ष्य) Ñ2 नभस्तल]

—After 10, D5 6 8–10 S ins

15* पुष्पसछन्नशिखरा मारुतोत्क्षेपचञ्चला ।
अमी मधुकरोत्तमा प्रगीता इव पादपा ।

[(l 1) G3 -सच्छिन्न- (for -सछन्न-) D2 मारुतोत्कप D5 -सचला (for -चञ्चला) —(l 2) ❀ Cv r m मधुकरोत्कोशा इति च (r m वा) पाठ ❀]

11 Ñ1 illeg for 11 (cf v l 1) V3 illeg from मान in [a] upto st 49 (including colophon) —[a]) M1 3 तु (for च) D5 6 8–10 T G M2 सुपुष्पितास्तु (for पुष्पिताग्राश्च) B2 3 D5 7 8 10 T2 M1 पश्यैतान् —[b]) B1 3 च सर्वत (for समन्तत) —[c]) G1 M2 हाटकै (for हाटक-) V1 -प्रतिसपूर्णान्, D9 G(ed) -प्रतिमा(D9 °म)च्छन्नान्

9 22 12 अयं वसन्तः सौमित्रे नानाविहगनादितः ।
सीतया विप्रहीणस्य शोकसंदीपनो मम ॥ १२
मां हि शोकसमाक्रान्तं संतापयति मन्मथः ।
हृष्टः प्रवदमानश्च समाह्वयति कोकिलः ॥ १३

एष दात्यूहको हृष्टो रम्ये मां वननिर्झरे ।
प्रणदन्मन्मथाविष्टं शोचयिष्यति लक्ष्मण ॥ १४
विमिश्रा विहगाः पुंभिरात्मव्यूहाभिनन्दिताः ।
भृङ्गराजप्रमुदिताः सौमित्रे मधुरस्वराः ॥ १५

—M1 om 11^{d}–13^{a} —^{d}) B1 वरान् (for नरान्) Ś1 D12 स्वरान्पीततरानिव, Ñ2 B2 D6 13 M2 नरान् (B2 वाण, D12 वरान) पीनावराणि च (M2 [after corr sec m] °निव) (corrupt), I3 स्वरान्श्वेतावरानिव —For 11, D3 subst

16* पुष्पिताग्राश्च पश्येमे कर्णिकाराः समन्ततः ।
हाटकप्रतिसछन्ना नरा पीताम्बरा इव ।

and then cont

17* शनश्च मुच्यते पादान्बक परमधार्मिक ।
पश्य लक्ष्मण पम्पाया मत्स्यानामनुकम्पया ।

12 Ñ1 illeg for 12 (cf v l 1) V3 illeg, M1 om 12 (for both, cf v l 11) —^{a}) Ś1 Ñ2 V1 B1–3 D2 3 7 12 13 वसन्तमास (B2.3 °काल) सप्राप्तो (Ñ2 V1 B1 D7 प्राप्तोय) —^{b}) Ñ2 V1 B1 (m also) 2 3 D3 7 -कूजितः (for नादित) —^{c}) D4–6 11 T2.3 G1 M3 विप्रहीनस्य —For 12^{cd}, Ś1 Ñ2 V1 B1–3 D2 3 7 12 13 subst

18* विशालाक्ष्या विहीनस्य मम शोकविवर्धनः ।

[V1 B1 3 विशालाक्षी- D2 3 13 विमु (D13 °यु) क्तस्य (for विहीनस्य) Ś1 D2 3 12 13 शोक (D3 मोह) सदीपनो महान् (for the post half)]

—Thereafter Ñ2 B2 3 D7 cont

19* नानाप्रकारं कुसुमैश्छन्ना लक्ष्मण पादपाः ।
विचित्रवर्णा भान्त्येते कुथाभिरिव संवृताः ।

[(l 2) B2 विचित्रवतो (for °वर्णा)]

13 Ñ1 V3 illeg for 13 (cf v l 1 and 11 respy) M1 om 13^{a} (cf v l 11) —^{a}) Ś1 Ñ2 V1 B1–3 D2 3 7 12 13 सौमित्रे मा सुदु खार्त —^{b}) Ś1 D2 3 12 13 सदीपयति G3 मारुत (for मन्मथ) —D6 om 13^{c}–14 —^{c}) D8 10 G1 Ck t हृष्ट I1 G2 प्रयत (G2 °नद) मानश्च (for प्रवद°) ※ Cr हृष्ट प्रवदमानश्चेति सम्यक् ※ —^{d}) D5 G2 M1 3 Ck मामाह्वयति —For 13^{cd}, Ś1 Ñ2 V1 B1–3 D2 3 7 12 13 subst

20* हृष्ट पुष्ट प्रमुदित कोकिलो मामिवाह्वयेत् ।

[Ś1 D2 स्पष्ट, B° हृष्ट, D3 पुष्ट, D12 13 मृष्ट (for हृष्ट) V1 पुष्प, B3 -पुष्ट- (for पुष्ट) Ś1 B1 D2 12 13 विन (B1 D2 13 °व) दमानश्च, D3 प्रवदमानश्च (for पुष्ट प्रमुदित) Ś1 V1 B1 D2 3 12 13 इवाह्वयत् (Ś1 D12 13 °यन्), B2 3 समाह्वयेत्]

—Ñ2 B1–3 D7 cont

21* प्रियासहायो मुदितो वसन्ते कामदीपिते ।

[D7 प्रमुदितो (hypm) (for मुदितो). Ñ2 D7 वासते कामदीपन, B1 वसत कामदीपित (for the post half)]

14 Ñ1 V3 illeg for 14 (cf v l 1 and 11 respy) D6 om 14 (cf v l 13) —^{a}) D6 T2 G M1.2 Cv r m.g k नत्यूहको, M3 नल्क्यूहको, Ct as in text Ś1 राम, D2 3 13 नित्य, D12 नाम (for हृष्टो) —^{b}) B2 3 वने, M1 रम्यो Ś1 Ñ2 V1 B1–3 D2 3 7 12 13 कानन-, D5 Ck मा वन- (for मा वन-) —^{c}) Ñ2 B2 D7 प्रस्वन्, B1 3 D2 3 प्रवदन्, D13 प्रमदन् (for प्रणदन्) B1 -[आ]विष्टो —^{d}) Ś1 D2 3 12 13 शोषयिष्यति (for शोच°) Ñ2 V1 B2 3 D7 इह मा शोषयिष्यति, B1 स्वक्रातामनुतिष्ठति —After 14, Ś1 D2 3 12 13 ins

22* मा दृष्ट्वैव मृगी याति ता मृगोऽप्यनुधावति ।
वक्ष्यताव न भी कार्या हेमैरथी मृगैरयम् ।
वारणोऽय स्वका भार्या स्वनुरक्तानुयायिनीम् ।
मत्प्रसादमिवाशङ्क करेण परिमार्जति ।

[(l 1) D2 13 मृगो (for मृगी) L (ed) नोपधावति D2 13 त मृगी प्रतिधावति (for the post half) —Ś1 om l 2–3 —(l 2) D3 हेमैरथ मृगैरिव, D12 कामरूपी मृगीरय (sic) (for the post half) —(l 3) D2 12 स्वनुरक्तो- नुयायिनी, D3 अनुरक्ता रनार्थिनीं (for the post half) —(l 4) D3 13 [आ]शङ्कन् (for [आ]शङ्क) D2 3 प्रति (D3 °वि) माजनि],

while D5 6 8–10 S ins

23* श्रुत्वैतस्य पुरा शब्दमाश्रमस्था मम प्रिया ।
मामाहूय प्रमुदिता परम प्रत्यनन्दत ।
एव विचित्रा पतगा नानारावविराविण ।
वृक्षगुल्मलता पश्य सपतन्ति समन्ततः ।

[(l 3) G1 M2 एते (for एव) D9 विचित्र D6 विहगा (for पतगा) D9 T2 रव- (for -राव-) —(l 4) M3 ततस्तत (for समन्तत)]

15 Ñ1 V3 illeg for 15 (cf v l 1 and 11 respy) D6 reads 15^{ab} in marg —^{a}) D2 विमिश्र-, D3 विचित्र-, D6 मिश्रिता (for विमिश्रा) Ś1 D2 12 13 I1 G2 विहगै, Cm विहगा —^{b}) After °व्यूहा, D6 wrongly ins पादपाश्चेमे ममा Ś1 D2 12 13 अन्यपुष्टैर्विनादिता, D3 आत्मपूगाभिनादिता, G3 आत्मवद्भिर्मनोरमैः. ※ Cv r विचित्रा विहगा मत्ता प्रवदन्ति मन सुखमिति च पाठ. ※ —For 15^{ab}, Ñ2 V1 B1–3 D7 subst

24* विचित्रमिह गायन्ति पिका पुष्पाभिनन्दिनः ।

मां हि सा मृगशावाक्षी चिन्ताशोकबलात्कृतम् ।
संतापयति सौमित्रे क्रूरश्चैत्रवनानिलः ॥ १६
शिखिनीभिः परिवृता मयूरा गिरिसानुषु ।
मन्मथाभिपरीतस्य मम मन्मथवर्धनाः ॥ १७
पश्य लक्ष्मण नृत्यन्तं मयूरमुपनृत्यति ।
शिखिनी मन्मथार्तैषा भर्तारं गिरिसानुषु ॥ १८
मयूरस्य वने नूनं रक्षसा न हृता प्रिया ।
मम त्वियं विना वासः पुष्पमासे सुदुःसहः ॥ १९

G 3. 79. 16
B. 1 1 41
L 3 82 21

[V1 गायत (sic), B2 3 गायद्भिः (for गायन्ति) V1 रामायूथ, B1 वायुभोग, B2 रणे पुष्ट- (sic) (for पिका पुष्प-) B3 स्वयूथैरभिनदिता (for the post half)]

—After 15^{ab}, G3 ins l 1 of a passage relegated to App I (No 1) —^{c}) Ś1 B1 D2 13 -[अ]भिरुदिता, V1 -[अ]भिविरुता, D3 12 -[अ]भिनदिता (for -प्रमुदिता) Ñ2 D7 भृगराजोप्यभिरुत, B2 भृगराजोभिरुदित, B3 भृगो रामाभिरभित —^{d}) Ś1 D2 12 13 तरवो (for सौमित्रे) Ś1 D12 T G2 Cr -स्वना, Ñ2 B2 D7 -स्वन, B3 स्वर, Cg k t as in text (for -स्वरा) ❀ Ck भृगराजप्रमुदिता कर्मधारयोय । प्रमुदितभृगराजा इत्यर्थ वाहिताग्न्यादि ❀ —After 15, D5 6 8–10 T G1 2 M ins a passage relegated to App I (No 1), while G3 ins (l 1 of the same passage after 15^{ab}) l 2–15 after 15

16 Ñ1 illeg for 16^{ab}, V3 illeg for 16 (cf v l 1 and 11 respy) —^{a}) D2 वा (for सा) D13 मा सा हि (by transp), G2 मामसौ, M3 मा ह्यद्य, Cv as in text (for मा हि सा) —^{b}) D5 -परायणा, G1 M1 -बलात्कृता (for -बलात्कृतम्) Ś1 D12 चिताबाष्पाकुलीकृता, D2 3 13 चिंताबाष्पजडीकृत (D3 °ता) —For 16^{ab}, Ñ2 V1 B1–3 D7 subst

25* मया विना विशालाक्षी सीता बाष्पजडीकृताम् ।

[(B1 मा विना मृगशावाक्षीं (for the prior half) B2 (*inf lin* also) बाष्पजगीकृता]

—^{d}) D5 चैन्ये, T1 चित्र-, G M2 3 चैत्रो (for चैत्र-) Ś1 D2 12 13 नवोदित इव ग्रह, Ñ V1 B1–3 D7 क्रूररश्मि (B3 °रुचि)रामिव ग्रह, D3 कुजश्चैत्र इव ग्रह —After 16, D5 6 8 10 S ins

26* अमी मयूरा शोभन्ते प्रनृत्यन्तस्ततस्तत ।
स्वै पक्षै पवनोद्धूतैर्गवाक्षै स्फाटिकैरिव ।

[(l 2) D6 8 स्वपक्षै]

17 V3 illeg for 17 (cf v l 11) B2 reads 17 and 18 in marg —^{a}) Ś1 D12 शिखडीभि, D3 शिखडिनीभि (hypm) G(ed) वृता भाति (for परिवृता) —^{b}) D5 6 8–10 S Cm g t त गुते सद (D6 मदन [hypm]) मूर्छिता —After 17^{ab}, Ś1 D3 read 19^{ab} Ñ1 illeg, while B1 om 17^{c}–18 G(ed) om 17^{cd} —^{cd}) T1 3 G3 M1 मन्मथाग्नि- Ś1 D2 3 12 13 प्रवृत्ता (D3 अत्यता, D12 13 °नृत्ता) मन्मथोन्मत्ता (for ^{c}) D3 -वार्धिनी Ñ2 V1 B2 3 D7 प्रवृत्ता (Ñ2 °त्या, B3 उन्मत्ता, D7 °नृत्ता) मन्मथाविष्टा मम शोकविवर्धना

18 V3 illeg for 18 (cf v l 11) Ñ1 illeg, B1 om, B2 reads in marg 18 (for all cf v l 17) —^{b}) Ś1 D2 12 G3 अनु (D2 G3 °पि) नृत्यति, Ñ2 V1 B2 3 D7 अनुनृत्यतीं (Ñ2 °त्य ता) ❀ Cv r उपनृत्यति उपशब्दस्य समीपार्थत्वेपि कर्मप्रवचनीयत्व ऋषिप्रयोगबलेन ❀ —^{c}) Ś1 D2 3 12 13 मन्मथेनार्ता (for °थार्तैषा) Ñ2 V1 B2 3 D7 मयूरीं मन्मथाविष्टा (B2 °ष्टा) —^{d}) D5 नृत्यत (sic) V1 अनुसानुषु, D5 8–10 12 T1 3 गिरिसानुनि (for गिरिसानुषु) G(ed) मम शोकविवर्धये. —After 18, D5 6 8–10 S ins

27* तामेव मनसा रामा मयूरोऽप्यनुधावति ।
वितत्य रुचिरौ पक्षौ रुतैरुपहसन्निव ।

[(l 1) D5 T G2 3 [अ]भिधावति, G1 M [उ]पधा° (for [अ]नुधा°) —(l 2) T G2 3 Cr m k अपहसन्, Cg t as above (for उप°)]

19 V3 illeg for 19 (cf v l 11) Ñ1 om 19 Ś1 D3 read 19^{ab} after 17^{ab} —^{a}) Ś1 B1 D2 3 12 13 न हि नूनं मयूरस्य, Ñ2 V1 B2 3 D7 नैव नू (B3 न्यू) न मयूरस्य. —^{b}) Ś1 Ñ2 V1 B1–3 D3 5 7 [अ]पहृता, D2 12 13 [उ]पहृता (for न हृता) ❀ Cv मयूरस्येत्यादे पश्चार्धं तस्मान्नृ कान्तया इत्येतत्, Cr मयूरस्य प्रिया तस्मान्नृत्यति कान्तया इति सम्यक् ❀ —After 19^{ab}, D5 6 8–10 S ins

28* तस्मान्नृत्यति रम्येषु वनेषु सह कान्तया ।

[D9 om (hapl.) वनेषु]

—Thereafter T2 cont l 3–4 of 29* —^{c}) Ñ2 V1 D7 विनाभाव (for विना वास) Ś1 B1 D2 12 13 अहं यथा विरहित, B2 3 सीता परवश याता, D3 मोह तथा विरहित —^{d}) Ñ2 B2 3 D7 सुमध्यमा (Ñ2 D7 °या), V1 D2 सुमध्यमा, G1 M2 [ऽ]तिदु सह (for सुदु सह) Ś1 B1 D3 12 13 पुष्पमासि सुमध्यमे (B1 D13 °मा, L[ed] °या) ❀ Cr ममेति विना सीतयेति शेष अस्य श्लोकस्य (परत) ममाप्येवमित्येतत् श्लोकात्प्रस्थानमुचित वनवर्णनप्रकरणस्वारस्यात्, Cm मयूरस्य इति श्लोकानन्तर ममाप्येवमिति श्लोक ❀ —After 19, D5 6 8–10 T1 3 G M ins, T2 ins l 1–2 only after 19 and cont l 3–4 after 28

29* पश्य लक्ष्मण सराग तिर्यग्योनिगतेष्वपि ।
यदेषा शिखिनी कामाद्भर्तारमभिवर्तते ।
ममाप्येव विशालाक्षी जानकी जातसभ्रमा ।
मदनेनाभिवर्तेत यदि नापहृता भवेत् ।

G 3. 79 18 B 4. 1 4- L 3 82 22

पश्य लक्ष्मण पुष्पाणि निष्फलानि भवन्ति मे ।
पुष्पभारसमृद्धानां वनानां शिशिरात्यये ॥ २०
वदन्ति रावं मुदिताः शकुनाः संघशः कलम् ।
आह्वयन्त इवान्योन्यं कामोन्मादकरा मम ॥ २१
नूनं परवशा सीता सापि शोचत्यहं यथा ।
श्यामा पद्मपलाशाक्षी मृदुभाषा च मे प्रिया ॥ २२

[(l 1) D8–10 सरागत्, G2 सरभ, M1 मारस्यास् (for सराग) —(l 2) D5 8–10 अधुना, D6 यथेषा, M1 यथैषा (for यन्येषा). D6 नानुरवते, G2 M3 रमतेति के (for अभिवर्तते) —(l 3) T1 3 G2 M1 2 मामपि (for ममापि). D8 reads जानकी in marg ❀ Cv r, यथैषा शिखिनी कामाद्भर्तारमभिवर्तते । ममाप्येवमिति नन्यापाठ ❀ —(l 4) G1 M2 यदि सा न हता प्रिया (for the post half).]

20 V3 illeg for 20 (cf v l 11) —a) Ś1 Ñ V1 B1–3 D2 3 7 12 13 चारूणि (for लक्ष्मण) Ñ2 marg, D3 रूपाणि (for पुष्पाणि) —b) Ś1 D12 फलानि च, Ñ2 D6 7 विफलानि (for निष्फ°) D5 ते (for मे) ❀ Cv r भवन्तीति शत्रन्तद्वितीया नहुवचनान्त ❀ —After 20ab, Ś1 B1 (only l 1–2) D2 3 12 13 ins

30* परिचुम्बति सश्लिष्य भ्रमरश्चूतमञ्जरीम् ।
नवसगमसहृष्ट. कामी प्रणयिनीमिव ।
भ्रमरश्चतमञ्जर्या चलत्पल्लवपाणिना ।
त्रिक्षिप्त साप्रतं नार्या सव्यलीक इव प्रिय ।

[(l 1) D2 परिभुवति, D12 परिचुरति B1 सविश्य, D2 सश्लिष्ट (for सश्लिष्य) D12 भ्रमराश् (for °रश्) —(l 3) D3 विजय- (for पल्लव-)]

—B1 om 20c–21 —c) Ś1 D2 12 13 पुष्पाकर- (for पुष्पभार-) Ñ2 D7 -प्रवृद्धाना (for -समृ°) —d) Ś1 Ñ V1 B2 D2 3 7 12 13 M3 द्रुमाणा, B3 वृक्षाणा, D5 चलाना (for वनाना) Ś1 शिशिराह्वये, V1 शिशिरालये. —After 20, Ñ2 B2 3 (only l 1) D7 ins

31* सीतया विप्रहीणस्य मम लक्ष्मण साप्रतम् ।
वनेऽस्मिन्भव्यसकाशे शकुनानि भवन्ति मे ।

[(l 1) B2 सीतया तु विना चेतन्, B3 सीतायास्तु विनाशेस्य (for the prior half) B3 सप्रति (for साप्रतम्) —(l 2) Ñ2 illeg for वने B. दिव्य- (for भव्य) B2 निष्फलानि (for शकुनानि)],

while D5 6 8–10 S ins

32* रुचिराण्यपि पुष्पाणि पादपानामतिश्रिया ।
निष्फलानि महीं यान्ति सम मधुकरोत्कर ।

[(l 1) M1 शिशिराणि (for रुचि°) G अति(G3 °भि)श्रियां (for °श्रिया) —(l 2) M2 निर्मलानि (for निष्फलानि)]

21 V3 illeg for 21 (cf v l 11) B1 om 21 (cf v l 20) —a) Cg k वदति (as in text), Ct नदति G3 M1 रान (for राव) Ś1 Ñ V1 B2 3 D2 3 7 12 13 अस्मिन्काले (Ś1 °से, D2 °ल) प्रमुदिता, D5 8–10 T2 न(D5 न)दति काम शकुना, D6 नदति काममुदिता —b) D5 8–10 T2 मुदिता (for शकुना) Ñ1 V1 B2 3 transp शकुना and सघशः —c) V1 आकूजन (for °ह्वयन्त) Ś1 Ñ1 D2 3 5 6 12 13 T2 G1 M2 आह्वयती(G1 °यन्ति)व चान्योन्य —d) D5 -[उ]न्मादकर, G(ed.) -[उ]न्मादकरा (for -[उ]न्माद°) —After 21, D5 6 8–10 S ins

33* वसन्तो यदि तत्रापि यत्र मे वसति प्रिया ।

22 V3 illeg for 22 (cf v l 11) Ś1 om (hapl) 22–23 B1 transp. 22 and 23 Ñ V1 B1–3 D2 3 7 12 13 transp 22ab and 22cd —a) Ñ B1–3 D7 सीता परवश (Ñ1 °शा) याता (Ñ2 D7 नीता, B1 प्राप्ता), V1 परवश याता, D2 3 12 13 दीना परवश याता —b) V1 सा च, D5 om (for सापि) B1 2 सापि शोच्या वय यथा (B2 यथा वय). —After 22ab, D5 6 8–10 S ins

34* नून न तु वसन्तस्त देश स्पृशति यत्र सा ।
कथं ह्यसितपत्राक्षी वर्तयेत्सा मया विना ।
अथवा वर्तते तत्र वसन्तो यत्र मे प्रिया ।
किं करिष्यति सुश्रोणी सा तु निर्भर्त्सिता परै ।

[(l 1) D6 न हि, G3 M1 Ck ननु (for न तु) G1 M2 transp नून and न तु D8 10 वसतस्तु, G3 °तम्य, M3 °तोय (for °न्तस्त) G3 वसति (for स्पृशति) —(l 2) D6 वर्तते (for °येत्) T2 M1 2 transp मया and विना —(l 3) G2 वर्तता (for °ते) —(l 4) T2 सापि, M2 या तु (for सा तु) ❀ Ct अथवा वर्तते तत्र वसन्तस्तथापि परैः शत्रुभि पीडिता यत सा अतस्तस्या वसन्त किं करिष्यति परकृतपीडासत्त्वे कामपीडासत्त्वे कामपीडा ननकाशादिति भाव इति प्राञ्च । परे तु तत्र वसन्तो नास्त्येव । तत्सत्त्वे मया विना सा कथ तत्र तिष्ठेत् । आनन्द स्यादित्यर्थ तदेव नचयन्नाह अथवेति ❀]

—c) V1 D5 श्यामपद्म- D6 -विशालाक्षी, D13 -दलाभाक्षी (for -पलाशाक्षी) —d) G3 M1 2 मृदुभाषी M2 मम (for च मे) Ñ2 V1 B1–3 D2 3 7 12 13 विना भूना मया प्रिया (B2 3 सती, D3 प्रिया मम) T1 3 G2 M3 मृदुपूर्वाभिभाषिणी —After 22, D5 6 8–10 S ins

35* नून वसन्तसम्पाच्च परित्यक्ष्यति जीवितम् ।
दृढ हि हृदये बुद्धिर्मम सप्रति वर्तते ।
नाल वर्तयितु सीता साध्वी मद्विरह गता ।
मयि भावो हि वैदेह्यास्तत्त्वतो विनिवेशित ।
ममापि भाव सीताया सर्वथा विनिवेशित ।

[D10 om l 2–3 —(l 2) D5 8 9 सपरि- (for सप्रति) —After l 3, G1 ins

35(A)* कालं यापयितु नालमिति मे परिवर्तते ।

—(l 4) G3 [ऽ]पि, M3 तु (for हि) M1 सगमो (for तत्त्वतो) —M3 om (hapl) l 5 —(l. 5) M1 3 मया

एष पुष्पवहो वायुः सुखस्पर्शो हिमावहः ।
तां विचिन्तयतः कान्तां पावकप्रतिमो मम ॥ २३
तां विनाथ विहंगोऽसौ पक्षी प्रणदितस्तदा ।
वायसः पादपगतः प्रहृष्टमभिनर्दति ॥ २४
एष वै तत्र वैदेह्या विहगः प्रतिहारकः ।
पक्षी मां तु विशालाक्ष्याः समीपमुपनेष्यति ॥ २५
पश्य लक्ष्मण संनादं वने मदविवर्धनम् ।
पुष्पिताग्रेषु वृक्षेषु द्विजानामुपकूजताम् ॥ २६
सौमित्रे पश्य पम्पायाश्चित्रासु वनराजिषु ।
नलिनानि प्रकाशन्ते जले तरुणसूर्यवत् ॥ २७

G 3 79 25
B 4 1 62
L 3 82 33

(for मम) G1 भूय (for भाव) D6 वैदेह्या (for सीताया) G2 सवतो (for सर्वथा)]

23 V3 illeg for 23 (cf v l 11) Ś1 om 23 (cf v l 22) B1 transp 22 and 23 —[a]) Ñ2 V1 B3 D7 शीत (for वायु) B2 एव पुष्पावहश्शीत —[b]) Ñ1 B1 D2 3 12 13 सुखावह, Ñ2 V1 B2 3 D7 हि मारुत (for हिमावह) —[c]) Ñ2 D7 स- (for वि-) —Ñ1 illeg from 23[d]–24[b] —[d]) B2(*sup lin* also) D3 -प्रतिमोपम (for °मो मम) —After 23, D5 6 8–10 S ins

36* सदा सुखमहं मन्ये यं पुरा सह सीतया ।
मारुत स विना सीतां शोकसंजननो मम ।

[(l 2) M3 शोक (for शोक-) G1 M2 -सदीपनो, M3 वर्धयते (for सजननो)]

24 V3 illeg for 24 (cf v l 11) Ñ1 illeg for 24[ab] (cf v l 23) —[a]) Ś1 Ñ2 B1 3 D2 3 12 13 तिमिरागो, V1 तिमिराक्षो, B2 न शीतागो, G1 M2 3 Cm g ता विना स (for ता विनाथ) B2 D7 विहगो Ñ2 V1 B1–3 D7 [s]य, M3 य (for ऽसौ) G(ed) नमितागोयमस्तद्धो —[b]) T2 Ck तथा (for तदा) Ś1 D2 3 12 13 पक्षी प्रमुदित सदा, Ñ2 B1–3 D7 मत्त प्रमु(Ñ2 D7 °ण)दित सुस(Ñ2 B3 कल), V1 स तु प्रणदते कल, G2 पक्षी प्ररुदितस्तथा, M1 पक्षी प्रणदति स्वय ❀ Cv पूर्वमाकाशे स्थित्वा परुष रुदित्वा तस्या वियोग सूचितवान्, Cr आकाशगत सन् प्ररुदित परुषभाषित वदतीत्यर्थ ❀ —[c]) Ś1 Ñ V1 B3 D3 7 शिशिरस्याते, B1 2 D2 12 13 शिखरस्याते (for पादपगत) —[d]) G(ed) हृष्टमाम् (for प्रहृष्टम्) Ś1 Ñ B1–3 D2 3 7 12 अभि(B2 इव)-नदति, V1 अतिनर्दति, D5 इव नर्दति, D8–10 G2 Ct °कूजति, M3 °वर्तति (sic) (for अभिनर्दति)

25 V3 illeg for 25 (cf v l 11) —[a]) Ñ2 V1 B2 3 D7 मे तत्र, G1 तत्र च, G3 त्र (damaged), M1 वै सह (for वै तत्र) —[b]) D2 3 Cm विहग D8 10 प्रीतिकारक (for प्रतिहारक) Ñ2 V2 B1–3 D7 सकाशे(B1 °श, B2 °मो) कथयिष्यति, V1 चंपक कथयिष्यति —[cd]) M1 वने (for पक्षी) Ś1 मत्तो, D12 मा तु (for मा तु) Ñ2 V1 B1–3 D7 पक्षी कुशलवृत्तात तस्याश्च कुशल मम(B2 °यि) ❀ Ck ता विनेत्यादि । प्रणदितस्तथा, विहग प्रीतिकारक इति प्राचीन पाठ । य पक्षी तस्या सयोगकाले तथा प्रणदित अतिसुख प्रणदितवान् स एवासौ विहगम पक्षी ता विना अन्यथा च दु ख-प्रणादवानपि जायत इत्यर्थ । यथास्या पक्षिणस्त्वयमेकरूपोपि नादस्तत्सयोगवियोगोपाधिभ्या सुखदु खाभ्या जायते मे तस्या अन्येवमेवैतत् पक्षिनादो भविष्यतीति सभावयति । वायस इत्यादि त्रयमेकम् । राक्षसादिवद्वायस स्वार्था न्त सिद्धय य एष पादपगतो वायस पक्षी अत्र प्रहृष्टमभिकूजति । वियोगे वैदेह्या प्रियकर सोस्मा तत्र वै तस्या समीपेपि कूजिष्यति ततश्चाय पक्षी मा तु विशालाक्ष्या समीप चित्तधर्मापमुपनेष्यति साप्येतच्छब्दश्रवणे मा स्मृत्वा खेत्स्यतीत्यर्थ अरामा तु प्रणदितस्तदा विहग प्रतिहारक इति प्रकल्प्य कयाचन कष्टपिष्टयायूयुजन्निव तदसागत्य स्पष्ट तत्पूर्वभाविन सर्वेपि तथैव Ct also quotes Kataka ❀ —After 25, Ś1 D2 3 12 13 ins

37* एष कूजति चक्राह्वो रमयन्सहचारिणीम् ।
न चापि दर्शनादस्या निमेषमपि नश्यति ।
तर्जयन्निव सयाति सिंहोऽय भार्यया वने ।
मा मूढबुद्धि सप्राप्तो न विमुक्त पदात्पदम् ।

[(l 1) D3 ता प्रिया मुव (for सहचारिणीम्) —(l 4) Ś1 सप्राप्त, D12 सप्राज्ञो (for °प्तो) D3 मा मूढबुद्धि मुप्रज्ञो (for the prior half) D3 स्वविमुक्ता, D13 न वियुक्त (for न विमुक्त)]

26 V3 illeg for 26 (cf v l 11) —[a]) D6 T1 3 G M1 2 शृणु, Cr m g k t as in text (for पश्य) Ś1 D2 12 13 सनादो, B1 सत्राद, B2 चोन्माद (for सनाद) —[b]) Ś1 Ñ V1 B1–3 D2 3 7 12 13 मम(D3 वने) मन्मथवर्धन(Ś1 D2 12 13 °न), D6 वने मदविवर्धित —[c]) G3 द्रुमेषु पुष्पिताग्रेषु —[d]) Ś1 D12 अभिनन्दिना, Ñ1 D2 3 13 अभिनदता(D3 °न, D13 °दिता), Ñ2 V1 B2 D7 अभिकूजता(V1 °जित), B1 इह कू°, B3 अतिकू°, D5 6 8–10 G3 Ct अवकू°, G(ed) अनुकू° (for उपकूजताम्) —After 26, D5 6 8–10 S ins

38* विक्षिप्ता पवनेनैतामसौ तिलकमञ्जरीम् ।
षट्पद सहसाभ्येति मदाद्धूतामिव प्रियाम् ।
कामिनामयमत्यन्तमशोक शोकवर्धन ।
स्तबकै पवनोत्क्षिप्तैस्तर्जयन्निव मा स्थित ।
अमी लक्ष्मण दृश्यन्ते चूता कुसुमशालिन । [5]
विभ्रमोत्सिक्तमनस साङ्गरागा नरा इव ।

[(l 1) D6 निक्षिप्ता (for °प्ता) G1 तिलकेनैवम् (for पवनेनैताम्) —(l 2) D5 मदोद्भूताम्, T3 M3 मनोद्भू°, G2 मदधू° (for मदाद्धूताम्) —(l 3) D6 G1 अत्यथम् (for °न्तम्) —(l 4) G3 [ए]न मा (for [इ]व मां) M3 स्थिन —(l 6) G1 M1 [उ]त्क्षिप्त (for -[उ]त्सिक्त) G3 [अ]गना (for नरा)]

27 V3 illeg for 27 (cf v l 11) —[a]) Ś1 V1 D2 3 12 13 पपाया —After 27[ab], V1 ins

G 3 70 26 B 4 1 63 L 3 82 35 एषा प्रसन्नसलिला पद्मनीलोत्पलायुता ।
हंसकारण्डवाकीर्णा पम्पा सौगन्धिकायुता ॥ २८
चक्रवाकयुता नित्यं चित्रप्रस्थवनान्तरा ।
मातंगमृगयूथैश्च शोभते सलिलार्थिभिः ॥ २९
पद्मकोशपलाशानि द्रष्टुं दृष्टिर्हि मन्यते ।
सीताया नेत्रकोशाभ्यां सदृशानीति लक्ष्मण ॥ ३०

39* मधुर कोकिलो मन्दमृतुदोषेण कूजति ।
पम्पा पश्य मुदिस्तीर्णां कथा श्रुतवतामिव ।,

while D5 6 8-10 S ins

40* किनरा नरशार्दूल विचरन्ति ततस्तत ।
इमानि शुभगन्धीनि पश्य लक्ष्मण सर्वश ।

[(l 1) D5 8-10 T2 वनम्, D6 G3 इतम (with hiatus) (for ततस्) —(l 2) D6 G1 M1 2 शुचि, G1 च सु- (for शुभ) D6 पश्य रम्याणि लक्ष्मण (for the post half)]

—B1 om 27cd —c) Ś1 D2 12 13 नलिन्य स, D7 °न्यश्च (for °नानि) Ñ1 प्रकाशते नलिन्यस्ते, V1 पद्मानि चास्या शोभते —d) M3 जले तरुणमार्यवत् —For 27cd, Ñ2 B2 3 D7 subst

41* मधुर कोकिलालापन्तुदोषेण कूजताम् ।

[B2 मत्तन्दोषेण, B3 मतुशेषेण (for न्तुन्दोषेण) B2 कूजित]

—Ñ2 D7 cont

42* षट्पदारावसघुष्टो वनेषु च सुगन्धिषु ।
वसन्त समनुप्राप्तो नानाविहगकूजित ।

—After 27, Ś1 D2 8 12 13 ins

43* हिममाशङ्कमानाभि फुल्लैस्तिलकपादपै ।
भीताभिरिव वल्लीभि कुड्मलाञ्जलय कृता ।

[(l 1) D8 हितम् (for हिमम्) D3 कुन्जस् (for फुल्ल). D12 -जाल्कै (for पादपै) —(l 2) D3 12 वापीभि (for वल्लीभि) D2 शीताभिरिव वापीभि (for the prior half)]

28 V3 illeg for 28 (cf v l 11) —b) M1 [उ]त्पलैर् (for -[उ]त्पल-) V1 -[अ]न्विता (for -[आ]युता) Ś1 Ñ1 B1 D2 12 13 पद्मिनी चोत्पलायुता, B2 3 पद्मिन्युत्पलसयुता —d) Ñ2 B2 3 D7 पुष्प, G3 वापी (for पम्पा) D6 M3 [अ]न्विता (for -[आ]युता) Ś1 Ñ1 B1 D2 1 12 13 पद्म(Ñ1 illeg, B1 फुल्ल, D3 पुष्प)सौगधिकाकुला, V1 चक्रवाकोपशोभिता, Cvp r as in text —After 28, D5 6 8-10 S ins

44* जले तरुणसूर्याभै षट्पदाहतकेसरै ।
पङ्कजै शोभते पम्पा समन्तादभिसवृता ।

29 V3 illeg for 29 (cf v l 11) M2 lacuna for 29a —a) V1 फुल्लसौगधिका नित्य, G1 चक्रवाकरतात्यत —b) T2 चित्रस्थल, G2 M1 °प्रस्था (for °प्रस्थ-) Ś1 Ñ1 B1 2 D2 3 7 12 13 विचित्रकुसुमावृता(Ñ1 °युता, B2 D7 °करा), Ñ2 V1 B3 विचित्रकुसुमोत्करा —After 29ab, M1 ins

15* क्रौञ्चसारससघुष्टा पम्पा सौगन्धिकायुता ।

—c) Ś1 B1 D2 3 6 12 13 M1 मातगैर् G2 मत्तमातगयूथैश्च —d) Ś1 Ñ1 B1 D2 3 12 13 सेवितेश्च जलार्थिभि, Ñ2 V1 B2 3 D7 सेविता भ्रातु(B2 3 पश्य) लक्ष्मण —After 29, D5 6 8-10 S ins

46* पवनाहतवेगाभिरूर्मिभिर्विमलेऽम्भसि ।
पङ्कजानि विराजन्ते ताड्यमानानि लक्ष्मण ।
पद्मपत्रविशालाक्षी सतत प्रियपङ्कजाम् ।
अपश्यतो मे वैदेहीं जीवित नाभिरोचते ।
अहो कामस्य वामत्व यो गतामपि दुर्लभाम् । [5]
स्मारयिष्यति कल्याणीं कल्याणतरवादिनीम् ।
शक्यो धारयितु कामो भवेदभ्यागतो मया ।
यदि भूयो वसन्तो मा न हन्यात्पुष्पितद्रुम ।
यानि स्म रमणीयानि तया सह भवन्ति मे ।
तान्येवारमणीयानि जायन्ते मे तया विना । [10]

[(l 1) M3 Cg -[आ]हित, Cv r m t as above (for -[आ]हत) —(l 2) G3 damaged for पङ्क —(l 3) D6 T2 प्रियवादिनी, G1 3 M2 °दर्शना, M1 3 पकजप्रिया (for प्रियपङ्कजाम्) —(l 4) G1 सौमित्रे (for वैदेहीं) T1 G2 जीवितु, G1 °ने (for °त) T3 M3 नापि रोचते —(l 5) M1 कामत्व (for वामत्व) M1 योगिनामपि दुर्लभ (sic) (for the post half) —(l 6) G1 M1 2 स्मारयत्यपि(M1 °ति), G3 °यद्वदि (for °यिष्यति) —(l 7) D5 भरयितु (sic), D6 T2 वारयितु (for धार°) G2 अभ्याहतो, G(ed) Ck अद्यागतो (for अभ्यागतो) D6 मम ❀ Cv r शक्यो धारयितु काम इति पाठ ❀ —(l 9) G1 M1 स- (for स्म)]

30 V3 illeg for 30 (cf v l 11) Ñ1 illeg for 30ab —a) V1 B3 पद्मकोष- Ś1 D2 8 12 13 प्रकाशानि (for -पला°) B1 पद्मान्यशोकपुष्पाणि —b) Ś1 Ñ2 V1 B1-3 D2 3 7 12 13 M3 दृष्ट्वा, Ct as in text (for द्रष्टुं) Ñ2 V1 B1 D7 G2 वि(Ñ2 D7 च)हन्यते, B2 3 च मन्यते, D3 हि मन्यसे (for हि मन्यते) —c) Ñ2 D7 नेत्रपद्माभ्या, V1 B3 °कोषाभ्या (for °कोशाभ्या) —d) Ś1 B1 D2 12 13 [इ]व, Ñ1 D3 [इ]ह (for [इ]ति) ❀ Cv नेत्रकोशाभ्या नेत्रपत्राभ्याम्। अत्र प्रदेशे अन्येपि केचन श्लोका केषुचित्कोशेषु सन्ति ते हेया इति न प्रदर्श्यन्ते। कतिपयपद्यप्रथनकोविदकवितालयलाभलुलितविवेकैरविद्वत्कुलकुमारै स्वत्राकुसादृश्यशोधनेन वा सहपाठनस्ववाक्प्रथनसभावनाभ्रमेण वा कौतूहलेन बाल्येन वा तादृशा श्लोका कोशेषु लिखिता इति वेदनीया', Cr also comments similarly ❀ —After 30, Ñ2 V1 B2 3 D7 ins

47* शैलप्रस्थ तु सौमित्रे सर्वत पश्य पुष्पितम् ।
इहस्थो दूरतो रम्य प्रदीप्तमिव किंशुकै. ।

पद्मकेसरसंसृष्टो वृक्षान्तरविनिःसृतः ।
निःश्वास इव सीताया वाति वायुर्मनोहरः ॥ ३१
सौमित्रे पश्य पम्पाया दक्षिणे गिरिसानुनि ।
पुष्पितां कर्णिकारस्य यष्टिं परमशोभनाम् ॥ ३२
अधिकं शैलराजोऽयं धातुभिस्तु विभूषितः ।
विचित्रं सृजते रेणुं वायुवेगविघट्टितम् ॥ ३३
गिरिप्रस्थास्तु सौमित्रे सर्वतः संप्रपुष्पितैः ।
निष्पत्रैः सर्वतो रम्यैः प्रदीप्ता इव किंशुकैः ॥ ३४
पम्पातीररुहाश्चेमे संसक्ता मधुगन्धिनः ।
मालतीमल्लिकापण्डाः करवीराश्च पुष्पिताः ॥ ३५
केतक्यः सिन्दुवाराश्च वासन्त्यश्च सुपुष्पिताः ।
माधव्यो गन्धपूर्णाश्च कुन्दगुल्माश्च सर्वशः ॥ ३६
चिरिबिल्वा मधूकाश्च वञ्जुला बकुलास्तथा ।
चम्पकास्तिलकाश्चैव नागवृक्षाश्च पुष्पिताः ॥ ३७ G 3 79 35 B 4 1 78 L 3 82 20

[(l 1) B2 शल्प्रस्थश्च V1 शुभपवत (for पश्य पुष्पितम्) —(l 2) Ñ2 [s]रण्य (for रम्य) B2 प्रदीप्तर् (for °प्तम्)]

31 V3 illeg for 31 (cf v l 11) V1 om 31^{ab} —^{a}) B1 D5 6 13 पद्मकेशर- Ś1 D12 G1 सस्पृष्टो, D3 -सयुक्तो, G3 M2 3 -सहृष्टो (for सम्सृष्टो) —^{b}) G1 -विनिर्गत —For 31^{ab}, Ñ2 B2 3 D7 subst

48* पद्मपुष्परजोमिश्र पादपान्तरनि सृत ।
[G(ed) रजोन्मिश्र (for °मिश्र)]

—^{c}) Ñ V1 B1 3 D2 5 7–10 S निश्वास —^{d}) B1 G1 वायुर्वाति (by transp), D3 वाति वातो (for वाति वायुर्) Ś1 Ñ V1 B1–3 D2 3 7 12 13 मनोरम (for °हर) ❀ Ck पद्मकेसरेत्यादि विशेषणाभ्या शैत्यसौरभ्यमान्द्यगुणप्रदर्शनम् । अत्र द्वित्रा प्रक्षिप्ता क्वचिद्दृश्यन्ते ते तूपेक्ष्यन्ते ❀

32 V3 illeg for 32 (cf v l 11) —^{a}) Ś1 V1 B1 3 D2 3 12 13 पपाया —^{b}) V1 पक्षिणो (sic) (for दक्षिणे) Ś1 Ñ V1 B1–3 D2 3 7 12 13 G3 गिरिसानुषु —^{c}) Ś1 Ñ B1–3 D2 3 7 12 13 पुष्पिता, V1 पुपिता (for °ता) D2 3 6 कर्णकारस्य —^{d}) D5 6 8–10 G3 -शोभिता, T2 -शोभिनीं (for °भनाम्) Ś1 Ñ V1 B1–3 D2 3 7 12 13 यष्टि (V1 °ष्टी) परमशोभना (V1 °ना)

33 V3 illeg for 33 (cf v l 11) —^{a}) Ś1 Ñ1 B1 D2 3 12 13 शैलराजस्य (for °राजोऽय) —Ñ1 illeg from 33^b up to नि in 33^d —^{b}) Ś1 B1 2 D2 12 13 सुविभूषिता, D3 सुमनोहरा, D5 8–10 T2 तु वि°, G(ed) च विभू° (for सुविभूषित) —^{c}) Ñ2 V1 B2 3 D7 धातुज, B1 पुष्पाणा (for विचित्र) V1 om, B2 रम्य (for रेणु) Ś1 D2 3 12 13 पुष्पाणा सृजते वर्ष —^{d}) Ś1 Ñ1 D2 3 12 13 -विघट्टिता, Ñ2 D7 G1 2 विघट्टित (for °तम्) V1 B1 3 वायुवेगेन घट्टित (G[ed] °र्पित), B2 वायुवेगमितोद्वित —After 33, Ñ2 reads 35^a and 35^d

34 V3 illeg for 34 (cf v l 11) D7 om 34^{ab} V1 B1–3 transp 34 and 35 B2 reads 34 twice —^{a}) Ś1 D2 12 13 गिरिप्रस्थश्च, Ñ1 V1 B1–3 °प्रस्थे च (Ñ1 तु), Ñ2 D3 °प्रस्थेषु, D6 M1 °प्रस्थस्तु (for °प्रस्थास्तु) —^{b}) Ś1 D12 सप्रपूरित, Ñ1 °कान्तै, Ñ2 V1 पुष्पितद्रुमान्, B1–3 पुष्पितान्द्रुमान्, D2 °पुष्पित (for सप्रपुष्पित) —D7 transp 34^{cd} and 35^{ab} —^{c}) M1 रम्य (for रम्यैः) Ś1 D2 12 13 निष्पत्रो (D2 13 °त्रैर्) दूरतो रम्य, Ñ1 निष्पत्रैर्दूरतो रम्यै, Ñ2 V1 B3 D7 निष्पत्रा (V1 °र्णा) न्दूरत पश्य, B1 2 निष्फलान् (B2 निष्पत्रान्) दूरत पश्य, D3 निवर्णो दूरतो रम्य —^{d}) Ś1 Ñ1 B2 D2 3 12 13 प्रदीप्तैर् Ñ2 V1 B1–3 D7 प्रदीप्तानिव किंशुकान्

35 V3 illeg for 35 (cf v l 11) For 35–40, Ś1 D12 subst 53* V1 B1–3 transp 34 and 35 D7 transp 34^{cd} and 35^{ab} Ñ2 reads 35^a and 35^d after 33 —^{a}) D2 9 रुहश, D6 T1 3 -गताश् (for -रुहाश्) Ñ2 V1 B1–3 D7 चैव (for चेमे) —Ñ2 om 35^{bc} —^{b}) V1 B1–3 D7 पुष्पिता, D8–10 Ck t ससिक्ता, Cg as in text (for ससक्ता) V1 D5 ससुगविभि (D5 °न), D9 मद° (for मधुगन्धिन) Ñ1 D2 3 13 पुष्पितास्तु सुगधिन —Ñ1 D2 3 7 13 om 35^{cd} —^{c}) D5 8–10 T2 पद्म, Cg as in text (for -षण्डा) V1 B1–3 मालत्यो (V1 °ती) मल्लिकाश्चैव —^{d}) G(ed) सु (for च)

36 V3 illeg for 36 (cf v l 11) For subst in Ś1 D12, cf v l 35 and 40 —^{a}) V1 शोभते, D3 चपका, M2 Cv r केतक्य (for केतक्य) Ñ2 B1 3 D7 शोभते (B1 केतका) सिधुवाराश्च, B2 शोभते विंदुधाराश्च, D6 के ° सिंदुवासाश्च, D6 T2 3 केद्रति (T2 °ती, T3 °त्य) सिंधुवाराश्च —^{b}) B1 वासनाश्च Ñ1 B1 D2 3 ममतत, Ñ2 D7 प्रपुष्पिता (for सुपुष्पिता) —After 36^{ab}, G3 reads 38^{cd} (preceded by l 2 of 51*) —^{c}) D6 T2 माधवी- B2 बहुश पूर्णा, B3 गधसपूर्णा (for °पूर्णाश्च) D8–10 मातुलि (D8 °लु, D9 °ल)गाश्च पूर्णाश्च —^{d}) Ñ2 V1 B2 3 D7 पुष्पिता, G1 सर्वत (for सर्वश) —For 36^{cd}, Ñ1 B1 D2 3 13 subst

49* शोभन्ते माधवे मासि कर्णिकारा सुपुष्पिता ।
[Ñ1 च, D13 तु (for सु-)]

—Thereafter in Ñ1 two lines are illeg

37 V3 illeg for 37 (cf v l 11) For subst in Ś1 D12, cf v l 35 and 40 Ñ1 om 37–40 D2 3 om (hapl) 37 D13 om 37^{ab} —^{a}) V1 B1 3 D6 7 9 G2 चिरविल्वा (D9 °ल्व), T3 चीरविल्वा B2 मधुरिका (for

G 3 79 38
B 4 1 79
L 3 62 42

नीपाश्च वरणाश्चैव सर्जराश्च सुपुष्पिताः ।
अङ्कोलाश्च कुरण्टाश्च चूर्णकाः पारिभद्रकाः ॥ ३८
चूताः पाटलयश्चैव कोविदाराश्च पुष्पिताः ।
मुचुकुन्दार्जुनाश्चैव दृश्यन्ते गिरिसानुषु ॥ ३९
केतकोद्दालकाश्चैव शिरीषाः शिंशपा धवाः ।
शाल्मल्यः किंशुकाश्चैव रक्ताः कुरवकास्तथा ।
तिनिशा नक्तमालाश्च चन्दनाः स्यन्दनास्तथा ॥ ४०

सरक्ताश्च) —^{b}) I1 G M वञ्जुला (for वकुला) Ñ2 V1 B2-3 D7 च तथापरे, B1 तिदुकास्तथा (for वकुलास्तथा) —D13 reads 37^{c}–38 after 40^{ab} —^{c}) D13 तत्र मालाश्च मालाश्च —^{d}) V1 नागरम्याश्च, B2-3 °पुष्पाश्च, D13 °वद्वाश्च, M2 वनवृक्षाश्च (for नागवृक्षाश्च) M1-3 सु- (for च) Ñ2 D7 चदनाश्च सुपुष्पिता, B1 दृश्यन्ते गिरिसानुषु —For 37, D6 subst

50* चिरिबिल्वाश्च मुकाश्च वञ्जुलान्वकुलांस्तथा ।
चम्पकान्तिलकांश्चैव नागवृक्षांश्च पुष्पितान् ।

38 V3 illeg for 38 (cf v l 11) For subst in Ś1 D12, cf v l 35 and 40 Ñ1 V1 om 38 (for Ñ1, cf v l 37) D6 8–10 om (hapl) 38^{ab} The sequence of st 38–41 in Ñ2 D7 is 38^{cd}, 41 (om 41^{cd}), 39, 40^{ab}, 38^{ab}, l 2–3 of 54*, 40^{c-f} B1-3 D3 read 38 (^{ab} and ^{cd} transp) after l 1 of 54*, D2 reads after 40^{cd} and D13 after 40^{ab} —^{a}) D2 3 13 नीवारा (for नीपाश्च) B1-3 D6 वरणाश्च, D3 वारु°, M1 वार° (for वर°) —^{b}) D2 स- (for सु-) Ñ2 B1 D7 सर्वतो भाति पुष्पिता, B2 वकुलाश्चन्दनास्तथा, B3 चदना स्यदनास्तथा, D13 सर्जराम्राश्च पुष्पिता —After 38^{ab}, B2 3 D5 6 8–10 S ins

51* पद्मकाश्चैव शोभन्ते नीलाशोकाश्च पुष्पिता ।
लोध्राश्च गिरिपृष्ठेषु सिंहकेसरपिञ्जरा ।

[(l 1) G2 [अ]त्र, M3 [उ]प- (for [ए]व) B2 3 नीलारक्तास्तथाशोका पद्मकाश्चैव पुष्पिता, M1 पद्मकास्तिलकाश्चैव शोभने च सुपुष्पिता —G3 reads l 2 after 36^{ab} —(l 2) B2 3 शृङ्गेषु (for -पृष्ठेषु) M2 -मजरा (for -पिञ्जरा) B2 3 शोभते मर (B2 °व)लास्तथा (for the post half)]

—Then B3 cont l 2–3 of 54* G3 reads 38^{cd} after 36^{ab} (after l 2 of 51*) —^{c}) M1 करजाश्च, I2 3 करटा (I3 °डा)श्च, G M3 कुरडाश्च (for कुरण्टाश्च) Ñ2 B2 3 D7 अशोका (D7 °टा)श्च करजाश्च (B2 करदराश्च [hypm]), B1 D2 3 13 उदु(B1 °दु)बरा कदम्बाश्च —^{d}) Ñ2 B1-3 D2 3 5–7 13 T G3 M2 3 Cv g पूर्णका, G1 भूर्जका, G2 पर्णिका, Cr k t as in text (for चू°) D3 5 7 13 M2 (before corr sec m) परिभद्रका, D9 M1 पारिभाद्रका

39 V3 illeg for 39 (cf v l 11) For subst in Ś1 D12, cf v l 35 and 40 Ñ1 B1 om 39 (for Ñ1 cf v l 37) For sequence in Ñ2 D7, cf v l 38 —^{a}) G3 पाटलिकाश्च (for °लयश्च) D5 8 10 12 [अ]पि (for [ए]व) Ñ2 D7 विवर्णा रक्तवर्णाश्च, V1 D2 3 T2 G1 चूताश्च पाटलाश्चैव (I2 °श्चापि) —^{c}) D5 मुचिन्दि, D6 I2 3 G M Cv t l tp मुचु(D6 M2 °चि)लिन्द, Ct as in text (for °कुन्दा) Ñ2 V1 B2 3 D7 अर्जुना मुचुकु(B2 °चक)न्दा(Ñ2 °दा)श्च, D3 उदुम्बरा कदम्बाश्च —^{d}) V1 पर्वते, G2 शोभन्ते (for दृश्यन्ते)

40 V3 illeg for 40 (cf v l 11) Ñ1 om 40 (cf v l 37) For sequence in Ñ2 D7, cf v l 38 —^{a}) D2 पचक, D13 चपक, G1 कनक, M2 कुचुक (for केतक-) Ñ2 -[उ]त्पलकाश्च (for -[उ]द्दाल°) V1 कर्पूरोदालकाश्चैव, B1 केतकोद्दालकाश्चैव, B2 केतका कुन्दकाश्चैव, B3 D3 केतक्यो (B3 °क्यू)द्दालकाश्चैव —^{b}) D5 T2 3 M3 Cr g शिशुपा V1 B1-3 D2 3 13 तथा (for धवा) Ñ2 D7 च सुपुष्पिता, D6 शिंशुपादपा, Cv as in text (for शिंशपा धवा) —After 40^{ab}, B3 ins

52* सर्वत पुष्पिताग्राभिर्लताभिरनुवेष्टितान् ।

25 D3 11 transp 24^{cd} and 25^{ab} —^{ab}) Ñ2 V B2 3 G3 तमाभाषस्व, B1 इम भाषस्व, B4 D7 त्वमाभाषय (D7 °स्व), D3 T1 3 M1 2 अभिभाषस्व, D6 T2 सवादयस्व, D11 तमभिभाष, Cg k t as in text (for तमभ्यभाष) ❁ Cg अभ्यभाष अभिभाषस्व । अडागमपरस्मैपदे आर्षे ❁ G1 भद्र ते (for सौमित्रे) D3 11 हरि (for कपिम्) G(ed) मत्समीपमुपागत (for ^{b}) Ś1 Ñ1 D1 2 4 12 13 तदेनमभिभाषस्व सौमित्रे हरियूथप —^{c}) V1 अभिज्ञ (for वाक्यज्ञ) Ś1 Ñ1 D1 2 4 12 13 सुग्रीवसचिव प्राप्त —^{d}) D5 6 S अरिंदम (for °मम्) Ś1 D12 हनूमत महाबल Ñ1 कृत्यासन्न हे वय, Ñ2 V B D7 कृतज्ञ सत्यवादिन, D1 2 4 13 कृत्यवत महाबल, D3 11 कृत्यवतमुपस्थित, G(ed) सत्यज्ञ सत्यवादिन —After 25, Ś1 Ñ1 D1 2 4 12 13 ins

99* कार्येणावामिह येन प्रयातौ
द्रष्टु राजान सुव्रत वानराणाम् ।
तस्याप्येतल्लक्ष्मणो वेत्ति तत्त्व
न त्वाश्चर्यं पश्य कालस्य मार्गम् ।

[(l 1) D4 येन चात्र (for इह येन) Ś1 याता (for प्रयातौ) Ñ1 D1 कार्येणावा येन याताविह स्व (D1 °हासा [sic]), D2 13 प्रयाताविह वा गच्छामो द्रष्टु (sic) —(l 2) Ś1 D12 वानरेंद्र (for वानराणाम्) —(l 3) D1 तच्चाप्येतद्, D2 4 13 तस्याप्येव (for तस्याप्येतद्) D1 2 4 13 लक्ष्मण(D1 °क्षण) वेत्थ (for लक्ष्मणो वेत्ति) —After l 3, D4 reads again l 1–3 —(l 4) Ñ1 न त्वावेक्ष्य , D4 तत्त्वाश्चर्यं (for न त्वाश्चर्यं) D2 4 13 यस्य (for पश्य)]

—After 25, D5 6 8–10 S ins a passage relegated to App 1 (No 3).

४

G 4 3 1
B 4 4 1
L 4 3 1

ततः प्रहृष्टो हनुमान्कृत्यवानिति तद्वचः ।
श्रुत्वा मधुरसंभाषं सुग्रीवं मनसा गतः ॥ १
भव्यो राज्यागमस्तस्य सुग्रीवस्य महात्मनः ।
यदयं कृत्यवान्प्राप्तः कृत्यं चैतदुपागतम् ॥ २
ततः परमसंहृष्टो हनूमान्प्लवगर्षभः ।
प्रत्युवाच ततो वाक्यं रामं वाक्यविशारदः ॥ ३
किमर्थं त्वं वनं घोरं पम्पाकाननमण्डितम् ।
आगतः सानुजो दुर्गं नानाव्यालमृगायुतम् ॥ ४
तस्य तद्वचनं श्रुत्वा लक्ष्मणो रामचोदितः ।
आचचक्षे महात्मानं रामं दशरथात्मजम् ॥ ५

Colophon D3 11 om —*Sarga name* D5 6 8 10 S om Ś1 Ñ1 हनूमद्दर्शनं, Ñ2 V B D1 2 4 7 12 13 हनूमद्वाक्य —*Sarga no* (figures, words or both) Ś1 Ñ1 V1 B1 2 D2 4 12 om, Ñ2 V2 3 B3 4 D1 7 13 2, D5 6 8–10 S 3 —After colophon, G concludes with श्रीरामाय नम

4

☞ For Sarga 4, D3 11 have a longer version which is given at the end of the Sarga as a substitute M1 begins with श्रीरामाय नम

1 Ñ2 D7 om 1–4 D1 om 1 —^{a}) D4 हनुमान्, G(ed) रामस्य (for हनुमान्) —V2 om 1^{bc} —^{b}) Ś1 V1 3 (marg also) श्रुतवान्, V3 B1 2 4 कृतवान्, G(ed) हनुमान् (for कृत्यवान्) —^{c}) Ś1 V1 3 B D12 व्यथितभाव त(Ś1 D12 स, V3 च, B4 तु), Ñ1 व्यवसितो भाव, D2 4 13 व्यथितभाव(D2 °प)स्य, D5 T3 G M1 2 मधुरभाप च, D6 8–10 T1 Ck t मधुरभाव च, Cm g as in text (for मधुरसंभाष) ※ Cv मधुरभाष मधुरभाषणम्। Cr मधुरभाष मधुरभाषिणम् ※ —^{d}) Ś1 Ñ1 V2 B4 D4 12 13 स्मरन्, V1 3 B1–3 D2 [अ]स्मरत्, D5 6 [अ]गमत् (for गत)

2 Ñ2 D7 om 2 (cf v l 1) M1 om 2^{ab} —^{a}) D5 8–10 Ct भाव्यो, Cv r m g k as in text (for भव्यो) Ś1 D1 2 4 12 13 तच्च कार्याशय(D1 °गम) तस्य, Ñ1 तच्च रूपागम तस्य —^{b}) Ñ1 ततो दृष्ट्वा (for सुग्रीवस्य) —For 2^{ab}, V B subst

100* नामरूपागम तस्य प्रावेदयत वानर ।

[B1 3 राम- (for नाम) V1 B4 न्यवेदयत (for प्रा°)]

—^{a}) M2 उपाकृत (for °गतम्) ※ Cv यदयम् कृत्यवानित्ये-तदसम्यक्। न हि लक्ष्मणवाक्ये पूर्वं राम इति नाम हनुमता श्रुतम्। यदय कृत्यवानित्येष समीचीन पाठ So also in Cr ※ —For 2^{cd}, Ś1 Ñ1 D1 2 4 12 13 subst, while V3 cont (mostly illeg) after 102*

101* कृत्यवन्तावुभौ प्राप्तौ मत्वा ताविह्वितै कपि ।

[D12 कृत्यवताव Ñ1 damaged from ताव् up to धनुष्पाणि in l 1 of 104*],

while V B subst for 2^{cd}.

102* रामेण कृतवान्प्राज्ञ कृत्य चैत्राभ्युपागत ।

[V1 प्राप्त, B4 प्राज्ञ (for राज) V2 3 B4 रामे स कृत्य(B4 °त)वान्प्राज्ञ (V3 °ह) (for the prior half) V1 कृत, B3 सत्य (for कृत्य) V1 ह्युपागत (for [अ]भ्युपागत)]

—Thereafter V3 cont 101*, while V1 2 cont 104*, whereas B cont

103* रामस्तु सुमहाप्राज्ञो धनुष्पाणिरवस्थित ।
लक्ष्मणेन सह भ्रात्रा काले कालविदा वर ।

[(l 1) B4 च (for तु)]

3 Ñ2 D7 om 3 (cf v l 1) —^{a}) G3 परमसतुष्टो —^{b}) D6 9 M3 हनुमान् V B मारुतात्मज, D5 8–10 प्लवगोत्तम (for प्लवगर्षभ) ※ Cm ग इति गायत्र्या दशमाक्षर तत परमि(म ह)ति श्लोकस्य चतुर्दशाक्षरेण ग इत्यनेन सगृह्णाति।, Cg अस्मिन् श्लोके प्लवगर्षभ इत्यत्र गकारो गायत्र्या दशमाक्षरम्। नवसहस्रश्लोका गता ※ —^{cd}) V B [उ]त्तर (for ततो) B2 G1 2 M3 रामं वाक्य (by transp) D5 8 9 T2 M2 विशारद, D6 G1 3 -विदा वर(G1 °र:) (for -विशारद) —For 3, Ś1 Ñ1 D1 2 4 12 13 subst, while V (V3 after 101*) cont after 102*

104* राम तु सुमहाप्राज्ञो धनुष्पाणिमवस्थितम्।
लक्ष्मणेन सह भ्रात्रा हनुमान्वाक्यमब्रवीत्।

[Ñ1 damaged up to धनुष्पाणि in l 1 —(l 1) V3 त (for तु) D1 सुमहाप्राज, D2 4 12 13 राम स तु महाप्राज्ञो(D4 °ज्ञ) (for the prior half)]

4 Ñ2 D7 om 4 (cf v l 1) —^{a}) D5 6 8–10 T G M1 2 Ck च (for त्व). D2 4 12 13 केन त्व तु (for किमर्थं त्व) Ñ1 M1 दुर्गं, G3 क्रूर (for घोर) Ś1 केन त्व भुवनं घोर. —Ś1 Ñ1 V B D1 2 4 12 13 transp ^{b} and ^{d} —^{b}) Ś1 D1 2 4 12 13 -शोभित, V B -सेवित (for मण्डितम्) —^{c}) D13 दुर्गे, M1 दिव्य (for दुर्गं) —^{d}) Ś1 Ñ1 D1 2 12 13 मृगव्यालनिषेवित, V B सिंहव्याघ्रसमाकुलं, D4 मृगव्याघ्रादि-सेवित

5 ^{a}) Ñ2 V B D7 ततस् (for तस्य) Ś1 D1 2 4 12 13 व्याहत, Ñ1 भाषितं (for वचनं) —^{b}) Ś1 Ñ1 D1 2 4 12 13 सौमित्री (for लक्ष्मणो) D1 रामनोदित —^{d}) V1 3 हनुमन्तमथो वच, B1–3 वानर पवनात्मज, G1 हनूमतं महाकपिं

राजा दशरथो नाम द्युतिमान्धर्मवत्सलः ।
तस्यायं पूर्वजः पुत्रो रामो नाम जनैः श्रुतः ॥ ६
शरण्यः सर्वभूतानां पितुर्निर्देशपारगः ।
वीरो दशरथस्यायं पुत्राणां गुणवत्तरः ॥ ७
राज्याद्भ्रष्टो वने वस्तुं मया सार्धमिहागतः ।
भार्यया च महातेजाः सीतयानुगतो वशी ।
दिनक्षये महातेजाः प्रभयेव दिवाकरः ॥ ८
अहमस्यावरो भ्राता गुणैर्दास्यमुपागतः ।
कृतज्ञस्य बहुज्ञस्य लक्ष्मणो नाम नामतः ॥ ९
सुखार्हस्य महार्हस्य सर्वभूतहितात्मनः ।
ऐश्वर्येण विहीनस्य वनवासाश्रितस्य च ॥ १०

G. 4 3 13
B 4-4 13
L 4 3 11

---

6 ^{b}) Ś1 D2 4 12 13 मतिमान , Ñ2 V B D7 धृतिमान (for द्युतिमान्) —After 6^{ab}, D5 6 8–10 S ins

105* चातुर्वर्ण्यं स्वधर्मेण नित्यमेवाभ्यपालयत् ।
न द्वेष्टा विद्यते तस्य न च स द्वेष्टि कचन ।
स च सर्वेषु भूतेषु पितामह इवापर ।
अग्निष्टोमादिभिर्यज्ञैरिष्टवानाप्तदक्षिणै ।

[(l 1) M2 स धर्मेण (for स्व°) D8 10 [अ]भिपालयन् (for [अ]भ्यपालयत) —(l 2) D6 G3 transp second न and स D5 8–10 स तु द्वेष्टि न कचन (for the post. half) —(l 3) D5 8–10 तु (for च)]

—^{c}) Ñ2 V B D7 अग्रज (for पूर्वज) —^{d}) Ñ2 V B D7 महायशा (for जनै श्रुत·) —After 6, Ś1 Ñ V B D1 2 4 7 12 13 ins

106* धर्मशीलो मृदुर्दान्त सर्वभूतहिते रत ।

7 ^{a}) D12 om , D13 शरण्य (for शरण्य) Ś1 D2 4 12 13 शरणार्थिभ्य , Ñ1 D1 शरणार्थी च, Ñ2 V B D7 शरणेच्छूना (for सर्वभूताना) —^{b}) T2 पितृ- Ñ2 V B D7 आदेश- (for निर्देश) Ś1 Ñ V2 3 D1 2 4 7 12 13 T2 -कारक , B2 (marg also) -तत्पर , G1 M1 2 -पालक (for पारग) —^{c}) D5 8–10 ज्येष्ठो (for वीरो) —^{d}) M3 गुणवत्तम (for °र) —For 7^{cd}, Ś1 Ñ1 D1 2 4 12 13 subst , B4 ins after 8^{ab} (first time)

107* तस्माद्दशरथाज्जातो राम एष महायशा ।

[Ś1 दशरथात्मजो (unmetric) Ñ1 B4 प्रविष्टो दण्डकारण्य (for the prior half) Ñ1 D1 रामो नाम (for राम एष)]
—Thereafter B4 repeats 8^{ab} as in Ñ1
—For 7^{cd}, Ñ2 V B D7 subst

108* पित्रा होष महातेजा· सत्यसधेन राघव ।

—After 7, D5 6 8–10 S ins

109* राजलक्षणसम्पन्न सयुक्तो राजसम्पदा ।

[D5 om , D8–10 सयुक्तो (for सम्पन्न) D5 8–10 G3 राज्य (for राज)]

8 ^{a}) Ñ1 B D1 2 12 13 राज्य- (for राज्याद्) D5 8–10 T2 मया (for वने) G1 M2 सार्धं (for वस्तु) Ñ1 महारण्य, Ñ2 V B D7 वने न्यस्त· (for वने वस्तु) —^{b}) D5 8–10 T2 वने (for मया) G1 M2 वस्तुम् (for सार्धम्) Ñ1 B4 (second time) मया सह इ(B4 त)तो गत , Ñ2 V B D7 प्रतिज्ञापारगामिना —After 8^{ab}, B4 ins 107* and then repeats 8^{ab} as in Ñ1 —V1 illeg from भार्यया in ^{c} up to मग्न in l 1 of 110* —^{c}) B4 D5 8–10 महाभाग, G(ed) विशालाक्ष्या (for महातेजा) —Ñ1 om (hapl) 8^{de} —^{d}) B1 चागत (for [अ]नुगतो) Ś1 Ñ2 V2 3 B D1 2 4 7 12 13 स्वय (for वशी) —^{e}) Ś1 D1 2 4 12 13 निशाक्षये, Ñ2 V3 B1–3 D7 दिनक्षयात् (for दिनक्षये) B4 दिनक्षयाद्रामचद्र —^{f}) D1 प्रभयैव च (h1 pm) (for प्रभयेव) —After 8, Ñ2 V B D7 ins

110* पिता चास्य महाराजो मग्न शोकमहार्णवे ।
सुखार्हं स गत स्वर्गं सर्वलोकहितात्मन ।

[V1 illeg up to मग्न in l 1 —(l 1) Ñ2 D7 [अ]पि (for च) —(l 2) Ñ2 D7 सुखार्हस्य (for सुखार्हं स) V2 -हिते रत (for -हितात्मन)]

9 ^{b}) D2 4 13 इहा(D4 °वा)गत (for उपागत) —Ś1 D2 4 12 13 om 9^{cd} —^{c}) Ñ1 अकृतज्ञ कृतज्ञस्य, D1 कृतज्ञश्च बहुज्ञश्च —^{d}) D1 वीर्यवान (for नामत) —For 9, Ñ2 V B D7 subst

111* भ्रातर लक्ष्मण नाम मा च विद्धि प्लवगम ।
यवीयासममुष्य त्व गुणैर्दासत्वमागतम् ।

[(l 1) V3 चास्य (for नाम) V1 विद्धि मा च (by transp) —V1 mostly illeg for l 2 —(l 2) B2 वरीयासम् (for यवीयासम) Ñ2 V3 D7 अनुप्राप्त (for अमुष्य त्व) V2 आगत (for आगतम्) D7 गुणैर्दास्यमुपागत (for the post half)]

10 Ñ2 V B D7 om 10^{ab} —^{a}) Ś1 Ñ1 D1 2 4 12 13 मानार्हस्य सुखार्हस्य —^{b}) Ś1 Ñ1 D1 2 4 12 13 -लोक (for -भूत) —^{c}) V3 सर्वैश्वर्य- (for ऐश्वर्येण) Ś1 Ñ1 D1 2 4 12 13 वियु(Ñ1 °मु)क्तस्य, T1 3 G2 M3 च हीनस्य (for विहीनस्य) —^{d}) D7 -[आ]श्रितेन (for [आ]श्रितस्य) Ś1 Ñ1 D1 2 4 12 13 वने(Ś1 D12 °न) च परिलवत (Ś1 °भत , Ñ1 °भन) D5 8–10 वनवासे रतस्य च —After 10, Ś1 Ñ1 D1 2 4 12 13 ins

112* शोकसागरमध्यस्थ भ्रातर मे सुखोचितम् ।
मातर चिन्तयानस्य दु खिता दु खभागिनीम् ।

[(l 2) Ś1 भ्रातर, D12 om (for मातर) D2 चिंतमानस्य Ś1 Ñ1 D12 13 दु खितो (for °ता) Ś1 D12 दु खभागिन]

G 4 3 13
B 4 4 14
L 4 3 12

रक्षसापहृता भार्या रहिते कामरूपिणा ।
तच्च न ज्ञायते रक्षः पत्नी येनास्य सा हृता ॥ ११
दनुर्नाम श्रियः पुत्रः शापाद्राक्षसतां गतः ।
आख्यातस्तेन सुग्रीवः समर्थो वानराधिपः ॥ १२
स ज्ञास्यति महावीर्यस्तव भार्यापहारिणम् ।
एवमुक्त्वा दनुः स्वर्गं भ्राजमानो गतः सुखम् ॥ १३
एतत्ते सर्वमाख्यातं याथातथ्येन पृच्छतः ।
अहं चैव हि रामश्च सुग्रीवं शरणं गतौ ॥ १४
एष दत्त्वा च वित्तानि प्राप्य चानुत्तमं यशः ।
लोकनाथः पुरा भूत्वा सुग्रीवं नाथमिच्छति ॥ १५
शोकाभिभूते रामे तु शोकार्ते शरणं गते ।
कर्तुमर्हति सुग्रीवः प्रसादं सह यूथपैः ॥ १६

---

11 [b]) Ñ2 V B D7 छलेनास्य महाद्युते —[c]) Ś1 D1 2 4 12 13 न च विज्ञायते, Ñ1 न तद्विज्ञायते, Ñ2 D7 तत्तु न ज्ञायते, V1 स तु न ज्ञायते, V2 3 न तत्सज्ञायते, B1-3 न च तज्ज्ञायते (for तच्च न ज्ञायते) —[d]) M2 reads येनास्य in marg *sec m* D5 8 10 वा, D9 च (for सा) V1 ' 1 ✱ हृता प्रिया (illeg)

12 [a]) D5 6 8–10 T1 G1 M1 Cg ह्निते (for श्रिय) —[b]) G3 शापाद्रक्षोवपुर्गत , M1 य शापाद्राक्षसोभवत —[c]) Ś1 Ñ V B D1 2 4 7 12 13 सुग्रीवस्तेन चाख्यात —[d]) G2 सामात्यो (for समर्थो) T1 M1 3 वानरर्षभ

13 [a]) V2 D13 सज्ञास्यति, B4 आख्यास्यति (for स ज्ञास्यति) D6 महावीरस —[c]) Ñ1 D6 तत., V3 गत (for दनु) —[d]) D5 8 10 Ct दिव गत (for गत सुखम्) Ś1 D2 4 12 13 गतो व सहसाद्भुत, Ñ1 अगमत्सहसाद्भुत, Ñ2 V B D7 गतो (V3 सर्व)द्युतिमता वर , D1 गतो व राक्षसो द्रुत

14 [a]) B2 4 एव (for एतत्) V2 3 एतत्तन्न समाख्यात, B1 3 एव च व समाख्यात —[b]) Ś1 D2 4 13 T2 यथातत्त्वेन, Cg as in text (for याथातथ्येन) —Ñ2 V2 B1 3 D7 om 14[cd] —[c]) G3 [अ]य (for [ए]व) D5 8–10 G3 च (for हि) Ś1 Ñ1 V1 3 B2 4 D1 2 4 12 13 च(Ñ1 [ए]व) मे भ्राता (for हि रामश्च) —[d]) V1 3 B2 4 गुरुस्ते(B4 °श्च) (for सुग्रीव) Ś1 D12 गुरु स्वशरणागतौ, Ñ1 D1 गुरश्च शरणागतौ, D2 4 13 द्वय च शरणागतौ —After 14, V1 3 B2 4 ins l 1–6 of 115*

15 [a]) Ñ2 V B D7 सोय दत्त्वा बहु द्रव्य —For 15[ab], Ś1 Ñ1 D1 2 4 12 13 subst

113* प्राप्य चानुत्तमामृद्धि दत्त्वा वित्त च शाश्वतम् ।

[Ñ1 कीर्ति, D1 सिद्धि, D13 वृत्ति (for ऋद्धि)]

—[c]) Ś1 Ñ1 D2 4 12 13 सुहृदांत (for पुरा भूत्वा) —[d]) Ñ1 मित्रम् , D2 स्वाद्यम् (for नाथम्) —After 15, Ś1 D12 ins

114* सर्वलोकशरण्यो मा शरण चाभिकाङ्क्षति ।

[D12 [S]र्मां (for मा) and शरण्य (for शरण)],

while D5 6 8 10 S ins after 15, Ñ1 D1 2 4 13 ins l 3–6 only after 15, V1 3 B2 4 ins l 1–6 only after 14, D9 ins l 1–2 only after 15

115* पिता यस्य पुरा ह्यासीच्छरण्यो धर्मवत्सल ।
तस्य पुत्र शरण्यस्य सुग्रीव शरण गत ।
सर्वलोकस्य धर्मात्मा शरण्य शरण पुरा ।
गुरुर्मे राघव सोऽय सुग्रीव शरण गत ।
यस्य प्रसादे सतत प्रसीदेयुरिमा प्रजा ।
स रामो वानरेन्द्रस्य प्रसादमभिकाङ्क्षते ।
येन सर्वगुणोपेता पृथिव्या सर्वपार्थिवा ।
मानिता सतत राज्ञा सदा दशरथेन वै ।
तस्याय पूर्वज पुत्रस्त्रिषु लोकेषु विश्रुत ।
सुग्रीव वानरेन्द्र तु राम शरणमागत ।

[V1 3 B2 4 transp lines 1–2 and l 3–4 —(l 1) D5 6 8 9 T2 सीता (for पिता) B2 G2 यस्य (for यस्य) D5 6 8 9 T2 स्नुषा (for पुरा) D5 6 8–10 T2 च (for हि) B2 भक्तवत्सल (for धर्म°) —(l 2) D8 G1 M3 Cg शरण्यश्च, G2 M1 शरण्य सन् (for शरण्यस्य) D5 शरणागत (for शरण गत) —(l 3) V1 B2 शरण्य (for शरण्य) Ñ1 शरण सदा, V1 3 B2 शरणार्थिना, B4 शरण गत , D1 2 4 13 शरण्य(D2 13 °ण) सदा (for शरण पुरा) —(l 4) V1 3 B2 4 श्रीमान् (for सोऽय) D1 नाथमिच्छति (for शरण गत) —After l 4, D1 ins

115(A)* कोशलानामय नाथो नाथ सर्वधनुष्मताम् ।
लोकनाथ पुरा भूत्वा सुग्रीव नाथमिच्छति ।
कर्तुमर्हति सुग्रीव प्रसाद तस्य धीमत ।

[For l 2 and 3, cf 15[cd] and 16[cd] respy],

while K(ed) in brackets ins after l 4

115(B)* इक्ष्वाकूणा कुले जातो रामो दशरथात्मज ।
धर्मे निगदितश्चैव पितृनिर्देशपालक ।
तस्यास्य वसतोऽरण्ये नियतस्य महात्मन ।
रावणेन हृता भार्या सुग्रीव शरण गत ।

—B2 reads l 5–6 in marg —(l 5) Ñ1 V1 3 (V1 damaged after प्रसादेन) B2 4 D1 2 4 13 प्रसादेन प्रसीदेयु प्रजा यस्य महात्मन —(l 6) V1 3 B2 4 वानरपते (for वानरेन्द्रस्य) V1 3 B2 4 अभिवाछति, D1 2 4 13 अभिकाक्षति (for अभिकाङ्क्षते) —After l 6, D4 ins

115(C)* श्रुत कृतज्ञो मतिमान्गुरुर्मम रघूत्तम ।]

16 D9 om 16–21 —[a]) Ñ2 V B D7 चिंताभिभूते (for शोका°). —[b]) Ś1 D12 स्त्रीकृते, Ñ V B D1 2 4 7 13 स्त्रीहेतो , G2 कामार्ते (for शोकार्ते) M2 शरणागते —[c])

एवं ब्रुवाणं सौमित्रिं करुणं साश्रुपातनम् ।
हनूमान्प्रत्युवाचेदं वाक्यं वाक्यविशारदः ॥ १७
ईदृशा बुद्धिसम्पन्ना जितक्रोधा जितेन्द्रियाः ।
द्रष्टव्या वानरेन्द्रेण दिष्ट्या दर्शनमागताः ॥ १८
स हि राज्याच्च विभ्रष्टः कृतवैरश्च वालिना ।
हृतदारो वने त्रस्तो भ्रात्रा विनिकृतो भृशम् ॥ १९
करिष्यति स साहाय्यं युवयोर्भास्करात्मजः ।
सुग्रीवः सह चास्माभिः सीतायाः परिमार्गणे ॥ २०
इत्येवमुक्त्वा हनुमाञ्श्लक्ष्णं मधुरया गिरा ।
बभाषे सोऽभिगच्छामः सुग्रीवमिति राघवम् ॥ २१
एवं ब्रुवाणं धर्मात्मा हनूमन्तं स लक्ष्मणः ।
प्रतिपूज्य यथान्यायमिदं प्रोवाच राघवम् ॥ २२
कपिः कथयते हृष्टो यथायं मारुतात्मजः ।
कृत्यवान्सोऽपि संप्राप्तः कृतकृत्योऽसि राघव ॥ २३ C 4 3 25 B 4 4 31 L 4 3 25

G3 अर्हतु (for अर्हति) —^{d}) Ś1 Ñ1 D1 2 4 12 13 कारुण्य, Ñ2 V B D7 साहाय्य(B4 °य) (for प्रसाद) B4 तस्य भूपते , T1 3 G3 हरियूथपै , G2 M1 3 हरियूथप

17 D9 om 17 (cf v l 16) V3 illeg from ण साश्रुपातनम् in ^{b} up to 4 7 —^{b}) D1 कारण्य (for करुण) Ś1 Ñ1 D1 2 4 12 13 साश्रुपाति(Ś1 °क्लि, D12 °णि)न, Ñ2 V1 2 B D6 7 M3 Cg साश्रुलोचन, D5 साश्रुवादिन, M1 समुपागत, L(ed) शस्त्रपाणिन Ck t as in text (for साश्रुपातनम्) —After 17^{ab}, B2 ins

116* सम्प्रदाय महद्राज्य प्राप्य चानुत्तम यश ।
प्रसादेन प्रसादेभ्य पुरा यस्य महात्मन ।
स रामो वानरेन्द्रस्य प्रसाद चाभिकाङ्क्षति ।

—^{c}) D1 6 M3 हनुमान् (for हनूमान) —^{d}) Ś1 Ñ1 D1 4 12 लक्ष्मणाभिमुख स्थित , Ñ2 V1 2 B D7 सुग्रीवमभियामहे, D2 13 लक्ष्मणाभि(D13 °य)मुखाग्रत

18 D9 om 18 (cf v l 16) —^{a}) Ś1 Ñ1 D1 2 4 12 13 त्वद्विधा, V2 त्वादृशा (for ईदृशा) —^{b}) Ś1 D1 2 4 12 13 जितात्मानो (for जितक्रोधा) —For 18^{cd}, Ś1 Ñ V1 2 B D1 2 4 7 12 13 subst

117* नरा कृतोपकारास्तु वसुधा पालयन्ति ते ।

[Ñ1 शूरा (for नरा) Ś1 Ñ1 D1 2 12 13 कृतोपकाराणा, B2 परोपकारास्तु, D4 कृतोपकरणा G(ed) मत्सोपकारास्तु (for कृतोपकारास्तु) Ś1 Ñ1 V1 D1 2 4 12 13 विस(D2 °स्तृ)जेयुर्महीमपि (Ś1 D12 °पति, L[ed] °मिमा) (for the post half)]

—After 18, Ś1 Ñ V1 2 B D1 2 4 7 12 13 G2 M1 read 21

19 D9 om 19 (cf v l 16) —^{a}) Ñ1 सोपि, G3 हरि (for स हि) Ś1 Ñ1 D1 2 4 12 13 राज्यपरिभ्रष्ट , Ñ2 V2 B D7 T1 3 M3 राज्यात्परिभ्रष्ट (for राज्याच्च वि°) —^{b}) Ñ2 D7 वालिना कृतविग्रह —^{c}) Ś1 वन-, L(ed) [भ]वरस (for वने) Ñ2 V2 B D7 तस्थौ, D11 [S]वात्सीद्, M3 त्यक्तो (for त्रस्तो) —^{d}) Ñ2 भ्रातरि, V1 2 B1-3 भ्रात्रा च (for भ्रात्रा वि) Ś1 Ñ1 D1 2 4 12 13 भ्रात्रा निर्वासितो वन(Ñ1 बलात्)

20 D9 om 20 (cf v l 16) —^{b}) Ś1 Ñ1 D1 2,4 12 13 रामस्य करुणात्मन , Ñ2 V1 2 B रामस्य तव चेष्टि (V2 B4 °प्सि)त; D7 रामस्य च तवेप्सित —^{c}) Ś1 Ñ1 D1 12 सह युष्माभि , Ñ2 V1 2 B D7 सहितोस्माभिर् , M1 सह सोस्माभि (for सह चास्माभि) —^{d}) Ñ2 V1 2 B D7 वैदेह्या (for सीतायाः) V1 2 B2 4 परिमार्गण Ś1 Ñ1 D12 स्थित्वा सर्वां(Ñ1 चान्वकृत्स्न [sic]) महीमिमा, D1 त्यक्त्वा कृत्स्ना महीमिमा, D2 4 13 स्थि(D4 चि)त्वा कृत्स्ना(D13 °त्स्न) महीमपि

21 D9 om 21 (cf v l 16) Ś1 Ñ V1 2 B D1 2 4 7 12 13 G2 M1 read 21 after 18 —^{b}) Ś1 D1 2 4 12 13 लक्ष्मण मधुराक्षर, Ñ1 लक्ष्मण हेतुमद्वच —^{c}) Ñ1 D8 10 साधु गच्छाम , Ñ2 V1 2 B1-3 D7 [S]भि(V2 °वि) गच्छाम , B4 G2 चाभि°, D5 सोपि गच्छाम , D6 सोभिगच्छाव , G2 ह्यभि°, G3 सोपि सुग्रीव, M3 K(ed) सोभिगच्छेम (for सोऽभिगच्छाम) Ś1 D1 2 4 12 13 अब्रवीत्साम्य गच्छाम —^{d}) Ś1 इव (for इति) Ñ1 लक्ष्मण (for राघवम्) Ñ2 V1 2 B D7 सुग्रीवो यत्र वानर (V2 तिष्ठति), G3 गच्छाम इति राघव ✿ Cv इत्येवमुक्त्वेत्यादिश्लोक सीताया परिमार्गण इत्यत पर द्रष्टव्य पूर्वत्र तु लेखकप्रमादात्पर्यस्त ।, Cr : दिष्ट्या दर्शनमागता इत्यनन्तर पठ्यमान इत्येवमुक्त्वेति श्लोक सीताया परिमार्गण इत्यस्यानन्तर द्रष्टव्य पूर्वत्र तु लेखकप्रमादात्पर्यस्त ✿

22 ^{ab}) D5 8-10 T2 ब्रुवत (for ब्रुवाण) D6 धर्मज्ञ (for धर्मात्मा) D2 4 9 13 M3 हनुमत (for हनू°) T3 G2 सलक्ष्मण Ñ2 V1 2 B D7 एव ब्रुवति तस्मिंस्तु वानरे पवनात्मजे —^{c}) B1-3 प्रतिगृह्य (for °पूज्य) Ś1 D2 4 12 13 च तद्वाक्यम् , Ñ1 B1-3 D1 ततो वाक्यम् , Ñ2 V1 2 B4 D7 ततो रामम् (for यथान्यायम्) —^{d}) Ñ2 V1 2 B D7 लक्ष्मण , T3 G2 राघव (for राघवम्)

23 ^{ab}) D13 प्रथमतो (for कथयते) Ñ2 V1 2 B D7 कपिर्यथा समाचष्ट(V2 B4 D7 °ष्टे) हृष्टोय मारुता(Ñ2 D7 पवना)त्मज —B1 om (hapl) 23^{c}-24 —^{c}) D1 4 कृतवान् Ś1 D2 12 अस्ति, Ñ1 D1 सौम्य, D4 13 असि (for सोऽपि) Ś1 Ñ V1 2 B2-4 D1 2 4 7 12 13 सुग्रीव (for सप्राप्त) —^{d}) Ś1 D2 4 12 13 कृतकार्यो भविष्यति(D4 12 °सि), Ñ1 D1 कृतकार्योसि राघव, Ñ2 V1 2 B2 4 D7 कृतकृत्यास्तथा वय

G 4 3 26
B 4 4 32
L 4 3 26

प्रसन्नमुखवर्णश्च व्यक्तं हृष्टश्च भाषते ।
नानृतं वक्ष्यते वीरो हनूमान्मारुतात्मजः ॥ २४

ततः स तु महाप्राज्ञो हनूमान्मारुतात्मजः ।
जगामादाय तौ वीरौ हरिराजाय राघवौ ॥ २५

स तु विपुलयशाः कपिप्रवीरः
पवनसुतः कृतकृत्यवत्प्रहृष्टः ।
गिरिवरमुरुविक्रमः प्रयातः
स शुभमतिः सह रामलक्ष्मणाभ्याम् ॥ २६

इति श्रीरामायणे किष्किन्धाकाण्डे चतुर्थः सर्गः ॥ ४ ॥

---

24 B1 om 24 (cf v l 23) —^{a}) B2 (marg also) -चन्द्रो, G3 -वर्णं (for -वर्णश्) Ñ1 [ऽ]सौ, Ñ2 V1 2 B2-4 D- [ऽ]य, D1 तु (for च) —^{b}) D1 हृष्ट (for हृष्टश्) Ñ1 युक्त हृद्य (for व्यक्त हृष्टश्) D13 प्रभाषते (for च भा°) —^{c}) Ñ1 भाषते, V2 लक्ष्यते (for वक्ष्यते) —^{d}) D4 6 8 9 12 13 M3 हनुमान् (for हनू°) Ñ1 पवनात्मज, G(ed) हरिपुंगव (for मारुतात्मज) —After 24, Ś1 ins

118* कपि कथयते हृष्टो यथाय त्वत्समक्षत ।,

while B3 4 ins

119* तथा तु वदत श्रुत्वा लक्ष्मणश्च महात्मन ।
अब्रवील्लवग रामो दृश्यतां प्लवगेश्वर ।

[(l 1) B4 लक्ष्मणस्य]

—After 24, G2 ins 121*

25 D4 reads 25 twice G2 om (hapl) 25^{ab} —^{a}) Ś1 B2-4 D1 2 4 5 8-10 12 13 स सुमहाप्रा(D13 °न्प्रा)ज्ञो Ñ1 तु सुमहाप्राज्ञो D6 T2 तु स महाप्राज्ञो, G3 स ... (damaged) (for स तु महाप्राज्ञो) Ñ2 V1 2 B1 D7 इति ब्रुवाण(Ñ2 D- °णे) धर्मज्ञ(Ñ2 D7 °ज्ञे, V1 °ज्ञो) —^{b}) Ñ2 V1 2 B1 लक्ष्मण, D1 4(both times) 6 9 13 M3 हनुमान्, D7 लक्ष्मणे (for हनू°) Ś1 D1 2 4(both times) 12 13 हरिपुंगव, B2-4 इदमब्रवीत् (for मारुतात्मज) —After 25^{ab}, B2-4 ins

120* स्व रूपमभिसंप्राप्य सहृष्टो हेमपिङ्गल ।
आरुह्यता नृपश्रेष्ठ मम पृष्ठमरिंदम ।
लक्ष्मणेन सह भ्रात्रा सुग्रीव द्रष्टुमर्हसि ।
इति ब्रुवाणो धर्मज्ञ लक्ष्मण मारुतात्मज ।

[(l 1) B4 प्रहृष्टो (for सहृष्टो) —(l 2) B4 नरश्रेष्ठ (for नृप°) —(l 3) B3 अर्हति (for अर्हसि) —B2 om l 4 —(l 4) B3 ब्रुवाण (for °णो) G(ed) एवमुक्त्वा महाकायो हनूमान्पवनात्मज]

—^{c}) G2 M1 कपि (for हरि-) Ś1 Ñ V1 2 B D1 2 4 (second time) 7 12 13 सुग्रीवो यत्र वानर, D4 (first time) हनूमान्मारुतात्मज —After 25, D5 6 8-10 T G1 3 M2 3 Cv r ins, G2 ins after 24, M1 ins l 1 after 25^{ab} and l 2 after 25^{cd}

121* भिक्षुरूप परित्यज्य वानर रूपमास्थित ।
पृष्ठमारोप्य तौ वीरौ जगाम कपिकुञ्जर ।

26 G(ed) om 26 —^{a}) Ck हि (for तु) B2 (marg also) 4 विमलयशा (for विपुल°) —^{b}) Ś1 Ñ1 D1 2 4 12 13 G2 3 M1 कृतकृत्यवान्, M2 परिगृह्य तौ, Ck कृतकृत्ययुक् (for कृतकृत्यवत्) —^{d}) T1 G1 M2 3 सुशुभमति (for स शुभमति) —For 26^{cd}, Ś1 Ñ V1 2 B D1 2 4 7 12 13 subst

122* मलयगिरिवरात्तमृष्यमूक
पुरुषवरौ प्रतिगृह्य संप्रतस्थे ।

[(l 1) Ś1 Ñ1 V2 D1, 2 4 12 13 -गिरिवर (for -गिरिवरात्). V2 मलयगिरिवन D2 om तम् Ś1 Ñ1 V2 D1 2 4 12 13 ऋष्यमूकात् (for °क).]

—For Sarga 4, D3 11 subst

123* अस्माकं च यथावृत्त चरित भ्रातृवत्सल ।
राज्यभ्रंश च शोक च कथयस्व हनूमते ।
कृत्यवन्तौ यथा चावा सुग्रीवेणामितौजसा ।
एतत्सर्वं यथातत्त्व शंसस्व रघुनन्दन ।
एवमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत् ।
सचिव कपिराजस्य सुग्रीवस्य महात्मन ।
(cf 6) राजा दशरथो नाम द्युतिमान्धर्मवत्सल ।
तस्यायमग्रज पुत्रो रामो नाम महायशा ।
अनुजस्त्वहमप्यस्य लक्ष्मणो नाम नामत ।
भरतश्च महाबाहु शत्रुघ्नश्च ममानुज ।
त्रिस्रोऽस्माक कपिश्रेष्ठ मातरो नृपसंमता ।
राममाता च कौसल्या सुमित्रा जननी मम ।
कैकेयी भरतस्यापि जननी पापनिश्चया ।
पित्राभिषेके रामस्य राज्यहेतो समुद्यते ।
कैकेयी निरनुक्रोशा न्यवारयत त नृपम् ।
तेन दत्तो वरस्तस्यै रामप्रव्राजनाय वै ।
वने वसतु रामोऽयं नव वर्षाणि पञ्च च ।
अथ पित्राप्यनुज्ञात प्रययौ दण्डक वनम् ।
व्रजन्त च वन राममहमप्यनुजग्मिवान् ।
सीताप्यनुययौ साध्वी रामपत्नी यशस्विनी ।
राम कमलपत्राक्ष छायेवानुगता सदा ।
वसतस्तु जनस्थाने राघवस्य महात्मन ।
(cf 11^{ab}) रक्षसापहृता सीता वञ्चयित्वा महाभुजम् ।

मायया राक्षसेन्द्रेण रावणेन दुरात्मना ।
आवाभ्या रहिता साध्वी शोकसंविग्नमानसा ।
क्रोशन्ती राम रामेति लक्ष्मणेति च भामिनी ।
ह्रियमाणा तु ता दृष्ट्वा गृध्रराजो महाबल ।
रुरोध मार्गं तस्याथ रावणस्य दुरात्मन ।
तत्र युद्ध महच्चासीद्वने राक्षसगृध्रयो ।
हत्वा जटायुष तेन हृता सीता विहायसा ।
आवा हृताया सीताया मार्गमाणौ वने तदा ।
दृष्टवन्तौ तु त गृध्र सजीव धरणीतले ।
कथिता तेन न सीता रावणेन हृता किल ।
म्रियमाणेन तेनैव नान्यत्किचिदुदाहृतम् ।
अग्निना त तु सस्कृत्य गृध्र विगतजीवितम् ।
(cf 12) मार्गमाणौ वने दृष्ट कबन्धो नाम दानव ।
कथितस्तेन सुग्रीव पम्पा चाप्युपदेशिता ।
सोऽयमभ्यागतो राम काङ्क्षमाणश्च सौहृदम् ।
एतच्छ्रुत्वा वचस्तस्य हनूमाल्लक्ष्मणस्य तु ।
(cf 1^{cd}) जगाम यत्र सुग्रीवो जवेनैव स वानर ।
(cf 2^{ab}) भावरूपागमास्तस्य न्यवेदयत सत्वरम् ।
सप्रहृष्टमना सोऽथ सुग्रीव कपिमब्रवीत् ।
हनुमन्नानयाशु त्व राम लक्ष्मणमेव च ।
सहाय मार्गमाण च स्वामिन शरण तथा ।
त्वरा गुणवती युक्ता ह्यस्मिन्काले विशेषत ।
गच्छस्व निपुण पश्य हनूमन्बुद्धिमानसि ।
क्षेम भवति वै पश्चात्सुपरीक्षितकारिणाम् ।
(cf 1^{ab}) एवमुक्तस्तु हनूमानाजगाम पुनर्वली ।
(cf 3) सकाश रघुवीरस्य सप्रहृष्टतनूरुह ।
उवाच च तदा राम हनुमान्वाक्यकोविद ।
(cf 4) किमर्थं त्व वन घोर मृगव्यालनिषेवितम् ।
आगत सानुजो दुर्गं कथयस्व पुनर्मम ।
(cf 5) तस्य तद्वचन श्रुत्वा लक्ष्मणो रामचोदित ।
पुन प्रोवाच यद्वृत्त तथागमनकारणम् ।
(cf 10) रामस्य राज्यभ्रष्टस्य सुखार्हस्य च श्रीमत ।
ऐश्वर्येण विहीनस्य वनवासाश्रितस्य च ।
रावणेन हृता सीता तस्माच्छरणमागत ।
पातयेद्गगनान्मेघान्योऽय बाणैरजिह्मगै ।
स रामो वानरेन्द्रस्य प्रसादमभिकाङ्क्षति ।
(=15) एष दत्त्वा च वित्तानि प्राप्य चानुत्तम यश ।
लोकनाथ पुरा भूत्वा सुग्रीव नाथमिच्छति ।
पुरा चास्य पिता ह्यासीच्छरण्यो धर्मवत्सल ।
तस्य पुत्र शरण्यश्च सुग्रीव शरण गत ।
(cf 16) चिन्ताभिभूते रामे तु शोकार्ते शरणागते ।
कर्तुमर्हति सुग्रीव साहाय्य सचिवै सह ।
(cf 17) एव ब्रुवाण सौमित्रि करुण साश्रुलोचनम् ।
हनुमान्प्रत्युवाचेद मधुर मधुरस्वर ।
(cf 18^{ab}) ईदृशान्वीर्यसम्पन्नाञ्जितक्रोधाञ्जितेन्द्रियान् ।
महाबलानस्त्रविद सहायान्को हि नेच्छति ।
(cf 19) सोऽपि राज्यात्परिभ्रष्ट कृतवैरश्च वालिना ।
हृतदारो वने वासी भ्रात्रा विनिकृत भृशम् ।
(cf 20) करिष्यति स साहाय्य तव रामस्य च प्रियम् ।
सुग्रीव सहितोऽस्माभि सीताया परिमार्गणे ।
एव ब्रुवाणे धर्मज्ञे वानरे मारुतात्मजे ।
अब्रवील्लक्ष्मण रामो दृश्यता प्लवगेश्वर ।
(cf 25) ततस्तु सुमहाप्राज्ञो हनुमान्मारुतात्मज ।
जगामादाय तौ वीरौ भ्रातरौ रामलक्ष्मणौ ।
(=26) स तु विपुलयशा कपिप्रवीर
पवनसुत कृतकृत्यवत्प्रहृष्ट ।
गिरिवरमुरुविक्रम प्रयात
स्वभुजबलात्सह रामलक्ष्मणाभ्याम् ।

[D11 variants om l 8 —After the prior half of l 9, it ins

123(A)* गुणदास्यमुपागत ।
धर्मज्ञस्य कृतज्ञस्य

—(l 11) नृपश्रेष्ठ (for कपिश्रेष्ठ) —(l 18) [अ]भि- (for [अ]पि) —(l 20) राम (for साध्वी) —(l 21) सती (for सदा) —(l 23) भार्या (for सीता) —(l 29) आसी-त्तत्र महद्युद्ध तयो राक्षसगृध्रयो —(l 33) वा (for न) —(l 36) मार्गमाणेऽ —(l 37) पथा च न्युपदेशित (for the post half) —(l 43) हनूमन् here and below —(l 44) मम नाथ (for मार्गमाण) —(l 49) रामचन्द्रस्य (for रघुवीरस्य) —(l 50) [अ]वनतो (for च तदा) —(l 53) नोदित (for -चोदित) —(l 54) यच्च (for तथा) —(l 55) राज्यभ्रष्टस्य वीरस्य (for the prior half) —D8 reads l. 57–58 in marg —(l 60) वा (for च) —(l 65) कर्तुमर्हसि सुग्रीव —(l 66) करुण सौमित्रि (by transp) चाश्रु (for साश्रु) —(l 71) [s]वात्सीद् (for वासी) —(l. 76) स तत (for ततस्तु) —(l 79) प्रवीर (for प्रहृष्ट)]

Colophon —*Sarga name* Ś1 D2 5 12 13 लक्ष्मणवाक्य, Ñ1 सुग्रीवसमागमो, Ñ2 सुग्रीवस्थानगमन, V1 B4 हनुमद्वाक्य, V2 3 B1–3 हनुमद्दर्शन, D1 पपातीरे लक्ष्मणवाक्य, D8 11 रामागमनो नाम —*Sarga no* (figures, words or both) Ś1 Ñ1 V1 B1 D2 4 12 om, Ñ2 V2 3 B2-4 D1 7 13 3, D8 11 2 —After colophon, G concludes with श्रीरामाय नम

५

G 1 1 1
B 4 5 1
L 4 1 1

ऋश्यमूकात्तु हनुमान्गत्वा तं मलयं गिरिम् ।
आचचक्षे तदा वीरौ कपिराजाय राघवौ ॥ १
अयं रामो महाप्राज्ञः संप्राप्तो दृढविक्रमः ।
लक्ष्मणेन सह भ्रात्रा रामोऽयं सत्यविक्रमः ॥ २
इक्ष्वाकूणां कुले जातो रामो दशरथात्मजः ।
धर्मे निगदितश्चैव पितुर्निर्देशपालकः ॥ ३
तस्यास्य वसतोऽरण्ये नियतस्य महात्मनः ।
रक्षसापहृता भार्या स त्वां शरणमागतः ॥ ४
राजसूयाश्वमेधैश्च वह्निर्येनाभितर्पितः ।
दक्षिणाश्च तथोत्सृष्टा गावः शतसहस्रशः ॥ ५
तपसा सत्यवाक्येन वसुधा येन पालिता ।
स्त्रीहेतोस्तस्य पुत्रोऽयं रामस्त्वां शरणं गतः ॥ ६

5

☞ V3 illeg for Sarga 5 (cf v l 4 4 17) M1 begins with श्रीरामाय नम

1 a) Ñ2 V1 2 B D7 11 13 ऋश्यमूक Ś1 D12 हनूमांस्तु, Ñ2 V1 समागम्य, V2 B D3 7 11 समासाद्य (for तु हनुमान्) —b) Ś1 Ñ1 D1 2 4 12 13 ग(Ś1 नी)त्वा मलयपर्वत, Ñ2 V B1-3 D7 हनूमान्पर्वतोत्तम, B4 D7 11 हनुमान्मारुतात्मज —c) D6 महा- (for तदा) Ś1 Ñ1 B4 D1-4 11-13 आचष्ट भ्रातरौ वीरौ, Ñ2 V1 2 B1-3 D7 कथयामास तौ वीरौ —d) T2 G1 3 M2 हरि (for कपि-) Ś1 Ñ V1 2 B D1-4 7 11-13 सुग्रीवाय महात्मने ❀ Ck ऋश्यमूकादित्यादि। ऋश्यमूके सुग्रीवस्य यथास्थाने रामलक्ष्मणौ स्थापयित्वा तस्मात् सुग्रीवानयनार्थं मलयगिरिमित्यर्थ । उक्त एव विशेषस्तुशब्दद्योत्यः। अग्रे आख्यातो वायुपुत्रेणेत्युक्त्या तथा निवेदनपूर्वमेव प्रापणीयत्वात् ❀

2 a) Ñ2 V1 2 B D7 महाबाहुर् (B4 °हो), D1 महात्मा च, D5 8 10 12 महाप्राज्ञ (for °प्राज्ञ) —b) Ñ2 V1 2 B1-3 D7 धीमान्दशरथात्मज, B4 दीर्घबाहुर्जितेंद्रिय, D3 11 श्रीमान्सत्यपराक्रम —d) Ś1 Ñ V1 2 B D1-4 7 11-13 शरण त्वामुपागत (D3 °मिहागत) ❀ Cv रामोय सत्यविक्रम इति गुणप्रस्तावार्थं । पूर्वेण भिन्न वाक्यम्। अन्यथाय रामशब्दोऽतिरिच्यते। अय राम इत्यादि पूजनीयतमावित्येतदन्त हनुमद्वाक्यजात रामलक्ष्मणावन्यत्र स्थापयित्वा सुग्रीवाय कथितमिति वेदितव्यम्। अन्यथा स कृत्वा मानुषमित्यादि वा न सघटते।, Cr m g t also comment similarly ❀—After 2, Ñ2 V1 2 B D7 read 5-6, D7 reads 5^{ab}, while G1 reads 6^{c}-7 after 2 repeating 7 in its proper place

3 T2 om 3-6, D1 reads 3-4 after 6^{ab} M2 reads 3-6 *inf lin sec m* —b) Ñ1 रामो नाम महायशा, Ñ2 V1 2 B D7 पित्रा त्येप(B1 °च) महात्मना —D7 om 3^{cd} —cd) Ś1 Ñ1 D1-4 12 13 धर्मज्ञश्च कृतज्ञश्च, D11 वन समागतो घोर, G2 M1 धर्मे च निरतश्चैव (for °) Ś1 Ñ1 D1-5 8-10 12 13 Ck t निर्देशकारक, D11 °कारणात्, T1 3 G1 2 M2 °पारग (for °पालक) Ñ2 V1 2 B D7 नियुक्त सत्यसंधेन वनवासाय राघव

4 T2 om, M2 reads *inf lin sec m* 4 (cf v l 3) D1 reads 3-4 after 6^{ab} D8-10 read 4 after 6 —a) Ñ1 D3 तस्याथ, Ñ2 V1 2 B D7 तत्रास्य (V2 °थ) (for तस्यास्य) Ś1 D2 4 12 13 तु महारण्ये, V2 वसतो वन्ये (for वसतोऽरण्ये) —b) Ś1 Ñ1 D1-4 12 13 निरत (D1 2 13 °न्त)स्य, M2 प्रयतस्य (for नियतस्य) Ñ2 V1 2 B D7 पितुरादेशकारिण —c) Ñ2 V1 2 B D9-10 T1 3 G1 2 M रावणेन हृता (for रक्षसाप°) V1 B1-3 सीता (for भार्या) —d) Ś1 D1-4 12 13 ते (for त्वा) Ñ2 V1 2 B1-3 D7 मायामास्थाय रक्षसा, B4 मायामादाय राक्षसी —After 4, Ś1 D2 4 12 13 ins, while Ñ1 D1 ins after 6

124* सोऽय त्वया महाप्राज्ञ सख्यमिच्छति राघव ।
सह सौमित्रिणा भ्रात्रा लक्ष्मणेन महाद्युति ।

[(l 1) Ś1 D12 अय, Ñ1 सोथ (for सोऽय) Ñ1 महाबाहु; D1 महाप्राज्ञ (for °प्राज्ञ) —(l 2) D1 महात्मना (for °द्युति)],
while Ñ2 V1 2 B D7 ins

125* एवगतोऽय धर्मात्मा पार्श्वं ते समुपागत ।
लक्ष्मणेन सह भ्रात्रा राम सत्यपराक्रम ।

[(l 1) G(ed) भूतोय (for गतोऽय) B4 पार्थिव (for पार्श्वं ते) —(l 2) B4 रामोय सत्यविक्रम (for the post. half)]

5 T2 om, M2 reads *inf lin sec m* 5 (cf. v l 3) Ś1 D2 4 6 12 13 om 5-6 Ñ2 V1 2 B D3 read 5-6 after 2 D6 transp 5 and 6 D7 reads 5^{ab} after 2 —a) Ñ2 V2 B D7 -[अ]श्वमेधाभ्या, D11 °मेधेषु, G1 °मेधेन, M2 °मेधाद्यर् (for °मेधैश्च) —b) Ñ1 [उ]पतर्पित, D11 [अ]ति° (for [अ]भितर्पित) —D7 om 5^{c}-6 —c) D1 11 दक्षिणार्थं (for दक्षिणाश्च) G2 M2 ततो (for तथा) Ñ2 V1 2 B दक्षिणार्थे (B4 °र्थं) दत्तो चापि —d) Ñ2 V1 2 B1-3 यो गा, M1 तृसाश् (for गाव) —For 5^{cd}, Ñ1 D1 subst

126* शत शतसहस्राणा द्विजेभ्यो योऽददाद्वसु ।

[Ñ1 यो द्विजेभ्यो ददा वसु (for the post half).]

6 Ś1 D2 4 6 7 12 13 T2 om, M2 reads *inf. lin. sec. m* 6 (cf v l. 3 and 5) Ñ2 V1 2 B D3 read 5-6

भवता सख्यकामौ तौ भ्रातरौ रामलक्ष्मणौ ।
प्रतिगृह्यार्चयस्वेमौ पूजनीयतमावुभौ ॥ ७

श्रुत्वा हनुमतो वाक्यं सुग्रीवो हृष्टमानसः ।
भयं स राघवाद्घोरं प्रजहौ विगतज्वरः ॥ ८

स कृत्वा मानुषं रूपं सुग्रीवः प्लवगाधिपः ।
दर्शनीयतमो भूत्वा प्रीत्या प्रोवाच राघवम् ॥ ९

भवान्धर्मविनीतश्च विक्रान्तः सर्ववत्सलः ।
आख्याता वायुपुत्रेण तत्त्वतो मे भवद्गुणाः ॥ १०

तन्ममैवैष सत्कारो लाभश्चैवोत्तमः प्रभो ।
यत्त्वमिच्छसि सौहार्दं वानरेण मया सह ॥ ११

रोचते यदि वा सख्यं बाहुरेष प्रसारितः ।
गृह्यतां पाणिना पाणिर्मर्यादा बध्यतां ध्रुवा ॥ १२   G 4 4 13 B 4 5 11 L 4 4 11

after 2 D6 transp 5 and 6 —^{a}) G(ed) धर्मेन (for तपसा) —^{b}) D1 8-10 तेन (for येन) B3 तर्पिता (for पालिता) D3 11 प्रण(D11 °जा)येनाभिपालिता —After 6^{ab}, D1 reads 3-4 —G1 reads 6^{c}–7 after 2 repeating 7 in its proper place —^{c}) Ñ1 D1 स्त्रीहेतो स वन प्राप्तो —^{d}) Ñ1 D1 रामस्ते (for रामस्त्वा) D8-10 रामोरण्य समागत, M2 राम शरणमागत —After 6, Ñ1 D1 ins 124*, while D8-10 read 4

7 G1 repeats 7 here (cf v l 2) —^{a}) D11 सख्य-मिच्छेते (for °कामौ तौ) D8 तव तौ सख्यमिच्छेते —For 7^{ab}, Ñ2 V1 2 B D7 subst

127* भवता रामसौमित्री भ्रातरौ सख्यमिच्छत ।

[V1 B4 भवतो (for °ता) B1 2(also as above) 3 राघवा, B4 कर्तुं तौ (for भ्रातरौ)]

—^{cd}) V2 B1-3 परिगृह्य (for प्रति°) D6 I G1 M2 3 [ए]ता (for [इ]मौ) D6 8-10 प्रगृह्य चार्चयस्वैतौ(D5 °स्वेमौ) (for ^{c}) Ñ2 V1 2 B D7 यथावत्(B4 °र्थं) प्रतिन(V1 °व)द्य च (for ^{d}) D3 11 तौ यथावत्प्रतीच्छस्व पूजनीयौ कपीश्वर ❀ Ct प्रगृह्य दर्शनाकाङ्क्षिणोर्दर्शनं दत्त्वा ❀ —For 7, Ś1 Ñ1 D1 2 4 12 13 subst

128* तौ त्व हरिवरश्रेष्ठ राजपुत्रौ महाबलौ ।
प्रतिनन्दस्व पश्येमौ सत्कारार्हौ च सत्कुरु ।

[(l 1) D2 13 महाबलो (for °बला) —(l 2) Ñ1 प्रतिनन्दय चैवेमौ, D1 प्रतिनद्यार्चयस्वेमौ (for the prior half)]

8 ^{b}) V1 damaged, D6 8-10 वानराधिप (for हृष्ट-मानस) —D8-10 om 8^{c}–9^{b} —^{c}) V1 damaged, D6 M3 च, D11 सु (for स) B4 भय राघवज घोर —^{d}) V2 G1 2 M1 2 विजहौ (for प्रजहौ) B4 क्लम (for -ज्वर) —For 8^{cd}, Ś1 Ñ1 D1 2 4 12 13 subst

129* अथ वालिसमुद्भूत भुक्त माल्यमिवात्यजत् ।

[D2 13 वाति, D4 वारि- (for वालि-) Ñ1 -सभूत (subm) (for समुद्भूत) Ś1 D4 12 भुक्त, Ñ1 छिष्ट (for भुक्त)]

9 D8-10 om 9^{ab} (cf v l 8) —^{a}) Ñ2 B D3 7 11 कृत्वा च (for स कृत्वा) —^{b}) T1 3 M3 प्लवगर्षभ (for °गाधिप) —^{c}) Ñ2 V1 2 B D7 दर्शनीयस्ततो, D11 °तरो (for °तमो) —^{d}) Ñ2 V1 2 B D7 प्रत्युवाच स(V1 B3 च) राघव, D3 11 राघव समुपेयिवान, D5 6 8-10 T2 प्रीत्योवाच च राघव —For 9, Ś1 Ñ1 D1 2 4 12 13 subst, while D3 11 ins after 9

130* उपसृत्य महातेजा राघव रघुनन्दनम् ।
उवाच वचन वीर प्रीतिपूर्वं कृताञ्जलि ।

[(l 1) Ś1 D12 उत्थाय च (for उपसृत्य) Ñ1 रविनदन, D3 11 प्लवगेश्वर (for रघुनन्दनम्) —(l 2) Ś1 D12 प्रीत, D11 वीर (for वीर)]

10 ^{a}) Ś1 D2 12 13 क्षमी, Ñ1 पत्नी- (sic), D1 धन्त्री (for धर्म) Ñ2 D7 तु (for च) —^{b}) D5 8-10 T2 सुतपा, G1 सुप्रीतस्, M1 2 सुप्रियस् (for विक्रान्त) Ś1 D1 2 4 12 13 सत्य(D1 °त्त्व)वान्बली, Ñ2 B1 2(also as in text)-4 D7 साधुवत्सल, V1 धर्मवत्सल, V2 मधुविक्रम, D8 सर्गवत्सल (for सर्ववत्सल) —For 10^{ab}, D3 11 subst

131* भवान्विनीतो विक्रान्तो धर्मज्ञो धर्मवत्सल ।

—^{c}) B1 3 D1 4-7 11 आख्यातो, D2 प्रख्यातो, D9 13 चा(D13 प्र)ख्याता (for आख्याता) —^{d}) V1 2 B1-3 तत्त्वमेते, B4 तत्त्वेनैते, D7 त्वमेते च (for तत्त्वतो मे) D3 11 भवतस्तत्त्वतो गुणा

11 ^{b}) G3 लाभाय (for लाभश्च) Ś1 Ñ1 D1 2 4 12 13 लाभश्चानुत्तमो महान्, Ñ2 V1 2 B D7 लाभश्च(B2 before corr लभस्व) वदता वर, D3 11 लाभश्च परमो विभो —^{c}) D4 यम् (for यत्) Ś1 Ñ1 D1 2 4 12 13 सख्य हि (for सौहार्दं) Ñ2 V1 2 B D7 यदिच्छसि सखित्व त्व(V2 मे), D3 11 यस्त्वमिच्छसि सख्य वै —^{d}) B4 महाशय (for मया सह)

12 ^{a}) D13 रोचये (for °ते) D1 8-10 मे सख्य, D5 सख्य वा (by transp), T2 सख्य हि (for वा सख्य) Ñ2 V1 2 B D7 यदि ते रोचते सख्य, D3 11 इच्छा यदि वयस्यत्वे, Cv r k as in text —^{b}) D3 11 पाणिरेष (for बाहुरेष) —^{c}) Ñ1 गृहाण (for गृह्यता) Ś1 D2 4 12 13 पाणिना गृह्यता पाणिर् —^{d}) Ś1 Ñ1 D1 12 13 ध्रुव, V1 2 B D3 स्थिरा, T2 दृढा (for ध्रुवा) Ñ2 D7 मर्यादा स्थाप्यता स्थिरा, D11 मर्यादासुच्यता स्थिरा (sic) ❀ Ck बाहुरेष प्रसारित इति वचनविश्वासाय केरळवद्दक्षिणो हस्तो दीयत इत्यर्थ ❀

4 4 14 एतत्तु वचनं श्रुत्वा सुग्रीवस्य सुभाषितम् ।
5 12 संप्रहृष्टमना हस्तं पीडयामास पाणिना ।
4 12 हृद्यं सौहृदमालम्ब्य पर्यष्वजत पीडितम् ॥ १३
ततो हनूमान्संत्यज्य भिक्षुरूपमरिंदमः ।
काष्ठयोः स्वेन रूपेण जनयामास पावकम् ॥ १४
दीप्यमानं ततो वह्निं पुष्पैरभ्यर्च्य सत्कृतम् ।
तयोर्मध्ये तु सुप्रीतो निदधे सुसमाहितः ॥ १५
ततोऽग्निं दीप्यमानं तौ चक्रतुश्च प्रदक्षिणम् ।
सुग्रीवो राघवश्चैव वयस्यत्वमुपागतौ ॥ १६
ततः सुप्रीतमनसौ तावुभौ हरिराघवौ ।
अन्योन्यमभिवीक्षन्तौ न तृप्तिमुपजग्मतुः ॥ १७
ततः सर्वार्थविद्वांसं रामं दशरथात्मजम् ।
सुग्रीवः प्राह तेजस्वी वाक्यमेकमनास्तदा ॥ १८

इति श्रीरामायणे किष्किन्धाकाण्डे पञ्चमः सर्गः ॥ ५ ॥

---

13 ^{a}) Ś1 Ñ1 D1 2 4 12 13 एव तु, D11 तदेतद् (for एतत्तु) —^{b}) T1 3 M3 सुग्रीवेण (for °वस्य) D13 प्रभाषित (for सु°) Ñ2 V1 2 B D3 7 11 राम सुग्रीवभाषित —^{c}) V1 2 B4 D5 T1 स(D5 त) प्रहृष्ट (for संप्रहृष्ट-) D3 11 पाणि (for हस्त) —After 13^{cd}, Ñ V1 2 B D1–4 11–13 ins

132* ततो रामस्य सुग्रीव पाणिं जग्राह पाणिना ।
[D3 रामस्यापि च (for ततो रामस्य)]

—D11 om 13^{ef} —^{e}) Ś1 D12 दृढ, Ñ2 V1 2 B1–3 D7 हार्द, D5 8–10 हृष्ट, Cm g as in text (for हृद्य) G1 M2 सौहार्दम् (for सौहृदम्) Ñ1 हृच्छन्न (sic), D3 आस्थाय (for आलम्ब्य) B4 T2 हार्द(T2 हृष्ट) सौहार्दमालम्ब्य —^{f}) Ñ2 V1 2 B D7 परि(Ñ2 °र्य)ष्वज्य च (for पर्यष्वजत) B4 पीडयन् (for पीडितम्) Ś1 Ñ1 D1 2 4 12 13 पीडित चापि सस्वजे, D3 गाढ च परिषस्वजे

14 ^{a}) D6 सत्यक्त्वा (for सत्यज्य) V2 B D3 11 ततोथ(B2 °तोपि, D3 11 °तस्तु) हनु(B2–4 °नू)मास्त्यक्त्वा, G2 M1 हनूमानपि सत्यज्य —^{b}) B4 च तत्क्षणात्, D3 11 महामति (for अरिंदम) —For 14^{ab}, G(ed) subst

133* ततस्तु हनुमान्दृष्ट्वा तयो सवधमीप्सितम् ।

—^{c}) Ś1 Ñ V1 2 B D1–4 7 11–13 स्वेन रूपेण काष्ठाभ्या (Ś1 Ñ1 D1 12 °ष्ठात्तु, D2 13 °ष्ठ वा, D4 °ष्ठ वै, D3 11 काष्ठेभ्यो), G(ed) विधिवत्सोथ काष्ठाभ्या —^{d}) D2 4 13 आ(D4 चा)नयामास (for जनया°) ❀ Ck काष्ठयोररण्योर्मथनेन पावकमानयामास ❀

15 ^{a}) Ś1 D1 2 4 12 13 ज्वा(Ś1 ज्व)लयित्वा (for दीप्यमान) —^{b}) Ñ2 V1 2 B D7 सत्कृत्य (for अभ्यर्च्य) G1 3 सस्कृत, M1 पूजित (for सत्कृतम्) Ś1 D2 4 12 13 पुष्पै सपूज्य यतत (D2 13 सयत), D1 पुष्पै सपूजयत्तत, D3 11 पुष्पै सत्कृत्य सस्कृत —After 15^{ab}, D11 ins

134* प्रहृष्टमनसौ प्रीतौ तदा सुग्रीवराघवौ ।
[Cf 17^{ab}]

—^{c}) T1 3 G3 M3 [अ]थ (for तु) D6 G2 स- (for सु-) —^{d}) D5 8–10 G2 निदधौ, D6 T2 G3 M1 निदध्यौ (for °धे) —For 15^{cd}, Ś1 Ñ1 D1 2 4 12 13 subst

135* तत्रोपन्यस्य सप्रीत सख्यद सत्यसाक्षिकम् ।
[D2 4 12 13 सख्येह (for सख्यद) D2 साक्षिक Ñ1 D1 सत्य(D1 °ख्य) सश्रान्य साक्षिण (for the post half)],

while Ñ2 V1 2 B D3 7 11 subst

136* तत्रोपन्यस्य च प्रीत तयोर्मध्ये समेधितम् ।
[Ñ2 V1 B3 ततो (for तत्र) V2 प्रस्थाप्य (for [उ]पन्यस्य) B2 स- (for च) B4 न्यवेदयत सप्रीत्या, D3 11 तत्रोपस्थापयत्प्रीतस् (for the prior half) D3 11 समाहित (for समेधितम्)]

—Thereafter D3 cont

137* तयोर्मध्ये हुतवहं सत्य ससाध्य साक्षिणम् ।

16 ^{a}) Ś1 Ñ1 D1 12 13 च, D2 6 तु (for तौ) Ñ2 V1 2 B D7 तमग्निं दीप्यमान तु(D7 च), D4 ततो वै दीप्यमान च —^{b}) Ś1 Ñ V1 2 B D1 2 4 7 12 13 तौ (for च) D3 11 प्रदक्षिणमकुर्वता

17 D4 om (hapl) 17 —^{a}) Ś1 Ñ V1 2 B D1–3 7 11–13 प्रहृष्टमनसौ प्रीतौ(Ñ2 V1 2 B D7 वीरौ) —^{b}) Ñ2 V1 2 नरवानरौ, B1–3 D7(m sec m) रामवानरौ (for हरिराघवौ) —^{c}) Ñ2 V1 2 B D7 पश्यतौ (for वीक्षन्तौ) —^{d}) V2 निर्वृतिम् (for न तृप्तिम्) Ñ2 B D5 8–10 T2 अभिजग्मतु (for उप°) —After 17, D3 11 ins

138* ततोऽब्रवीद्वानरेन्द्रो राघव परया मुदा ।
सर्वथाहमनुग्राह्यो देवताना न सशय ॥,

while D3 5 6 8–11 S(D3 11 after 138*) ins a passage relegated to App I (No 4)

18 ^{a}) Ś1 B4 D1 2 4 12 13 तत सर्वास्त्रविदुष, Ñ1 ततस्त सर्वविदुष, Ñ2 V1 2 B1–3 D7 तत सर्वास्त्रकुशल —^{b}) Ñ1 श्रेष्ठ, B2 धर्म (for राम) —^{d}) Ñ1 वाक्य मेघौघनिस्वन, Ñ2 V1 2 B1–3 D7 वाक्यं मेघनिभ(Ñ2 °सम)स्वन, D1 वाक्य मेघस्वनस्तदा —For 18, D3 5 6 8–11 S subst, while B4 subst 1 2 for 18^{cd}

६

अयमाख्याति मे राम सचिवो मन्त्रिसत्तमः ।
हनुमान्यन्निमित्तं त्वं निर्जनं वनमागतः ॥ १
लक्ष्मणेन सह भ्रात्रा वसतश्च वने तव ।
रक्षसापहृता भार्या मैथिली जनकात्मजा ॥ २
त्वया वियुक्ता रुदती लक्ष्मणेन च धीमता ।
अन्तरं प्रेप्सुना तेन हत्वा गृध्रं जटायुषम् ॥ ३
भार्यावियोगजं दुःखं नचिरात्त्वं विमोक्ष्यसे ।
अहं तामानयिष्यामि नष्टां वेदश्रुतिं यथा ॥ ४
रसातले वा वर्तन्तीं वर्तन्तीं वा नभस्तले ।
अहमानीय दास्यामि तव भार्यामरिंदम ॥ ५

G 4 5 5
B 4 6 6
L 4 23

139* स तु तद्वचनं श्रुत्वा राघवस्यात्मनो हितम् ।
सुग्रीवः परमप्रीतः सुमहद्वाक्यमब्रवीत् ।

[(l. 1) G1 तस्य (for स तु) D6 तस्य वच (for तद्वचन) G1 मनोहित —(l. 2) D8-10 G1 परम (for परम-) D9 11 पुनर्वचनम D5 8-10 परम वाक्यम् (for सुमहद्वाक्यम्)]

—Thereafter D5 6 8-10 S cont.

140* तव प्रमादेन नृसिंह वीर
प्रिया च राज्यं च समाप्नुयामहम् ।
तथा कुरु त्वं नरदेव वैरिणं
यथा न हिंस्यात्स पुनर्ममाग्रजम् ।
सीताकपीन्द्रक्षणदाचराणां [5]
राजीवहेमज्वलनोपमानि ।
सुग्रीवरामप्रणयप्रसङ्गे
वामानि नेत्राणि समं स्फुरन्ति ।

[(l. 1) T1 3 M3 राघव (for वीर) —(l. 2) D5 om. first च D9 om. second च D6 T1 3 G1 समाप्नुयामह (for °यामहम्) —(l. 4) D6 M2 3 यथा निहन्य(M3 °त्य)च रिपु ममाग्रजं, T2 G1 यथा निहन्ये(G1 °हन्या)च रिपु ममाग्रज, G3 यथा हतः स्याद्धरिपुर्ममाग्रज ❀ Cr. वैरिणं रिपुम् । अस्य रिपुत्व विराध निरसन न तु जातं इत्यर्थः । Cg. वैरिणं रिपुमिति द्विरुक्त्या वैरकृत शात्रव न तु जातेत्युक्तम् ❀ —T1 om. l. 5-8 —(l. 7) D10 om. (hapl.) -प्रणय- —(l. 8) T2 पश्चि- (for सम)]

—After 18, Ś1 D1 2 4 12 13 ins.

141* सखे राम महाबाहो मोच्छ्वासहृदयो ह्यसि ।
यथा यूथपरिभ्रष्टो गजो वनमुपागत ।

[(l. 1) D2 -भुजा (for -बाहो) —(l. 2) D1 जनम् (for वनम्)]

Colophon. Ś1 Ñ1 D1 2 12 13 om. (Sarga cont.) —*Sarga name*: Ñ2 V2 B4 रामसुग्रीवसख्य, V1 सुग्रीवसख्य, B1-3 सुग्रीववाक्य —*Sarga no.* (figures, words or both) V1 B1 om., Ñ2 V2 B2-4 D7 4, D3 11 3 —After colophon, G concludes with श्रीरामाय नमः

6

☞ V3 illeg. for Sarga 6 (cf. v.l. 4.4.17) Ś1 Ñ1 D1 2 12 13 continue the previous Sarga. M1 begins with श्रीरामाय नमः —Before 1, D5 6 8-10 S ins.

142* पुनरेवाब्रवीत्प्रीतो राघवं रघुनन्दनम् ।

1 [a]) Ñ2 V1 2 B D7 आचष्ट (for आख्याति) Ś1 Ñ1 D8 10 ते (for मे) ❀ Cr. अयमाख्याति अयमिदानीमाख्यातवान् वर्तमानसामीप्ये वर्तमानवद्वेति भूते लट् ❀ —[b]) D5 8 10 सेवको (for सचिवो) Ñ2 V2 B D3-11 मन्त्र(Ñ2 D3 7 °त्रि)सत्कृत, V1 मन्त्रिसंगत (for °सत्तम) —D6 om. 1[cd] —[c]) D2-5 7-11 13 T G M2 हनूमान् Ś1 D12 प्रति मित्र (for यन्निमित्त) Ś1 D12 त्वा, D2 च, D3 om. (subm.) (for त्व) —[d]) D13 G1 M2 विजन (for निर्जन) Ś1 D12 आगत

2 [a]) V1 2 B1-3 सहानेन, B4 D7 सहायेन, G3 तव भ्रात्रा (for सह भ्रात्रा) —[c]) Ś1 Ñ1 D1 2 4 12 13 राक्षसेन हृता —[d]) Ś1 D1 2 4 6 12 13 Cm. वैदेही (for मैथिली)

3 Ñ2 V1 2 B1-3 D7 transp. [ab] and [cd] —[a]) Ś1 Ñ V B D1 2 4 7 12 13 विहीना, D5 6 विमुक्ता (for वियुक्ता) Ś1 D2 4 12 13 चा(D4 वा)रण्ये, Ñ V B D1 3 7 11 शरेण (for रुदती) —[b]) Ñ1 om. च (subm.) Ś1 Ñ1 D1 2 4 12 13 जानकी, Ñ2 V1 2 B D7 मैथिली (for धीमता) —[c]) Ñ2 V1 2 D1 2 4-8 11-13 T3 G2 3 M Ck. अंतर- (D8 °रे), Ct. as in text (for अन्तर) Ś1 Ñ V1 2 B D1-4 7 11-13 दीना, M1 [अ]नेन (for तेन) —[d]) Ś1 D1 2 4 12 रो(D1 रु)दमाना, Ñ1 सीता नाम, D3 11 रुद(D11 °द)ती च, D13 नीयमाना (for हत्वा गृध्रं) Ś1 Ñ1 D1-4 11-13 सुमध्यमा (for जटायुषम्) Ñ2 V1 2 B D7 रुदती रक्षसा हृता —After 3, D8-10 ins.

143* भार्यावियोगजं दुःखं प्रापितस्तेन रक्षसा ।

4 [b]) Ñ2 V2 B1-3 D1 5-7 11 T G1 3 M अचिरात्त्व, (for नचिरात्त्व) Ñ2 V1 B2 D1 7 विमोक्ष्यसि Ś1 D2 4 12 13 न(D4 अ)चिराद्राम मोक्ष्यसे —Ś1 D12 om. 4[c]-5[b] —[c]) D2 4 13 आनयिष्यामि ते भार्यां —D1 om. 4[d] —[d]) Ñ1 D8-10 Ct. देवश्रुतीमिव, B4 D3 5 6 11 M3 Cm. g वेदश्रुती (D11 °ति)मिव, D2 4 13 वेदध्वनी(D4 °नि)मिव, Cr. as in text (for °श्रुति यथा) ❀ Ck. श्रुतीमिति दीर्घ छान्दसः, so also Ct. ❀

5 Ś1 D12 om. 5[ab] (cf. v.l. 4) D1 transp. 5 and 6 —[a]) D2 13 Cr. रसातल (for °तले) D1 3 4 9 13 G1 वर्तंती, D11 निहिताम् (for वर्तन्तीं) Ñ2 V1 2 B1-3 D7

इदं तथ्यं मम वचस्त्वमवेहि च राघव ।
त्यज शोकं महाबाहो तां कान्तामानयामि ते ॥ ६
अनुमानात्तु जानामि मैथिली सा न संशयः ।
ह्रियमाणा मया दृष्टा रक्षसा क्रूरकर्मणा ॥ ७
क्रोशन्ती राम रामेति लक्ष्मणेति च विस्वरम् ।
स्फुरन्ती रावणस्याङ्के पन्नगेन्द्रवधूर्यथा ॥ ८
आत्मना पञ्चमं मां हि दृष्ट्वा शैलतटे स्थितम् ।
उत्तरीयं तया त्यक्तं शुभान्याभरणानि च ॥ ९
तान्यस्माभिर्गृहीतानि निहितानि च राघव ।
आनयिष्याम्यहं तानि प्रत्यभिज्ञातुमर्हसि ॥ १०
तमब्रवीत्ततो रामः सुग्रीवं प्रियवादिनम् ।
आनयस्व सखे शीघ्रं किमर्थं प्रविलम्बसे ॥ ११
एवमुक्तस्तु सुग्रीवः शैलस्य गहनां गुहाम् ।
प्रविवेश ततः शीघ्रं राघवप्रियकाम्यया ॥ १२
उत्तरीयं गृहीत्वा तु शुभान्याभरणानि च ।
इदं पश्येति रामाय दर्शयामास वानरः ॥ १३

पाताल यदि वा नीता (V1 नीता) —^{b}) Ś1 D1-4 13 यदि वा, Ñ2 V1 2 B1-3 D7 वर्तेत, D2 वर्तेति, D6 marg, D9 G3 वर्तेती, D10 om, D11 अथवा (for वर्तन्तीं) Ñ1 [अ]पि, D1-4 11 13 [अ]पि (for वा) D4 5 8-10 T G M1, 3 नभस्थले —^{c}) M2 आनाय (for आनीय) Ś1 Ñ1 D1 2 4 12 13 आनयिष्यामि विक्रम्य —^{d}) B4 भार्यां तव परंतप

6 D1 transp 5 and 6 —^{a}) V2 सत्य (for तथ्यं) —^{b}) D5 8-10 G1 3 M1 अवेहि Ś1 D12 तद्वेच हि रघुप्रिय; Ñ1 प्रतिश्रुत्वा रघुप्रिय, Ñ2 V1 2 B D7 शृणु (B4 °त्वा) राघवसत्तम, D1 3 तद (D3 त्वम)वेहि रघूत्तम, D2 4 13 तद्वे (D4 °द्वे, D13 °वेर)हि रघुप्रिय, D11 त्वमवेहि रघूत्तम. —After 6^{ab}, D5 8-10 S ins, D11 ins after 8

144* न शक्या सा जरयितुमपि सेन्द्रैः सुरासुरैः ।
तव भार्या महाबाहो भक्ष्य विषकृतं यथा ।

[(l 1) G1 M2 अशक्या (for न शक्या) D6 सेन्द्रैरपि (by transp) (for अपि सेन्द्रैः) D5 11 न सा जरयितुं शक्या सेन्द्रैरपि सुरासुरैः —(l 2) D5 11 विष सर्प- (for भक्ष्य विष)]

—^{c}) D1 11 महाप्राज्ञ, D7 च मोहं च (for महाबाहो) —^{d}) Ś1 Ñ1 D1-4 11-13 सत्यमेन (Ñ1 D3 11 सत्येन, D1 सत्येन) हि ते शपे, Ñ2 V1 2 B D7 सत्यं (V2 D7 °त्यं) सत्येन ते शपे, T3 कान्ता तामनुयामि ते

7 D3 transp ^{ab} and ^{cd} —^{a}) Ñ2 V1 2 B1-3 D7 अनुमानेन (for °नात्तु) Ś1 Ñ1 B4 D1 2 4 11-13 विजानामि (for तु जानामि) —^{b}) D2 मैथिलीं या (for मैथिली सा) —^{c}) D8 reads मया in marg G3 तु दृष्टा हि (for मया दृष्टा) —^{d}) D6 8-10 रौद्रकर्मणा, G2 कामरूपिणा (for क्रूरकर्मणा) Ñ2 V1 2 B1-3 D7 तदा क्रूरेण रक्षसा

8 ^{b}) Ś1 सस्वरा, B4 D1-4 11-13 T1 सुस्वर (D2 4 12 13 °रा), M1 सस्वर (for विस्वरम्) Ñ2 V1 2 B1-3 D7 करुण लक्ष्मणेति च —^{c}) Ñ2 V1 2 B1-3 D7 राक्षसस्याङ्के —^{d}) V1 damaged from गे up to 9^{a} V2 D11 G2 वधूम् (sic) (for -वधूर्) Ś1 Ñ V2 B1-3 D1 2 4 7 11-13 G2 इव (for यथा) —After 8, D11 ins 144*.

9 V1 damaged for 9^{a} (cf v l 8) —^{a}) D12 आत्मान (for आत्मना) D11 पञ्चमो (for °मं). Ñ V2 B D1-4 7 11 12 दृष्ट्वा D6 सा सा, T2 सा हि, G2 सां तु (for मां हि) —^{b}) D1 मां तु (for दृष्ट्वा) D4 5 8 10 शैलतटे Ñ1 मां च शैलतटे स्थितम्, Ñ2 V2 B D7 मां शैलस्य तटे स्थितम्, V1 मां शैलस्योपरि स्थितम्, D1 2 11 मां तु (D1 तु) शैलतटे (D2 11 °टं) स्थितम्, D3 मां तु शैले तदा स्थितं, D12 [अ]थात्मनुशैले तदा स्थिता (corrupt) —^{c}) D1-4 13 तदा, D11 यथा, G1 तथा (for तया) Ñ1 D2 4 10 त्यक्तम्, Ñ2 V1 2 B D3 7 11 क्षिप्त (for त्यक्तं) —For 9-10, Ś1 D12 subst 145*

10 ^{a}) Ñ1 V2 B D1 2 4 7 13 यानि (for तानि) —^{b}) Ñ2 V1, 2 B D7 तानि (Ñ2 B2 om) निहितानि (for निहितानि च) —^{c}) Ñ1 D1-3 11 13 तानि रत्नं, D1 तान्यत्र (for [अ]हं तानि) —^{d}) D2 13 समनुज्ञातुम्, Ñ1 D1 3 समभि°, Ñ2 V2 B D7 त्वमभि, D4 समनु (for प्रत्यभि°). —For 9-10, Ś1 D12 subst

145* आत्मनाभरणान्येषा मुक्तानि किल लक्षिता ।
आनये तानि राजेन्द्र समनुज्ञातुमर्हसि ।

11 ^{ab}) Ñ2 V1 2 B D7 ततोऽब्रवीद्दाशरथिः (V1 missing, after दाश up to परा in l 2 of 146*) (for ^{a}) B1 2 (marg also is in text) 3 G2 प्रियदर्शनं, D7 °कामया (for °वादिनम्) Ś1 Ñ1 D1 2 4 12 13 एवं ब्रुवाणं सुग्रीवमुवाच रघुनन्दन —D7 om (hapl) 11^{c}-12 —^{c}) Ñ V2 B D1 G2 क्षिप्रं, D3 11 तानि (for शीघ्रं) —^{d}) Ś1 Ñ1 V2 B D1 2 4 10 13 त्वं, Ñ2 G2 च, D3, 11 हि, G1 तु (for प्र) Cv r किमर्थं प्रविलम्बस इति पाठः

12 V1 missing, D7 om 12 (for both, cf v l 11) B3 om 12-13^{b} —^{b}) Ś1 V2 D1 2 4 12 13 महतीं, D9 गहन (for गहनां) D9 वन (for गुहाम्) —^{c}) Ś1 Ñ1 D1 2 4 12 13 त्वरायुक्तो, Ñ2 V2 B1 2 4 तत क्षिप्रं (for ततः शीघ्रं) —^{d}) G(cd) रामस्य (for राघव) D1 -प्रीति- (for -प्रिय-).

13 V1 missing (cf v l 11) B3 om 13^{ab} (cf v.l 12) —^{a}) Ś1 D1 4 13 [आ]शु, Ñ1 D3 11 च, D12

ततो गृहीत्वा तद्वासः शुभान्याभरणानि च ।
अभवद्बाष्पसंरुद्धो नीहारेणेव चन्द्रमाः ॥ १४
सीतास्नेहप्रवृत्तेन स तु बाष्पेण दूषितः ।
हा प्रियेति रुदन्धैर्यमुत्सृज्य न्यपतत्क्षितौ ॥ १५
हृदि कृत्वा स बहुशस्तमलंकारमुत्तमम् ।
निशश्वास भृशं सर्पो बिलस्थ इव रोषितः ॥ १६
अविच्छिन्नाश्रुवेगस्तु सौमित्रिं वीक्ष्य पार्श्वतः ।
परिदेवयितुं दीनं रामः समुपचक्रमे ॥ १७
पश्य लक्ष्मण वैदेह्या सत्यक्तं ह्रियमाणया ।
उत्तरीयमिदं भूमौ शरीराद्भूषणानि च ॥ १८
शाद्वलिन्यां ध्रुवं भूम्यां सीतया ह्रियमाणया ।
उत्सृष्टं भूषणमिदं तथारूपं हि दृश्यते ॥ १९ G 4 6 19 B 4 6 21 L 4 4 6

om (subm) (for तु) —^{b}) Ñ2 D7 शुद्धानि, D5 6 8–10 T2 G1 3 M2 स तानि, M1 वराणि (for शुभानि) —^{c}) D3 11 दर्शयामास (for इव पश्येति) —^{d}) D3 11 सखे पश्येति चाब्रवीत्

14 V1 missing (cf v l 11) D6 om 14^{ab} —^{a}) Ś1 Ñ1 D1 2 4 12 13 राघवो (D4 °वौ) गृह्य, Ñ2 V2 B1–3 D7 सोपि वीक्ष्याथ, B4 रामोथ दृष्ट्वा, D3 11 स हि सदृश्य (for ततो गृहीत्वा) B4 तद्वस्त्र, D5 8–10 T2 G1 M2 वासस्तु, G3 रामस्तत्, M1 रामस्तु (for तद्वास) —^{b}) Ś1 Ñ B D1–4 7 11–13 सीताया भूषणानि च, V2 सीतायाभरणानि च (metri causa) —^{c}) Ñ2 V2 B1–3 D7 बाष्पसपूर्ण (for °संरुद्धो) D1 अतर्बाष्पेण सरुद्धो —^{d}) Ñ2 V2 B D7 सनीहार इवोडुराट्, D3 11 सनीहार इवांशुमान्

15 V1 missing (cf v l 11) —^{a}) Ś1 Ñ1 D1 2 4 12 प्रवृद्धेन, Ñ2 V2 B1–3 D3 11 M1 प्रयुक्तेन, B4 -समुत्थेन, D7 -प्रसूतेन, G1 प्रसक्तेन (for प्रवृत्तेन) —^{b}) Ś1 Ñ V2 B D1–4 7 11–13 धर्षित (for दूषित) —^{c}) B3 om हा (subm) Ñ1 तदा धैर्यम्, Ñ2 V2 B1–3 D7 च धैर्यं स, D2 13 रुदत्युच्चैर्, T2 रुदत्स्थैर्यम् (for रुदन्धैर्यम्) D1 हा प्रिये चातिरुदन् (subm), G (ed) हा प्रिये जानकीत्युक्त्वा —^{d}) Ś1 D12 विसृज्य (for उत्सृज्य) Ñ2 नापतद् (for न्यपतत्) Ś1 Ñ1 D2–4 11 12 G2 भुवि (for क्षितौ) D1 धैर्यं मुक्त्वापतद्भुवि, D13 यमुत्सृज्यापतद्भुवि, G (ed) धैर्यं त्यक्त्वापतत्क्षितौ

16 V1 missing (cf v l 11) —^{a}) Ñ2 V2 B1–3 D6 7 T1 3 G M1 3 तु, D1 नु, D3 11 च (for स) Ś1 D12 T2 सुबहुशस्, B4 तु सुचिर (for स बहुशस्) —^{b}) Ś1 Ñ1 D1 2 4 12 13 आत्मन, Ñ2 V2 B D3 7 11 आर्तवत् (for उत्तमम्) —^{c}) Ś1 D2 4 12 13 विनि (D2 4 13 °नि) श्वसन्महासर्पो, Ñ1 विनि श्वस्य यथा सर्पो, Ñ2 V2 B1–3 D7 विनिश्वसन्स (B1–3 °सश्च, D7 °सन्तु) बहुशो (V2 om स बहुशो), B4 विनिक्षिपन्सुबहुशो, D1 विनिश्वसन्यथा सर्पो, D3 11 प्रतस स निशश्वास —^{d}) Ñ2 V2 B D3 7 11 भुजग (for बिलस्थ) Ś1 D1 2 4 12 13 कोपित (for रोषित)

17 V1 missing (cf v l 11) —^{a}) Ś1 D12 13 -[अ]स्रुवेगस्तु, B4 G1 M2 -[अ]श्रुपातस्तु, D3 11 -[अ]श्रुसवेग (D11 °ग), D9 -[अ]श्रुवेगैस्तु (for -[अ]श्रुवेगस्तु) —^{b}) D1 11 सौमित्र, 12 लक्ष्मण (for सौमित्रि) D1 दृश्य, D2 4 13 पश्य, D5 8–10 T1 2 G1 M2 प्रेक्ष्य (for वीक्ष्य) Ñ2 V2 B1–3 D7 राघव (for पार्श्वत) —^{c}) Ś1 Ñ V2 B1 3 4 D1–4 7 11–13 G1 दीनो, B2 रामो (for दीन) —^{d}) B2 दीन (for राम) D5 राघव परिचक्रमे, D6 स राम परिचक्रमे, D12 13 रामस्तमुपचक्रमे

18 V1 missing (cf v l 11) —^{ab}) Ś1 Ñ1 D1 2 4 12 13 सत्यक्त वैदेह्या (by transp) —Ś1 D7 11 om (hapl) 18^{c}–19^{b} D1 reads 18^{c}–19^{b} in marg —^{c}) Ñ2 V2 B D3 पीत (for भूमौ). —^{d}) Ñ2 शरीराभरणानि च, V2 शरीराभूषणानि च

19 V1 missing (cf v l 11) Ś1 D7 11 om, D1 reads in marg 19^{ab} (cf. v l 18) —^{a}) D1 3 6 8–10 13 G1 3 M1 2 Cv r k शाड्वलिन्या, G2 शाड्वलान्या, Cg t as in text (for शाद्वलिन्या) Ñ2 V2 B1–3 तत्रा (for ध्रुव) Ñ V2 B D2–4 12 13 G2 M1 भूमौ (for भूम्या) —^{b}) D2 4 12 13 वैदेह्या (for सीतया) —^{c}) D2 13 उत्सृज्य (for उत्सृष्ट) —^{d}) D11 तथाभूत D3 12 च, Ck तु (for हि) Ñ V2 B4 D7 11 लक्ष्यते (for दृश्यते) —After 19, D3 11 ins

146* कुण्डलानि च पश्य त्व केयूराणि च लक्ष्मण ।
नूपुराणि च तान्येव काञ्चीं च शुभदर्शनाम् ।

[(l 1) D11 [इ]त्य (for त्व)]

—D3 11 cont, D1 5 6 (D1 6 in marg)–10 T3 G M ins after 19, T1 ins l 4 only after 19

147* एवमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत् ।
नाहं जानामि केयूरे नाहं जानामि कुण्डले ।
नूपुरे त्वभिजानामि नित्य पादाभिवन्दनात् ।
ततस्तु राघवो वाक्य सुग्रीवमिदमब्रवीत् ।

[G3 M2 read l 1–3 in marg —(l 1) D6 एव ब्रुवाण दीन त (for the prior half) D6 पुनर् (for वाक्यम्) —(l 2) D3 11 [अ]भिजानामि (for both [अ]हं जानामि) D6 न जाने केयूरे तस्या न जाने कुण्डले तथा —(l 3) D6 नूपुरे तु, M2 नैव वामो (for नूपुरे तु) D6 [अ]भिजानेहं (for °जानामि) D3 [अ]भिदशनात् (for -[अ]भिवन्दनात्) —D6 om l 4 —(l 4) G3 lacuna for तत T3 G M2 3 स (for तु) D1 3 11 T1 3 G M1 3 दीन, M2 दीन (for वाक्य)]

6 20 6 4 1 17 ब्रूहि सुग्रीव कं देशं ह्रियन्ती लक्षिता त्वया ।
रक्षसा रौद्ररूपेण मम प्राणसमा प्रिया ॥ २०
क्व वा वसति तद्रक्षो महद्व्यसनदं मम ।
यन्निमित्तमहं सर्वान्नाशयिष्यामि राक्षसान् ॥ २१
हरता मैथिलीं येन मां च रोषयता भृशम् ।
आत्मनो जीवितान्ताय मृत्युद्वारमपावृतम् ॥ २२
मम दयिततमा हृता वना-
द्रजनिचरेण विमथ्य येन सा ।
कथय मम रिपुं तमद्य वै
प्लवगपते यमसंनिधिं नयामि ॥ २३

इति श्रीरामायणे किष्किन्धाकाण्डे षष्ठः सर्गः ॥ ६ ॥

20 V1 missing (cf v l 11) —[a]) Ś1 D2 4 12 13 वानर (for सुग्रीव) —[b]) D6 T2 क्रोशती, G2 हन्ती (for ह्रियन्ती) Ñ2 V2 B D7 ह्रियमाणोपलक्षिता —D12 om 20[c]–21[b] —[c]) Ś1 तेन घोरेण, Ñ V2 B D1–4 7 11 13 तेन रौद्रेण (for रौद्ररूपेण) —[d]) B4 M2 प्राणसमप्रिया, D5 6 8–10 T2 प्राणप्रिया हृता T1 3 M3 प्राणैः प्रिया प्रिया, G2 M1 प्राणात्प्रिया प्रिया (M1 हृता), G3 प्राणात्प्रियाप्रिया (for प्राणसमा प्रिया) ✓ Cg प्राणैः प्राणेभ्य इ, Ck प्राणैः प्रियेति, Ct प्राणप्रिया प्राणेभ्योपीष्टा प्राणसमसम्य तदधीनत्वादिति भाव[illegible]

21 V1 missing (cf v l 11) D12 om 21[ab] (cf v l 20) —[a]) Ś1 Ñ1 D1–4 11 13 [अ]त्र (for वा) Ś1 Ñ1 D1–4 11 13 पापात्मा (for तद्रक्षो) B4 क्व चास्ते इति तद्रक्षो —[b]) Ś1 Ñ1 D1 2 4 11 महद्व्यसनदो, Ñ2 V2 B1–3 D7 8 11 M1 महाव्यसनद (D1 11 °दो) (for महद्व्यसनद) —After 21[ab], Ñ1 ins

148* राक्षसो रावणो नाम रक्षसां कुलपांसन ।
तत्र गच्छामहे सर्वे यत्रास्ते निरपत्रप ।
सह हर्यृक्षसैन्यैश्च सर्वैः मित्रैश्च च ।
स रामेणैवमुक्तस्तु सुग्रीवो वानरेश्वर ।
कृताञ्जलिपुट तत्र पुनरेवेदमब्रवीत् । [5]

—[c]) G1 इमान् (for अहं) —[d]) Ś1 Ñ2 V2 B D1–4 7 11–13 निहनिष्यामि (for नाशयि°)

22 V1 missing (cf v l 11) Ñ1 missing from 22 up to 4 8 17[b] —[a]) G3 damaged for येन Ñ2 V2 B1–3 D7 मैथिलीं हरता तेन —[b]) D6 8–10 भृशं (for भृशम्) —[d]) B4 मृत्योर् (for मृत्यु-) D1 13 M उपावृतं, Cg as in text (for अपावृतम्) —After 22, Ñ2 V2 B D1 7 11 (l 18–21 only) ins a passage relegated to App I (No 5)

23 Ñ1 V1 missing (cf v l 22 and 11 resp) Ñ2 V2 B D 11 om 23 —[a]) D5 T1 G M दयिततरा (for °तमा) Ś1 D1 12 G M1 2 वनान्तात् (for वनात्) —[b]) D1 विमृह्य, M1 विमुच्य, Cl t as in text (for विमथ्य) D1 सहसा, D3 येन मां प्रति (for येन सा) D6 तदा विमथ्य मा (for विमथ्य येन सा) —[c]) Ś1 D1–4 12 13 M3 त्वम्, M1 नर (for तम्) Ś1 D12 शीघ्रं, M1 वै तु (for वै) —[d]) D2 4 13 प्लवगर्षभ (for °पते) D1 यमसदनं, D2 13 यमस्य पुरं, D1 यमभवनं, G2 M3 यमसादनं, M1 2 यमसंनिधौ (for यमसंनिधिं) D4 13 नयामि न (for नयामि) Ś1 D12 प्लवग नयामि यमस्य सादनं, D3 प्लवगम यमस्य पुरं नयामि तं ✓ Cv अस्मिन्सर्गान्ते केषुचित्कोशेषु "मम दयिततरे"त्यादि श्लोको दृश्यते ।, Cr अस्मिन्सर्गान्ते मम दयिततमेती(दयिततमे?)त्यत्र श्लोक बहुकोशेषु दृश्यते ।, Cg ममेति विषमवृत्तम् । —After 23, D3 ins l 18–21 of App I (No 5)

1 ^{a}) D3 स किष्किधा, D6 तदा तस्मात्, M1 तु ध°, M2 सुध° (for स धर्मात्मा) —^{b}) Ñ2 D1 7 किष्किध्या, D3 धर्मात्मा (for किष्किन्धां) Ñ1 पुनरागत (for लक्ष्मणाग्रज) —^{c}) Ñ1 राघव (for जगाम) —G3 om (hapl) 1^{d}—3^{c} —^{d}) Ś1 Ñ V B D1–4 7 11–13 -पौरुष- (for -विक्रम) G2 लक्ष्मणश्च महाबल

2 G3 om 2 (cf v l 1) D3 reads 2–3^{b} in marg —^{a}) Ś1 B2 D12 13 महाचाप, D3 महावीर्यश (for महच्चाप) —^{b}) D3 चापं (for राम) D3 M1 कनक (for काञ्चन-) Ñ V2 B D1 7 -भूषण (for -भूषितम्) —For 2^{cd}, Ś1 Ñ1 D1–3(m) 4 11–13 subst

283* शर चादित्यसकाश महेश्वरशरोपमम् ।,

while Ñ2 V B D7 subst

284* बाणमुद्धृत्य चैवैक ज्वलितानलवर्चसम् ।

[B3 lacuna for ज्वलिता]

3 G3 om 3^{abc} (cf v l 1) D3 reads 3^{ab} in marg (cf v l 2) —^{a}) Ñ2 V B D3 7 प्रययौ, D6 तु ययुस् (for तु ययौ) —^{c}) Ñ2 V B D7 विपुल- (for महत-) Ś1 Ñ1 D1 2 4 11–13 सुग्रीवो वानरश्रेष्ठो —^{d}) D2 लक्ष्मण°, D8–10 लक्ष्मणस्य (for लक्ष्मणश्च) Ñ2 V B D7 [ए]व वीर्यवान्, D1 महामति (for महाबल)

4 ^{b}) D1 om, D12 नीलो (for नलो) D6 8–10 T2 वीर्यवान् (for वानर) Ñ2 V B D7 नल(Ñ2 °लो [sic])-नीलौ च वानरौ —^{c}) D12 भारश (for तारश) —^{d}) D1 om (hapl) यूथप- Ś1 Ñ V B3 4 D1 2 4 8–10 12 13 T1 3 M3 -यूथप (for -यूथपा) ❀ Ck t हरियूथपानामपि यूथ पातीति (Ct पाति तादृश) ❀

5 ^{ab}) Ś1 Ñ1 D1–4 11–13 पश्यतस्ते तरूत्रम्यान् (D1 °न्सर्वान्, D3 °रूस्तत्र) (for ^{a}) Ś1 Ñ1 D1–4 11–13 -[अ]वनामितान् (for -[अ]वलम्बिन) Ñ2 V B D7 पश्यन्तस्ते ययुर्वृक्षान्पुष्पितान्रुचिरान्बहून् —^{c}) V3 illeg for प्रसन्नाम्बुव B2–4 [अ]म्बुरहाश, D3 -[अ]बरुहाश, D5 °वहीश (sic), D9 -[अ]नुवहाश, G2 °हवाश (meta) (for -[अ]म्बुवहाश) D2 13 प्रसन्नान्भूरुहाश —^{d}) Ś1 D12 सागरोपमा, B4 °रागना (for सागरगमा)

6 D6 transp. ^{ab} and ^{cd} —^{a}) L(ed) कन्दराश्चैव (for °दराणि च) Ñ1 V B D1 7 11 शैलाना (for शैलाश्च) Ś1 D12 कंदराश्च सशैलाश्च —^{b}) Ś1 Ñ1 D4 12 निर्झराश्च, D6 9 G1 3 Cv g k t निर्दराणि, M2 Cr दर्दराणि (for निर्झराणि) D6 तदा (for तथा) D2 13 निर्झराश्च गुहास्तथा —^{c}) V1 शि* णि (moth-eaten) Ñ2 V B D7 दिव्यानि (for मुख्यानि) —^{d}) Ś1 Ñ1 D1 2 4 11–13 ददृशु, Cv r g k t as in text (for दरीश्च) Ñ2 V1 B विविधा शुभा (for प्रियदर्शना) V2 3 D7 नदीश्च विविधा शुभा

7 ^{a}) D6 G M वैडूर्य-(for वैदूर्य) D1–सदृशै (for -विमलै) M1 पत्रै (for पर्णै) Ñ2 V B D7 -कान्ततोयाश्च (for -विमलै पर्णै) Ś1 Ñ1 D1–4 11–13 वैडू(Ñ1 °दू)र्यसदृशै सर्वै (Ñ1 D2 4 11 पत्रै, D3 om, D13 पर्णै), D5 8–10 वैडूर्यविमलैस्तोयै (D5 °लै शैलै) —^{b}) D1 2 11 13 Cr चाशोक, G1 व्याकोश, Cv g k t as in text (for चाकोश-) Ś1 D4 12 प्रफुल्लाशोककुड्मलै, Ñ2 V1 2 B D7 (m) नलिनी(Ñ2 V2 B1 2 4 °नी) फुल्लपकजा (V1 °ज), V3 illeg —^{c}) D3 तत्रान्वेष्य, D11 यत्रान्वेक्ष्य (for शोभितान्स-) M1 मार्गान् (for मार्गे) —^{d}) D5 8–10 Ct [अ]वलोकयन्. D6 M1 विलो° (for व्यलो°) D3 11 तडागान्विविधानपि —For 7^{cd}, Ś1 Ñ1 D1 2 4 12 13 subst, while B2 ins after b

285* रम्याणि स्वच्छतोयानि तडाकान्यवलोकयन् ।

[Ś1 रम्यैरन्विष्यतो याति, Ñ1 रम्यै स्वच्छतोयानि (subm), D1 4 13 रम्यैरन्विष्य(D1 °न्वेष्य) तोयानि, D2 रम्यैरन्विष्य ते याति, D12 रम्यैर ˘ ˘ ˘ * (for the prior half) B2 D1 2 4 12 13 तडागानि (for °कानि) D2 13 विलोकयन् (for [अ]वलोकयन्)],

while Ñ2 V1 3 B D7 subst for 7^{cd}

286* पश्यन्त प्रययुर्मार्गे नानापुष्पगणायुता ।

[G(ed) -गणैर्युता (for -गणायुता)]

कारण्डैः सारसैर्हंसैर्वञ्जुलैर्जलकुक्कुटैः ।
चक्रवाकैस्तथा चान्यैः शकुनैः प्रतिनादितान् ॥ ८
मृदुशष्पाङ्कुराहारान्निर्भयान्वनगोचरान् ।
चरतः सर्वतोऽपश्यन्स्थलीषु हरिणान्स्थितान् ॥ ९
तटाकवैरिणश्चापि शुक्लदन्तविभूषितान् ।
घोरानेकचरान्वन्यान्द्विरदान्कूलघातिनः ॥ १०
वने वनचरांश्चान्यान्खेचरांश्च विहंगमान् ।
पश्यन्तस्त्वरिता जग्मुः सुग्रीववशवर्तिनः ॥ ११
तेषां तु गच्छतां तत्र त्वरितं रघुनन्दनः ।
द्रुमषण्डं वनं दृष्ट्वा रामः सुग्रीवमब्रवीत् ॥ १२

G 4 13 12
B 4 13 13
L 4 9 12

8 D7 reads 8 in marg —[a]) Ś1 Ñ V B D2-4 7 12 13 Cvp rp काटवै, D1 कटवे, D11 यादवैं, Cv r g k t as in text (for कारण्डै) G2 हंसै कारडवैश्चैव —[b]) Ñ1 वकुलैर्, V1 B2 मजुलैर्, D4 वजुडैर्, D6 त्वकुलैर्, T1 3 G2 3 M Cr k वञ्चुलैर्, G1 मयूरैर्, Cv as in text (for वञ्जुलैर्) V2 जलकु. .मै, B3 illeg (for जलकुक्कुटै) —[c]) Ś1 Ñ2 V B D7 12 G2 [अ]न्यैश्च, D11 चापै (for चान्यै) D6 अन्यैर्जलचरैश्चैव —[d]) Ś1 Ñ1 D1 2 4 12 13 नादिता दिश, D3 11 सप्रना(D11 °णा)दितान्, M3 Cg उपनादितान् (for प्रतिनादितान्) Ñ2 V B D7 दात्यूहैश्चा भिनदिता (V1 3 °श्चाभिनादितान् [V1° . . moth-eaten], V2 B3 °श्च विनादिता, B1 2 4 °श्च निनादिता [B1 °ता]) —After 8, B2 ins 285*

9 Ś1 Ñ1 D1 2 4 11-13 om 9[ab] —[a]) D3 G3 पुष्पाकुर- (for शष्पाङ्कुर-) —[b]) D5 8-10 G1 चारिण, Ck as in text (for -गोचरान्) D3 वनमाश्रितान्, G2 (before corr) मृगपोतकान्, B(ed) वनचारिणा (for वनगोचरान्) M1 मृगपोताश्च निर्भयान ❀ Ck मृदूना शष्पाङ्कुराणा बालतृणाङ्कुराणा भारो येषु ते ❀ —[c]) D2 9 11 चरतो, D4 चतस्रो, D8 तरत, M2 चरितस्, B(ed) चरता, Cv r g k as in text (for चरत) Ś1 वलगतो, Ñ1 D1 4 वर्गशो, D2 12 बलतो (for सर्वतो) D3 प्रकीर्णान्तरितश्चापि, D13 चरतो वल्गते पश्यन् —[d]) D6 स्थलेषु (for स्थलीषु) D8 बहून्, G2 तथा (for स्थितान्) Ś1 Ñ1 D1 2 4 11-13 विविधान्मृगान्, M1 हरिणीं मृगान् (for हरिणान्स्थितान्) —For 9, Ñ2 V B D7 subst

287* स्वस्थाश्चापि गतातङ्कान्वनराजिसमाश्रयान् ।
चरतो वीक्षमाणाश्च ययुर्मृगगणान्वने ।

[(l 1) V1 3 B4 सुस्थाश्, V2 -स्थान् (for स्व°) B1 3 चव, B2 चाप-(for चापि) V2 गता.., B1 गताशकान् (for -गतातङ्कान्) Ñ2 B2 समाश्रितान् (for °श्रयान्) —B3 om (hapl) from l 2 up to l 1 of 290* —(l 2) Ñ2 D7 वहून् (for वने)]

10 B3 om 10 (cf v l 9) D3 om from 10 up to l 1 of 289* —[a]) M2 -चारिणश् (for -वैरिणश्) G2 M1 [ए]व (for [अ]पि) Ś1 Ñ1 D1 2 4 11-13 प्रभिन्नकरटॉश्चापि —[b]) Ś1 D2 4 12 13 -विभूषणान् D1 मुक्तदतविभूषणान् —[c]) T1 3 M1 दृसान् (for घोरान्) G1 M2 वरान् (for -चरान्) T1 3 M1 घोरान् (for वन्यान्) Ś1 Ñ1 D1 2 4 7 11-13 गिरिप्रख्यास्(Ñ1 D1 7 चरतश्च) तथा व(D1 2 13 चा)-न्यान —[d]) Ś1 D1 2 4 12 13 नग, D11 गज- (for कूल-) —For 10, Ñ2 V B1 2 4 subst, D7 subst for 10[ab] only

288* तडागसेविनश्चैव कुञ्जरान्गिरिसंमितान् ।
जलस्थाश्च वनस्थाश्च करेणुगणसेवितान् ।

[(l 2) V2 जलनाश्च Ñ2 B4 D7 स्थलस्थाश्च (for वन°) V3 B2 -मवृत्तान् (for -सेवितान्)]

—After 10, D5 6 8-10 S ins, while D3 ins l 2 only after 9 (owing to omission)

289* मत्तान्गिरितटोद्धुष्टान्पर्वतानिव जङ्गमान् ।
वानरान्द्विरदप्रख्यान्महीरेणुसमुक्षितान् ।

[(l 1) D6 -तटोत्कर्षान्, D9 -त उष्टान्, D10 -तटोध्वस्तान्, T G M2 3 Cg -तटोत्कृष्टान्, M1 -नटोत्पन्नान् G2 transp पर्वतान् and जङ्गमान् —(l 2) D3 6 S वारणान्वारिद(D3 °जन्द)प्रख्यान् (for the prior half) D6 M3 -समुक्षितान्, D9 समुत्थितान्]

11 B3 om 11[ab] (cf v l 9) —[a]) D4 वने वने-, M1 वनेचर- (for वने वन) D3 -चरानन्यान, G1 -चराश्चापि (for चरांश्चान्यान) D12 वनेचरवराश्चान्यान् —[b]) Ś1 Ñ1 D4 12 13 खचराश् —After 11[ab], Ñ2 B2(m) 3 (after l 1 of 287*) D7 ins

290* विभिन्नकरणाश्चापि शुक्लदन्तविभूषितान ।
चरतश्च तथा वन्यान्द्विरदान्कुलपातिन ।

[B3 om l 1 —(l 1) D7 करटाश् (for °णाश्) Post half = 10[b]]

—[c]) D1 2 4 11 किष्किधा (for पश्यन्तस्) Ś1 Ñ1 D12 13 किष्किधा (Ś1 °दा, Ñ1 °ध्या) त्वरित जग्मु, Ñ2 V B D7 पश्यतस्ते (B4 मपश्यतो) ययु सर्वे, D3 ते जग्मुस्त्वरिता सर्वे, D6 पश्यत एव ते जग्मु, G2 पश्यतस्ते समाजग्मु, M1 पश्यत सरितो जग्मु —[d]) G(ed) -परिवर्तिन (for -वश°)

12 [a]) D1 नु (for तु) Ñ2 V B2 4 D7 गच्छन्नेव तत(V2 ययु)स्तत्र(V1 °स्तस्य, V3 ° . [illeg], B2 °स्तेन) —[b]) V3 . त (illeg) (for त्वरित) Ñ1 रघुनदिन, G(ed) सुमनोहर (for रघुनन्दन) —[c]) Ś1 Ñ1 D1 4 12 -खड(Ñ1 D1 °ड) वन, Ñ2 V B D7 ष(V1 2 D7 -स)डमथो, D2 3 8 10 11 13 -खड(D8 10 °ड) वन, Cg k

एष मेघ इवाकाशे वृक्षषण्डः प्रकाशते ।
मेघसंघातविपुलः पर्यन्तकदलीवृतः ॥ १३
किमेतज्ज्ञातुमिच्छामि सखे कौतूहलं मम ।
कौतूहलापनयनं कर्तुमिच्छाम्यहं त्वया ॥ १४
तस्य तद्वचनं श्रुत्वा राघवस्य महात्मनः ।
गच्छन्नेवाचचक्षेऽथ सुग्रीवस्तन्महद्वनम् ॥ १५
एतद्राघव विस्तीर्णमाश्रमं श्रमनाशनम् ।
उद्यानवनसम्पन्नं स्वादुमूलफलोदकम् ॥ १६
अत्र सप्तजना नाम मुनयः संशितव्रताः ।
सप्तैवासन्नधःशीर्षा नियतं जलशायिनः ॥ १७
सप्तरात्रकृताहारा वायुना वनवासिनः ।
दिवं वर्षशतैर्याताः सप्तभिः सकलेवराः ॥ १८
तेषामेवंप्रभावेन द्रुमप्राकारसंवृतम् ।
आश्रमं सुदुराधर्षमपि सेन्द्रैः सुरासुरैः ॥ १९
पक्षिणो वर्जयन्त्येतत्तथान्ये वनचारिणः ।
विशन्ति मोहाद्येऽप्यत्र निवर्तन्ते न ते पुनः ॥ २०

as in text (for षण्ड वन). ❀ Ct द्रुमाणां षण्ड. समूहो यस्मिंस्तादृशं वनम् ❀ —^{d}) D3 सुग्रीवं रामश्चाब्रवीत् (unmetrical), D11 सुग्रीवमिदमब्रवीत्

13 ^{a}) Ś1 Ñ1 D1 2 4,12 13 अथ घन, D3 11 एषोद्यद् (for एष मेघ) Ñ2 V B D7 दृश्यते मेघसंकाश —^{b}) D1 3 8 10–13 खड (for -षण्ड). Ñ2 V B D7 तरुषं (V1 3 °ष)ड (for वृक्षषण्ड) —^{c}) Ś1 Ñ1 D1 4 11 12 -सदृश , D8–10 T2 G3 -निपुल, D6 -निपुला (sic) (for -विपुल) Ñ V B D7 नानागुल्मलतानद्ध(V2 B4 °बद्ध), D2 13 मेघसंकाशसदृश , D3 वायुवेगप्रचलित , D9 मेघसंघातविपुल —^{d}) B1 पर्यन्त (for पर्यन्त-) Ñ2 D6 8–10 T2 G3 -वृत, V B1 2 4 D7 -वन, B3 -फल (for -वृत) ❀ Ct मेघेत्याद्युत्तरान्वयि ❀

14 ^{a}) Ś1 Ñ1 D1 2 4 11–13 तमिमं (for किमेतज्) D6 दृष्टुंतत्परिपृच्छामि —^{b}) Ś1 Ñ V2 3 B D2–4 7 11–13 T1 2 (also as in text) 3 M3 हि मे, V1 M1 महत् (for मम) —^{d}) D6 T2 3 G2 3 Ck कृतम् (for कर्तुम्) —For 14^{cd}, Ś1 Ñ V B D1–4 7 11–13 subst

291* महदस्य परिज्ञाने गच्छन्नेव च शंस मे ।

[Ñ1 [उ]परि (for परि-) Ś1 परिज्ञात, D2 4 12 13 °ज्ञान (for °ज्ञाने) Ś1 D1 2 4 11–13 वदस्व, Ñ1 B3 ब्रवीहि (for च शंस)]

15 ^{a}) Ñ2 V B1 2 4 D7 [ए]तद् (for तद्) —^{cd}) Ś1 D2 4 12 13 [ऽ]स्य, V1 च, D3 11 स (for ऽथ) Ñ2 B D7 त (for तन्) Ś1 Ñ2 V B D1 2 4 7 12 13 M1 महावनं, D3 11 G2 वनं महत् (by transp) (for महद्वनम्) Ñ1 सुग्रीवो विपुलग्रीवो ऽ-मेतदुवाच ह

16 ^{ab}) Ś1 Ñ1 D1–4 11–13 एष राघव विस्तीर्ण आश्रम श्रमनाशन —For 16^{ab}, Ñ2 V B D7 subst

292* यदेतन्मेघसंकाशं पश्यस्याश्रममण्डलम् ।

[V1 3 तद् (for यद्)]

—^{c}) Ś1 -सच्छन्न , Ck -सकीर्ण (for -सम्पन्न) Ñ V B D1 2 4 7 11–13 कदलीवन(D2 13 °दल)सच्छ(D1 °सपत्र , D2 4 12 °संछन्न , D11 13 °सच्छिन्न), D3 कदलीषडसंवृत , D6 बहुपक्षिमृगाकीर्णं —^{d}) Ś1 Ñ1 D1 2 4 12 13 सर्व- (for स्वादु-) Ś1 D12 -फलोपम , Ñ2 D1 2 4 13 -फलोपग , D3 11 °दक , L(ed) -फलैर्युत (for -फलोदकम्)

17 ^{a}) D6 M3 तत्र (for अत्र) B2 D11 राम (for नाम) —^{b}) G1 ऋषय (for मुनय-) Ś1 Ñ1 V1 B3 मश्रित , B1 D1 2 4–8 10 11 शमित-, D2 सुदृढ- (for संशित-) —D9 om (hapl ?) 17^c–18^c B reads 17^{cd} (second time) as in Ś1 after 18^{ab} —^{c}) Ñ2 V1 2 B D7 धर्म(Ñ2 D7 कर्म)शीला, V3 धर्मशीर्षा (for अधःशीर्षा) Ś1 Ñ1 D1 2 4 11–13 तपोबलसमायुक्ता —^{d}) Ś1 D1 2 4 12 13 नित्याधो, Ñ1 नित्यान्ते, D3 11 नित्यशो, L(ed) नित्यदा (for नियतं) Ñ2 V B D7 नित्यं(V1 ~, B1 सत्य) वायुजलाशना , M1 नियताजलिशायिन

18 D9 om 18^{abc} (cf v l 17). D12 om from 18 up to प्राका in 19^b —^{a}) B3 D8 10 Ct रात्रे (for -रात्र-) V1 अहोरात्र-, B1 अहोरात्रे (for सप्तरात्र-). —^{b}) Ñ1 जलशायिन , D6 वल्कवासिन , D8 10 [अ]चल° (for वनवासिन) Ś1 D1–4 11 13 वायुभक्षा जितेन्द्रिया , Ñ2 V B D7 मौनव्रतपरायणा —After 18^{ab}, B reads 17^{cd} (second time) as in Ś1 —^{c}) V1 दिव्य, B1 दिव्य- (for दिवं) —^{d}) D1 M2 सप्त ते, D9 सप्तभि (for सप्तभि) D4 कसलेश्वरा (sic), D6 M1 सकलेवर (M1 °रै)

19 D12 om up to प्राका in ^{b} (cf v l 18) —^{a}) Ś1 Ñ2 V B4 D1–4 7 11 13 T2 G2 3 M2 एव, Ñ1 B1–3 एष, D6 इद, D8–10 Ct एतत्- (for एवं-) Ñ1 V1 3 B1–3 D2 4 8 10 -प्रभावेण, D9 पुरा भावेण (hypm), M3 -प्रभावाना (for -प्रभावेन) —^{b}) Ś1 Ñ1 D1 3 4 11 12 T1 3 संवृत , D6 संभव (for -संवृतम्) Ñ2 V B D7 कदलीवनसंवृत , D2 13 तेषामाकारसंभव —^{cd}) T1 3 आश्रम सुदुराधर्ष (metri causa) (for ^{c}) Ś1 Ñ1 D1–4 11–13 आश्रम स (D1 3 °मस्तु, D4 11 12 °म सु) दुराधर्षो(Ś1 Ñ1 °र्षं) देवैरपि सदामरै , Ñ2 V B D7 आश्रम सुदुराधर्ष (D7 °र्षे) सेन्द्रैरपि सुरासुरै

20 ^{a}) Ś1 Ñ1 D4 12 [ए]त, Ñ2 V B D1 3 7 11 [ए]नं, D2 [ए]ते (for [ए]तत्) D6 पक्षिणो विजयत्येतान्, D13

विभूषणरवाश्चात्र श्रूयन्ते सकलाक्षराः ।
तूर्यगीतस्वनाश्चापि गन्धो दिव्यश्च राघव ॥ २१
त्रेताग्नयोऽपि दीप्यन्ते धूमो ह्येष प्रदृश्यते ।
वेष्टयन्निव वृक्षाग्रान्कपोताङ्गारुणो घनः ॥ २२
कुरु प्रणामं धर्मात्मंस्तान्समुद्दिश्य राघव ।
लक्ष्मणेन सह भ्रात्रा प्रयतः संयताञ्जलिः ॥ २३

प्रणमन्ति हि ये तेषामृषीणां भावितात्मनाम् ।
न तेषामशुभं किंचिच्छरीरे राम दृश्यते ॥ २४
ततो रामः सह भ्रात्रा लक्ष्मणेन कृताञ्जलिः ।
समुद्दिश्य महात्मानस्तानृषीनभ्यवादयत् ॥ २५
अभिवाद्य च धर्मात्मा रामो भ्राता च लक्ष्मणः ।
सुग्रीवो वानराश्चैव जग्मुः संहृष्टमानसाः ॥ २६

G. 4 13 26
B 4. 13 28
L. 4. 9 25

पक्षिणश्च जयस्येते —^{b}) G2 वनगोचरा (for °चारिण) —^{c} Ñ1 देवाद् (for मोहाद्) Ñ2 V1 B D7 ये ह्येन, V2 ये **, V3 ये चैन, D9 T2 अप्यत्र, D11 G3 ये त्वत्र, M1 ये तत्र (for येऽप्यत्र) Ś1 D1 4 12 दैवाद्विशंति चेन्नत्र (D1 ये वात्र, D4 ये ह्यत्र), D2 13 द्वेषाद्विशति ये ह्यत्र (D13 ते ह्यत्र) —^{d}) Ś1 D1 2 4–6 8–10 12 13 Ct न निवर्तंति, Ñ1 निवर्तंनि न (for निवर्तन्ते न) D3 11 मोन्मादा विचरति ते

21 ^{a}) Ś1 Ñ1 V1 B2 4 D1 4 12 -रवोप्य (V1 B2 4 D1 4 °वो ह्य)त्र, Ñ2 V2 3 B1 3 D7 -वरो ह्यत्र, D2 13 M3 रव (M3 °वा) स्तत्र, D3 -रवश्चात्र (for -रवाश्चात्र) —^{b}) Ś1 Ñ V B D1–4 7 12 13 श्रूयते सकलाक्षर (B1 सकलाकरा, D1 सकथाक्षत, D3 सकथाक्षर) —^{c}) Ñ2 -शीत- (for गीत-) Ś1 Ñ1 D2 11–13 -स्वनश्चात्र, Ñ2 V B D7 -निनादश्च, D1 -रवश्चात्र, D3 -ध्वनिश्चात्र, D4 -स्वनश्चैव, D5 8 10 -स्वनश्चापि, D6 T2 M1 2 -स्वरा (M2 °र) श्चापि, T1 3 -स्वराश्चात्र, G1 -रवाश्चापि, M3 -स्वनाश्चात्र (for -स्वनाश्चापि) —^{d}) D3 गवा दिव्याश् (for गन्धो दिव्यश्) Ś1 D12 वायत, D1 वायति, D2 13 जायते, G (ed) वायुत (for राघव)

22 ^{a}) D11 च (for ऽपि) D3 तथाग्नयश्च —^{b}) T2 [ऽ]प्येष (for ह्येष) G1 प्रकाशते (for प्रदृश्यते) D2 11 येषामेष प्रदृश्यते, T1 3 M3 धूमो ह्यत्र प्रकाशते —For 22^{ab}, Ś1 Ñ1 D1 2 4 12 13 subst

293* त्रेताग्नयश्च दृश्यन्ते तेषामेव महात्मनाम्।
[After दृश्यन्ते, Ñ1 wrongly reads 21^d],
while Ñ2 V B D7 subst

294* दृश्यन्ते चाग्नयो दीप्तास्तेषामत्र महात्मनाम् ।

[(l 1) B1 3 एव (for अत्र) V1 महात्मन (for °नाम)] —D11 transp 22^{cd} and 23^{ab}. —^{c}) Ś1 D12 वे- (D12 वे) ष्टवीव च, D1 2 4 13 वेष्टयन्तीव (for वेष्टयन्निव) Ś1 D12 वृक्षाग्रा, D2 दीक्षाग्रान, D13 दीक्ष्याग्न्यान (for वृक्षाग्रान) Ñ2 V B D7 वृक्षश्च दृश्यतेथापि, D3 11 वेष्टयन्नाग्न धूम —^{d}) Ñ2 V B2–4 D7 महान, T1 3 G3 M1 [ऽ]नन, M2 वन (for घन) Ś1 D1 2 12 -[अ]ग्नाभ्रजा (for -[अ]ङ्गारो घन) Ñ1 कपोता गन्धाश्रजा, B1 नाम तदाग्गो महान; D2 12 कपोतवर्णाभ्रजान, D4 कपोतागारवर्चेन —After 22, D5 6 8–11 (D11 after 23^{ab} [transp]) S 1r c :

295* एते वृक्षा प्रकाशन्ते धूमसंसक्तमस्तका ।
मेघजालप्रतिच्छन्ना वैदूर्यगिरयो यथा।

[(l 1) G2 सक्त (for समक्त-) D6 मध्या, I2 M1 -मध्दा, G1 वध्धा (for मस्तका) —(l 2) D3 11 नीलमेघ, G2 मेघमाला- (for मेघजाल) D6 -परिच्छन्ना, D11 -प्रतिच्छन्ना (for -प्रतिच्छन्ना) D3 5 6 8–10 G M Ck वैदूर्य (for वैदूर्य)]

23 D11 transp 22^{cd} and 23^{ab} —^{a}) Ś1 Ñ2 V B1–3 D1–4 7 11–13 G1 धर्मज्ञ, M2 धर्मात्मा (for धर्मात्मस्) Ñ1 रूपप्रमाणधर्मज्ञ —^{b}) D3 6 I2 G1 M2 Ct तेषाम, Cg k as in text (for तान्सम्-) Ñ2 V B D7 नानुद्दिश्य तपोधनान —After 23^{ab} (transp), D11 ins 295* —^{d}) V2 प्रणत (for प्रयत) D1–5 7–13 सह (D3 °हि) ताञ्जलि, G2 3 सन्कृ°, M2 च कृ° Ñ2 लक्ष्मणेन कृताञ्जलि, G1 नियतश्च कृताञ्जलि

24 B3 om 24–25, Ś1 D12 om (hapl) 24–25^b —^{a}) D6 [इ]ह (for हि) Ñ1 D1 2 4 11 13 मुनीन्ये तु (for हि ये तेषाम्) —D10 om (hapl) from ^{b} up to तेषाम् in ^{c} —^{b}) M1 3 मुनीना (for ऋषीणा) Ñ2 V2 B4 D7 मशितात्मना, B1 अमितात्मना, B2 अमितात्मना, D3 ह्यग्नेजसा (for भाविता°) Ñ1 D1 2 11 13 सदेवा तु (D2 13 °दैव) प्रनेजस, D4 सदैवान्यप्रचेतस —^{c}) D2 नु तदा काचिच, D13 तनुजा काचित् (for अशुभ किंचित्) D6 8–10 T1 विद्यते (for दृश्यते) D2 4 13 समदृश्यते Ñ2 V1 D7 कदाचिदुपलभ्यते, V2 B1 2 कदाचिदुपपद्यते, V3 B4 कदाचिदपि वर्तते (B4 विद्यते)

25 B3 om 25, Ś1 D12 om 25^{ab} (for all, cf v l. 24) —^{b}) Ñ1 B1 D1 2 4 11 13 प्रयत महाञ्जलि —^{c}) Ś1 Ñ1 D1 2 4 11 12 महातेजास (D2 °भागाद्), D2 13 च तेषा चे (for °त्मानस्) G3 M2 महात्मान समुद्दिश्य (by transp) —Ś1 D4 om 25^d–26^c —^{d}) D11 मुनीन (for ऋषीन) —For 25^{cd}, Ñ2 V B1 2 4 D7 subst

296* स निश्चित्य नमश्चक्रे महर्षीन्मशितव्रतान।

[Ñ2 V1 B1 2 नमश्च (meta ?) (for नमश्च). B1 2 अमितव्रतान]

26 Ś1 D. om 26^{abc} (cf v l 25) —^{a}) D12 अनुवाद्य (for अभि°) D1 2 4 12 T1 2 G2 3 M1 2 तु, D6 स

27 29 21 ते गत्वा दूरमध्वानं तरसात्सप्तजनाश्रमात् । ददृशुस्तां दुराधर्षां किष्किन्धां वालिपालिताम् ॥ २७

इति श्रीरामायणे किष्किन्धाकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

१४

सर्वे ते त्वरितं गत्वा किष्किन्धां वालिपालिताम् ।
वृक्षैरात्मानमावृत्य व्यतिष्ठन्गहने वने ॥ १
विचार्य सर्वतो दृष्टिं कानने काननप्रियः ।
सुग्रीवो विपुलग्रीवः क्रोधमाहारयद्भृशम् ॥ २
ततः स निनदं घोरं कृत्वा युद्धाय चाह्वयत् ।
परिवारैः परिवृतो नादैर्भिन्दन्निवाम्बरम् ॥ ३

(for च) Ñ1 D7 महातेजा (for च धर्मात्मा) —^{b}) Ñ1 वीर स-, D1 2 11–13 वीरश्च, D9 भ्राता च (for भ्राता च). D7 राम सामित्रिरेव च —^{c}) Ñ1 D1 2 11–13 सुग्रीवश्च महातेजा —^{d}) Ñ1 D1–3 12 13 ते हृष्ट- (for सहृष्ट-) D9 -मानस (for °नसा) Ś1 D4 11 जग्मुस्ते हृष्टमानसा —For 26, Ñ2 V B D7 subst

297* स च प्रणम्य तान्विप्रास्ततो भूय सलक्ष्मण ।
ससुग्रीव पुनर्हृष्टो गुहामभिमुखोऽव्रजत ।

[(l 1) B4 रामो (for ततो) —(l 2) B1 सुग्रीवश्च (for ससुग्रीव) B1–3 यथा, D7 [ऽ]भवत् (for ऽव्रजत)]

27 D2 4 11 13 read 27 before 4 14 1 —^{b}) D1 3 11 -[आ]श्रयात् (for °मात्) —^{c}) D2 13 ते (for ता) B4 सुदुर्धर्षां (for दुराधर्षां) —^{d}) Ś1 किष्किन्दा, Ñ2 D7 °न्ध्या (for किष्किन्धा) Ñ1 किष्किधा वालिन पुरीं —After 27, Ś1 D1–4 11–13 ins

298* बहुपादपगुल्माढ्या वानरैर्बहुभिर्वृताम् ।
अकुतश्चिद्भया रम्यामुच्चतोरणमण्डिताम् ।

[(l 1) Ś1 -गुल्मा+यां (sic) —(l 2) D1 विनिगन (for अकुतश्चिद्). D1 3 -प्राकार- (for -तोरण)],

while D5 6 8–10 S ins

299* ततस्तु रामानुजरामवानरा
प्रगृह्य शस्त्राण्युदितोग्रतेजस ।
पुरीं सुरेशात्मजवीर्यपालिता
वधाय शत्रो पुनरागतास्त्विह ।

[(l 2) D6 M1 3 [उ]दि(M1 .)ताग्र, J °ताग्र्य, G2 °तार्क, G3 [अ]मितोग्र (for [उ]दितोग्र) —(l 3) G1 2 सुरेन्द्रात्मज- (for सुरेशा°) D6 वालि- (for वीर्य-) —(l 4) D6 T G M2 सह, M1 तत (for स्त्विह) M3 पुरमागता सह]

Colophon Ś1 Ñ2 V2 B D1 7 12 om colophon, V1 reads after 300* —*Sarga name* Ñ1 V3 सप्तजनाश्रमदर्शन, V1 सप्तजनानुकीर्तन, D2 4 11 13 सप्तजनाश्रमवर्णन, D7 पुन प्रयाण —*Sarga no* (figures, words or both) Ñ1 D2 4 om, V3 14, D3 5 6 8–10 S 13 (as in text), D11 9, D13 10 —After colophon, G1 3 conclude with श्रीरामाय नम, G2 with श्रीरामचन्द्राय नम

14

Ś1 Ñ2 V2 B D1 7 12 continue the previous Sarga M1 begins with श्रीरामाय नम

1 D2 4 11 13 read 4 13 27 before 1 V B1 om, B2 reads in marg 1^{ab} —^{a}) Ś1 D2 4 12 13 ता सर्वे, Ñ B2 3 D1 3 7 11 ते सर्वे (by transp), B4 ततस्ते (for सर्वे ते) B3 त्वरिता (for त्वरितं) —^{b}) Ś1 किष्किन्दा Ś1 Ñ2 B1 D T2 G M1 2 वालिन पुरीं, B4 वानरीगुहा (for वालिपालिताम्) B2 किष्किधावालिन पुरीं —^{c}) Ś1 D3 4 12 वृक्षैरावृत्य चात्मान, Ñ1 D1 2 11 13 वृ(D1 ह)क्षैरावार्य चात्मान, Ñ2 V B1–3 D7 वृक्षैर्देहास्तथा(B2 °न्समा)वृत्य —^{d}) V1 तिष्ठन्स, V2 तिष्ठन्सु-, D2 13 व्यतिष्ठद् (for व्यतिष्ठन्) B4 व्यतिष्ठत तत पुन, D3 व्यतिष्ठत सर्वत (sub'n) —After 1, Ñ2 V B1–3 D7 ins

300* राघवाश्च सुग्रीवो हनुमत्प्रमुखाश्च ते ।

[D7 राघवोऽथ च (for °वाश्च) V1 B1–3 हनूमत]

—Thereafter, V1 reads colophon of Sarga 13

2 Ñ2 V B D7 read 2 (followed by 301*) after 18 —^{a}) Ñ1 विसृज्य, Ñ2 D5–10 T1 3 G2 M2 विसार्य, V2 3 विधाय, D3 G3 विचाल्य, D4 विस्तार्य, M1 प्रसार्य (for विचार्य) G1 स ततो (for सर्वतो) —^{c}) D4 om (hapl) ग्रीवो विपुल Ś1 D12 विपुलक्रोध —^{d}) V1 B2 3 आहारयेत्, D3 13 M3 आहरयत् Ś1 Ñ1 D1 2 4 11–13 तदा, Ñ2 V B D3 7 पर (for भृशम्)

3 D3 om 3–4^{b} —^{a}) D5 8–10 तु, T1 सु- (for स) Ś1 Ñ1 D1 4 11 12 व्यनदद्, D2 13 व्यनदन् (for निनद) —^{b}) Ś1 Ñ1 D1 2 4 11–13 वालिनोह्वानकाङ्क्षया(Ñ1 D2 13

अथ बालार्कसदृशो दृप्तसिंहगतिस्तदा ।
दृष्ट्वा रामं क्रियादक्षं सुग्रीवो वाक्यमब्रवीत् ॥ ४
हरिवागुरया व्याप्तां तप्तकाञ्चनतोरणाम् ।
प्राप्ताः स्म ध्वजयन्त्राढ्यां किष्किन्धां वालिनः पुरीम् ॥ ५
प्रतिज्ञा या त्वया वीर कृता वालिवधे पुरा ।
सफलां तां कुरु क्षिप्रं लतां काल इवागतः ॥ ६
एवमुक्तस्तु धर्मात्मा सुग्रीवेण स राघवः ।
तमथोवाच सुग्रीवं वचनं शत्रुसूदनः ॥ ७
कृताभिज्ञानचिह्नस्त्वमनया गजसाह्वया ।
विपरीत इवाकाशे सूर्यो नक्षत्रमालया ॥ ८

G 4 13 33
B 4 14 10
L 4 9 33

°कारणात्), G1 युद्धाय च समाह्वयत् —^{c}) Ś1 Ñ1 D1 2 4 11 12 परिगाढ, D5 om, D13 परिगाढे (for परिवार्य) Ñ1 परिहितो, D1 परिहृतो, D2 13 परावृत्तो (for परिवृतो) —^{d}) Ś1 D12 मेघैर्भिन्नम् (for नादैर्भिन्दन्) D13 नाद भिदति चाबर (sic) —For 3, Ñ2 V B D7 subst and read after 2

301* ननादोच्चैर्गुहा सर्वां शब्देनापूरयन्निव ।
गाढं निवसितः श्रीमानाह्वयद्वालिनं युधि ।

[(1 2) Ñ2 विवसितः, V1 3 निवेशितः, V2 निरम्मितः, B2 निनादितः, B4 निवमतिः, D7 विरम्मितः, G(ed) निरसितः (for निवमितः) B4 रणे (for युधि)]

—After 3, D5 6.8–10 S ins

302* गर्जन्निव महामेघो वायुवेगपुरःसरः ।

[G2 (after corr as above) महातेजो (for °मेघो) D5 -समन्वितः, G3 -पुर मर (for -पुरःसरः)]

4 D2 4 om 4^{ab} —^{b}) T2 -पतिस् (for गतिस्) D5 8–10 T2 M2 तत (for तदा) D3 दृष्ट्वा सहर्षणो यथा —For 4^{ab}, Ś1 Ñ1 D1 2 4 11–13 subst

303* अथ जीमूतमकाशं दीप्तसहर्षणोद्धितम् ।

[D1 2 11 13 जीमूतसङ्काशो Ñ1 D1 2 12 13 दीप्तमघ(D2 13 °ह, D12 °क)र्षणोचिन(D1 2 13 °त), D4 दीवाद्दमा वर्षणोचित, D11 दीप्तसिंहर्षभो यथा (for the post half)],

while Ñ2 V B D7 subst

304* अथ राजीवताम्राक्ष दृप्तसिंहर्षभाञ्चितम् ।

[Ñ2 D7 -पत्राक्ष (for ताम्राक्ष) B2 दृष्ट- (for दृप्त) V1 3 दृप्तसिंहर्षभाविन, V2 दृप्तसिंहर्षभानिभ, B4 दृप्त सिंहमिव स्थित (for the post half)]

—^{c}) V1 3 B D7 वीक्ष्य, D9 दृष्ट्वा (for दृष्ट्वा) V2 वीक्ष्यमाण (for दृष्ट्वा राम) B2 क्रियादक्ष, D2 कृपा° (for क्रियादक्ष) —^{d}) D6 reads वाक्यमब्रवीत् in marg B4 रामम् (for वाक्यम्)

5 ^{a}) Ñ2 D7 हरिराट्पुरुगा, V1 हरिराघवपा(sic), G(ed) हरिराजगुहा (for हरिवागुरया) Ñ2 V B D7 दीप्ता, D3 11 गुप्ता (for व्याप्ता) ꙮ Cv हरिवागुरया वानरग्राहिण्या वागुरया ।, Cr हरिवागुरया शत्रुभूतवानरग्राहिण्या वागुरया । यद्वा शत्रुवानरग्रहणार्थं विततामित्यर्थः ।, Cm हरिवागुरया शत्रुभूतवानरग्राहिण्या । यद्वा शत्रुग्राहकत्वेन वानरा एव निरूपिता, तया व्याप्ताम् ।, Cg हरिवागुरया हरय एव वागुरा मृगग्रहणपाश, तया व्याप्ताम् इतरदुष्प्रवेशामित्यर्थः । यद्वा हरिवागुरया हरिगृहे । जात्येकवचनम् । "वागुरा मृगशालिका" इति वैजयन्ती ।, Ck हरिवागुरया हरीणा शत्रुवानराणा प्राकारोपरिप्लवननिरोधिनी प्राकाराग्रप्रतिष्ठापिता वागुरा । तया तया व्याप्ताम् ।, Ct हरिरूपवागुरया व्याप्ता वागुराकारतया स्थितहरिकाम् ꙮ Ś1 Ñ1 D1 2 4 12 13 परितो(Ñ1 त्वरितो, D2 13 राम ता) नगरीं रम्या —^{b}) Ś1 D1 4 12 मृष्ट-, D2 10 स्पष्ट, D8 10 तदा (for तप्त-) V1 moth-eaten for तप्तका D3 5 8–11 T2 G1 3 M1 2 -भूषणा, D6 -भूपिता (for तोरणाम्) —^{c}) Ś1 V1 2 B4 D1 3 4 7 12 स्मो (for स्म) G2 पश्य प्राकार- (for प्राप्ता स्म ध्वज-) V1 B4 -पत्राढ्या, D3 7 12 -यन्त्राभ्या, D13 यन्त्राप्ता (for -यन्त्राढ्या) ꙮ Cr ध्वजयन्त्राढ्यामिति पाठः ।, Ck प्राकारयुद्धापेक्षितानि यन्त्राणि प्राकारयन्त्राणि तैराढ्या तथा ।, Ct ध्वजैर्यन्त्रैः प्राकारयुद्धापेक्षितैराढ्याम् ꙮ —^{d}) Ś1 किष्किन्दाम्, Ñ1 किष्किन्ध्याम् Ś1 Ñ1 D1–4 11–13 अतुलप्रभा, Ñ2 V B वालिपालिता (for वालिन पुरीम्) D7 किष्किन्ध्या वालिपालिता

6 ^{ab}) Ñ2 V B D7 या प्रतिज्ञा (by transp) Ñ1 B4 D2 5 8–10 13 transp त्वया and कृता Ñ2 V1 2 B1–3 D3 7 11 transp कृता and पुरा —^{c}) Ś1 D1 2 4 5 8–10 12 13 कुरु ता (by transp) —^{d}) Ñ2 V B D3 7 11 कुसुमितामिव, M2 काल इवागते (for काल इवागत) ꙮ Cv शङ्कुवन्निखातदारु लतामिव । लता काल इवागतामिति सम्यक् ।, Cr लता काष्ठमिवाहतमिति । काष्ठमुपपन्नदण्ड । आहत निखात । लतारोहणार्थं निखात दारु । ता लतामिव । लता काल इवागत इति सम्यक ।, Cg आगत काल फलकाल ।, Ck आगत काल ऋतुविशेषलक्षण सर्वथा लता प्राक् सपुष्पा सफला करोति तथा त्वत्कृतप्रतिज्ञा त्वमपि सफला कुर्वित्यर्थः ।, Ct यथा आगत कालो ऋतुविशेषरूपो लता प्राक् सपुष्पा तत सफला करोति तथा स्वकृतप्रतिज्ञा त्वमपि सफला कुर्वित्यर्थः ꙮ

7 ^{a}) Ś1 Ñ1 D1 4 12 स, B4 [ऽ]थ (for तु) —^{b}) Ś1 D1 4 12 तु, Ñ1 D11 च (for स) —^{cd}) Ś1 D1 2 4 12 13 प्रत्युवाचाथ, Ñ1 प्रत्युवाचेह, D3 11 अथ प्रोवाच, D5 6 8–10 T2 G1 3 M2 तमेवोवाच (for तमथोवाच) D3 5 8–11 G2 वचन सुग्रीव (by transp) D4 12 दूषण, G2 -सूदन (for सूदन) Ñ2 V B D7 सुग्रीव हर्षयन्वाक्यमुवाचेदमनतर

8 ^{b}) D2 4 13 मालया (for अनया) Ś1 Ñ1 D4 12 गजमालया, Ck नागसा° (for गजसाह्वया) ꙮ Cg गजपुष्प्यामेव गजमाशब्द । यद्वा गजेन समा आह्वा आख्या यस्या

34 10 अद्य वालिसमुत्थं ते भयं वैरं च वानर ।
34 एकेनाहं प्रमोक्ष्यामि बाणमोक्षेण संयुगे ॥ ९
मम दर्शय सुग्रीव वैरिणं भ्रातृरूपिणम् ।
वाली विनिहतो यावद्वने पांसुषु वेष्टते ॥ १०

यदि दृष्टिपथं प्राप्तो जीवन्स विनिवर्तते ।
ततो दोषेण मा गच्छेत्सद्यो गर्हेच्च मा भवान् ॥ ११
प्रत्यक्षं सप्त ते साला मया बाणेन दारिताः ।
ततो वेत्सि बलेनाद्य वालिनं निहतं मया ॥ १२

सा गजसाह्वा तया शोभस इति ।, Ck नागेन गजेन समाना आह्वा सञ्ज्ञा यस्या सा तथा । तया नागसाह्वया ।, Ct गजसाह्वया गजेन समाना आह्वा नाम यस्यास्तया ❀ —After 8^{ab}, D5 6 8–11 S ins

305* लक्ष्मणेन समुत्पाट्य यैषा कण्ठे कृता तव ।
शोभसे ह्यधिकं वीर लतया कण्ठसक्तया ।

[(l 1) D5 6 8–10 12 13 M1 एषा (for यषा) —(l 2) D5 6 9 M2 [ऽ]भ्यधिकं, D8 10 [ऽ]प्यधिकं, D11 M1 ह्यनया (for ह्यधिकं) D9 अनया शोभसे (for शोभसे ह्यधिकं) D9 11 मालया (for लतया) D5 lacuna for कण्ठसक्तया]

—B2 reads 8^{cd} in marg —^{c}) D2 13 विपरीतवद् (for विपरीत इव) ❀ Cv विपरीत विशेषेण परीत । अत्रान्ये अन्यथा बहु समुद्घुष्यन्ति । घर्मांशुमङ्क्षेपे सत्यपि तद्विपरीतशैत्यगुणयोगात् विपरीत शीतलांशु सूर्यं आकाशे नक्षत्रमालयेव शोभसे । अथवा औत्पत्तिकसूर्यो वा विपरीत इति केचित् । पौर्णमास्या तु यश्चन्द्र स सूर्य इति चोच्यते इति वचनात् नक्षत्रमालया विपरीत विशेषेण परीत पूर्णेन्दुरिव शोभसे इत्याहु ।, Cr g (Cg अत्राहु) विपरीते रात्रौ । सूर्य पूर्णचन्द्र । परीत तु दिवा प्रोक्त विपरीत तु शर्वरी । राकामध्यगतश्चन्द्र सूर्य इत्यभिधीयते इति वचनात् । यद्वा नक्षत्रमालया विपरीत विशेषेण परिवृत सूर्य इव चन्द्र इव । अन्यशब्देनान्यस्याभिधान कथमिति चेत् । 'नवो नवो भवति' इति श्रुतौ आह्ना केतु सूर्यश्चन्द्राप्यायकत्वाच्चन्द्रमा इत्युच्यते । तद्वच्चन्द्रोऽपि सूर्यकिरणानुप्र(Cg °णप्र)वेशायत्तप्रकाशविशेषवत्त्वात् सूर्यशब्देनाभिधीयत इति । यद्वा विशेषेण परीतो विपरीत नक्षत्रावृत सूर्य इवेत्यभूतोपमा । विपरीत इत्यनेन तात्कालिकतेजोवत्त्वमुच्यते । यद्वा विपरीते विपरीतकाले ।, Cm cites as in Cr g, Ck विपरीत इवा° इति अभूतोपमेयम् । सूर्यो नक्षत्रमालया सप्तविंशतिनक्षत्रचक्रेण आकाशे विपरीत विशेषेण परीतो वेष्टितो यदि भवति तद्वदित्यर्थ । यद्वा भट्टोऽमज्ञत यत्किञ्चित्प्रलपति तदुपेक्ष्यम् ।, Ct विपरीतो विशेषेण परीतो वेष्टित सूर्य इव । कविकल्पितोपमालीकोपमा । तेन तादृश सूर्यो यदि भवेत्तदा तरुणार्कवर्णस्य कण्ठसक्तशुकपुष्पमालस्योपमा स्यादित्यतिशयोक्तिरत्र व्यङ्ग्या । केचित्तु विपरीते इति सप्तम्यन्तम् 'परीत तु दिवा प्रोक्त विपरीत तु शर्वरी । पौर्णमासीगतश्चन्द्र सूर्य इत्यभिधीयते" इति व्याचक्षते ❀ —For 8, Ñ2 V D7 subst, B subst l. 1 for 8^{ab} and ins l 2 after 8^{cd}

306* कृतचिह्नस्त्वमनया मालया वानरेश्वर ।
विस्रब्ध वालिन भूय समाह्वय सखे युधि ।

[(l 2) B1 3 वानर (for वालिन)]

9 ^{a}) Ñ2 D7 तु, D4 त (for ते) —^{b}) Ñ2 V2 3 B1.3 D7 श्रम (for भय) Ś1 D1 2 12 13 शोक, Ñ2 V B D7 दुःख (for वैर) D4 त्रास शोक (for भय वैर) —^{cd}) Ś1 Ñ1 D1–4 11–13 प्रमार्जिष्ये, Cr वि°, Cm g t as in text (for प्रमोक्ष्यामि) M1 एषोऽहं प्रतिमोक्ष्यामि (for ^{c}) D3 11 12 (also) -क्षेपेण (for मोक्षेण) Ñ2 V B D7 नाशयाम्येकबाणेन सत्ये सत्येन ते शपे. ❀ Cr विमोक्ष्यामीत्ययमन्तर्भावितण्यर्थ ।, Cg प्रमोक्ष्यामि प्रमोचयिष्यामि । अनिट्त्वमार्षम् ।, Ct प्रमोक्ष्यामि प्रमोचयिष्यामि. ❀

10 ^{a}) Ñ2 V B D7 त पाप (for सुग्रीव) —^{b}) Ñ2 दारहारिणं, D7 reads in marg, D12 om (hapl) (for भ्रातृरूपिणम्) —^{c}) Ś1 Ñ1 D1 2 4 12 13 वालिन निहत, D9 11 क्षिप्र विनिहतो (for वाली विनिहतो) D12 दृष्ट्वा (for यावद्) —^{d}) G2 वन- (for वने) D6–10 चेष्टते, M2 वेष्टता, Cg as in text (for वेष्टते) Ś1 D12 चेष्टता वन पासव, Ñ1 D1 2 4 13 वेष्टता(D2 13 चेष्टते, D4 चेष्टत) वनपांसुषु, D9 11 चेष्टते पांसुगुण्ठित, D6 पुरा हि पांसु वेष्टते —For 10^{cd}, Ñ2 V B D7 subst

307* य तमद्येव बाणेन हत पांसुषु पातये ।

[Ñ2 D7 एनं, V1 यस्त्वं, V2 3 त्वतान्, B4 यावद् (for य तम्) V1 3 हत्वा (for हत) V B4 D7 पांसुषु (for पांसुषु) Ñ2 B4 D7 शायये, V2 नाशये (for पातये)]

11 ^{a}) Ś1 D12 याते (for प्राप्तो) —^{b}) Ñ1 न जीवन् (for जीवन्स) Ś1 D1 3 12 T G2 Cr न(D1 च) निवर्तते, Cg t as in text (for विनिवर्तते). Ñ2 V B D7 भूयो जीवन्व्रजेत(V3 °जु) स्व, D6 न स जीवन्नागमिष्यति, M1 न जीवन्स निवर्तते, Ck जीवन्भूत्वा निवर्तते —^{cd}) D6 reads after दोषेण up to भवान् in marg Ś1 Ñ1 D2–4 6 11 13 Cm मा, D1 वा, D12 स, Cr g k t as in text (for मा) D4 5 गच्छे (for गच्छेत्) D1 गर्हेत, D13 गच्छेच्च (for गर्हेच्च). Ś1 Ñ1 D1–6 8 10–12 G1 Ct मा, Cr m g k as in text (for मा) Ñ2 V B D7 तत्र शत्रुस्ततो मा त्व गर्हं (B भर्त्सं)येथा विगर्हित(B2 °र्हण)

12 ^{a}) D1 प्रत्यह (for प्रत्यक्ष) D11 वै (for ते) Ś1 Ñ1 D1–4 8–12 ताला, D6 शाला (for साला) Ñ2 V B1–3 D7 प्रत्यक्ष ते मया(V1 °हा) शाला, B4 प्रत्यक्ष ते मयैकेन, D13 प्रत्यक्ष समरे योधा —^{b}) Ñ2 V1 3 B1–3 D7 सप्त (for मया) D1 9 11 ताडिता (for दारिता) B4 सप्त शाला न दारिता —^{c}) T1 3 G2 M3 तेनावेहि (for ततो वेत्सि) Ś1 D12 तेनावे(D12 °वै)हि च वेगेन, Ñ1 ततो वेत्स्यद्य वेगेन, Ñ2 V2 3 B1–3 D7 तेनाद्य विद्धा(Ñ2 V2 वध्या [sic], D7 वधि [sic]) नियत(V2 °त), V1 तेन विद्याद्य

अनृतं नोक्तपूर्वं मे वीर कृच्छ्रेऽपि तिष्ठता ।
धर्मलोभपरीतेन न च वक्ष्ये कथंचन ॥ १३
सफलां च करिष्यामि प्रतिज्ञां जहि संभ्रमम् ।
प्रसूतं कलमं क्षेत्रे वर्षेणेव शतक्रतुः ॥ १४
तदाह्वाननिमित्तं त्वं वालिनो हेममालिनः ।
सुग्रीव कुरु तं शब्दं निष्पतेद्येन वानरः ॥ १५
जितकाशी जयश्लाघी त्वया चाधर्षितः पुरात् ।
निष्पतिष्यत्यसंगेन वाली स प्रियसंयुगः ॥ १६
रिपूणां धर्षणं शूरा मर्षयन्ति न संयुगे ।
जानन्तस्तु स्वकं वीर्यं स्त्रीसमक्षं विशेषतः ॥ १७
स तु रामवचः श्रुत्वा सुग्रीवो हेमपिङ्गलः ।
ननर्द क्रूरनादेन विनिर्भिन्दन्निवाम्बरम् ॥ १८
तस्य शब्देन वित्रस्ता गावो यान्ति हतप्रभाः ।
राजदोषपरामृष्टाः कुलस्त्रिय इवाकुलाः ॥ १९ G 1 17. 16 B 1 11. 21 L 1 9. 44

नियत [metri causa], B4 तेनावेह्यद्य नियत, D1 2 4 13 तेन वे(D2 °नावे)ह्यद्य वेगेन, D9 11 तेनावेहि प्रमाणेन —[d]) D5 8–10 रणे (for मया) Ñ2 V B D7 समरे हत (for निहत मया)

13 D9 om after अनृत नो in [a] up to 14[b] —[a]) Ñ1 ते, Ñ2 V B D7 हि, D1 च (for मे) —[b]) Ś1 D2 4 13 महा, Ñ1 महत्-, Ñ2 V B D1 7 12 मया, D5 8 10 चिर, M3 वीर्यं- (for वीर) B1 3 कृच्छ्रेण (for कृच्छ्रेऽपि) M1 कृच्छ्रे महति (for वीर कृच्छ्रेऽपि) Ś1 Ñ1 D1–4 11 12 वर्तता, D13 वर्तत, M1 2 तिष्ठत (for तिष्ठता) —T1 om 13[cd] —[c]) Ñ V B D1 3 7 11 धर्मलोप, T1 धर्मलोक- (for धर्मलोभ) Ś1 Ñ1 D2 4 12 13 प्रवृत्तेन, Ñ2 V B D7 -भयाद्वीर, D1 -प्रवृत्तोपि, D3 11 परीत ते (for -परीतेन) —[d]) Ś1 D12 नगरस्ये, D4 नगेरण्ये, D10 om न (for न च वक्ष्ये) Ś1 Ñ1 V B2 4 D1–4 7 11–13 कदाचन (for कथचन)

14 D9 om 14[ab] (cf v l 13) —[a]) Ñ2 V2 3 B D7 ते (for च) D12(marg also) करिष्याम (for करिष्यामि) —[b]) Ñ2 V B1–3 D7 सभ्रम त्यज, B4 त्यज सभ्रम (for जहि सभ्रमम्) —[c]) M1 कलमा, Cg as in text (for कलम) Ñ1 क्षेम (for क्षेत्रे) Ś1 D4 5 8–10 12 Ct प्रसू(Ś1 D4 12 °भू)त कलमक्षेत्र, B4 प्राप्तबीजमिव क्षेत्र, D1 प्रसून कलमाक्षेत्र, D2 13 प्रभूतकुवल(D13 °कुवलय [hypm]) क्षेत्रं, D3 11 प्रसूतकलमा(D11 °मला) भूमि, M2 प्रसूता कलमा क्षेत्रे —[d]) D13 वर्पणेव (for °णेव) —For 14[cd], Ñ2 V B1–3 D7 subst

308* प्राप्तबीजमिव क्षेत्र वृष्टिसर्गेण वासव ।
[B1–3 प्रोप्त- (for प्राप्त-)]

15 [a]) Ś1 D4 12 अवेक्षण, Ñ1 D1 अतोह्वान-, D2 13 नतोह्वान, D3 तदाऽऽव्हान-, D5 तवाह्वान- (for तदाह्वान-) Ñ1 ते, D5 8–10 M1 च (for त्व) Ñ2 V B1–3 D7 आह्वान (B1 3 °न)कारण त(V1 3 B2 °णात्त)स्माद् —[c]) Ñ2 V B D6 7 M1 2 सशब्द (for त शब्द) —[d]) D11 नि क्रमेद् (for निष्पतेद्) Ñ2 V B1–3 D7 स(Ñ2 न, D7 तद्) यथा पुन, D1 यदि वानर (for येन वानर)

16 [a]) D4 जिस्त्वेत (corrupt) (for जितकाशी) Ś1 Ñ1 D12 चल(Ñ1 D12 °ल) श्लाघी, Ñ2 V1 3 B1 2 4 D1 2 4 11 13 T1 G2 M1 (before corr as in text) बलश्लाघी, V2 रणश्लाघी, B3 जितश्लाघी, D5 गतश्लाघी, D7 वनश्लाघी, T2 जयश्लाघ्यो (for जयश्लाघी) —[b]) Ñ2 V2 B1 2 D7 चाभर्षित, D3 4 9 11 13 वा धर्षित Ñ1 D1–4 11 13 पुन (for पुरात्) Ś1 D12 त्वं(D12 त्वा) च धर्षितवान्पुरा —[c]) Ś1 Ñ V B D1–4 7 11–13 [अ]सगेन (for [अ]संगेन) D5 12 निष्पतत्येव वेगेन, D6 M2 निष्पतत्यविसङ्गेन(M2 °संगेण) —[d]) D6 च (for स) Ñ2 V1 2 B D7 समर, V3 दर्शन, D6 सयुत (for सयुग) Ś1 Ñ1 D1 2 4 12 13 वाली समर(D1 2 13 परम)दुर्जय,(Ñ1 °मद)

17 D6 reads 17[ab] in marg —[a]) Ñ1 रिपवो (sic), V B1–3 D7 रिपुणो (for रिपूणा) Ś1 Ñ V2 B D7 धर्षणा, D3 11 दर्शन, D5 8–10 T2 धर्षित, D6 13 धृषण, D12 om (for धर्षण) Ś1 Ñ1 D6 12 वीरा, Ñ2 V B1 3 4 D7 वीरो, B2 वीर, D1 शूर, D5 8–10 श्रुत्वा (for शूरा) —[b]) Ñ2 V2 3 B D7 मर्षये(Ñ2 °य)च्च न, D1 मर्षयन्ते न (for मर्षयन्ति न) V1 न मर्षयन्तिसंयुग —[c]) Ś1 D12 जानीमस्तु, Ñ1 D13 जानानस्तु, Ñ2 V1, 2 B4 D7 जानानो हि, V3 जानात्येव, B1–3 जानीमो हि, D1 जानमान, D2 जानतस्तु, D3 विजानीम, D4 जानातु स, D11 विजानाना, M1 जनय ? (sic) (for जानन्तस्तु) D3 स्वय (for स्वक) —[d]) D11 स्त्रीसमन्त (for स्त्रीसमक्षं)

18 [a]) Ñ2 V B D7 तद् (for तु), G1 स रामवचन श्रुत्वा —[b]) Ñ2 V B D7 हेमपिङ्गलक्षण कपि —[c]) Ś1 D12 ननाद (for ननर्द) D3 11 भीम (for क्रूर-) Ś1 D3 12 निर्ह्रादी, Ñ1 D. 13 निर्ह्रादात, D1 महानादे, D4 -निर्ह्रादी, D11 -निह्राद (for नादेन) Ñ2 V B D7 ननाद पुनरेवोच्चैर्(V2 °द्र, V3 illeg from वो up to र्न in [d]) —[d]) Ś1 Ñ V1 2 B D1–4, 7 11–13 नादैर्भि(V2 °र्भिन्द)न्नि(V1 B1 -°न्निव)वाम्बर, G1 M1 निर्भिन्दन्निव चाम्बर —After 18, Ñ2 V B D7 read 2 (followed by 301 *)

19 [a]) B1 2 तेन, D8–10 तत्र (for तस्य) D5 1 महता (for वित्रस्ता) —[b]) D1 हतप्रभा, D3 11 गतप्रभा, D6 गतप्रभा, T2 नतप्रभा (for हतप्रभा) Ś1 D2 4 12 13 यान्ति निहतप्रभा, Ñ2 V B D7 वसुधा(V1 B °प्रसु)र्शीमग्रिश —[c]) Ś1 Ñ1 D2 4 12 13 राज्ञो दोष, D3 नागदोषा

3 47
1 21
9 45 द्रवन्ति च मृगाः शीघ्रं भग्ना इव रणे हयाः ।
पतन्ति च खगा भूमौ क्षीणपुण्या इव ग्रहाः ॥ २०

ततः स जीमूतगणप्रणादो
नादं व्यमुञ्चत्त्वरया प्रतीतः ।
सूर्यात्मजः शौर्यविवृद्धतेजाः
सरित्पतिर्वानिलचञ्चलोर्मिः ॥ २१

इति श्रीरामायणे किष्किन्धाकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

(for राजदोप-) —d) N2 V B1-3 D7 इवातुरा, B4 इवोत्तमा (for इवाकुला)

20 a) Ś1 D1 2 4 12 13 भ्रमति, V3 दुद्रुवुश्, D3 द्रवति (for द्रवन्ति) Ñ1 स्र (sic), M3 न (sic) (for च) V1 प्रदुद्रुवुर् (for द्रवन्ति च) —b) D13 भयाद् (for भग्ना) V1 3 D3 11 वने (for रणे) D2 रणे इव (by transp) D3 11 द्विपा (for हया) —D5 om. 20cd —c) D11 [इ]व (for च) Ñ1 पतिताश्च (for पतन्ति च) V1 3 पेतुश्च खेचरा (V1 खगमा) भूमौ —d) Ñ1 द्विपा (for ग्रहा) D3 11 जना इव, M1 इवाम्बरात् (for इव ग्रहा) —For 20, Ñ2 V2 B D7 subst, V1 3 cont after 311

309* व्यद्रवंश्च भयाद्भीता दिशो दश गजास्तथा ।
गुहागता मृगेन्द्राश्च वित्रसु शब्दधर्षिता ।

[(l 1) Ñ2 D7 व्यद्रवन्, B1 प्राद्रवंश्च (for व्यद्रवंश्च) V1 B2 वन (for दश) —(l 2) Ñ2 V1 D7 निर्गता (for वित्रसु)]

B1 cont

310* ततोऽब्रवीन्महाप्राज्ञ सुग्रीवो राघवं वच ।
प्राप्ता स्म पुनरेवेमां किष्किन्ध्यां वालिपालिताम् ।
कुरु कल्याणमत्यत्र प्रतिज्ञां सफलां कुरु ।
तत्तथेति प्रतिज्ञाय विश्वस्य च पुन पुन ।
स तु रामवच श्रुत्वा सुग्रीवो हेमपिङ्गल । [5]
प्रहर्षमतुलं लेभे सम्भ्रमं त्यज्य दूरत ।

—After 20, V1 3 ins.:

311* पर्वत स च कैष्किन्धो बहुकन्दरनिर्झर ।
अकरोद्बहुलं नाद गुहासु प्रतिनिस्वनैः ।

[(l 1) V1 ... निर्झर (moth-eaten) (for the post half) —(l 2) V1 अकरो ... नाद (for the prior half)]

Thereafter they cont 309*

21 Ñ2 V B D7 om 21 —a) Ś1 Ñ1 D1 4 12 स तत्र, D2 13 सर्वत्र (for तत स) Ś1 D8–10 -कृत, Ñ1 D2–4 11–13 -सम-, D1 -सम, D5 इव, M1 -निभ- (for -गण-) Ś1 Ñ1 D1 3 11–13 -प्रणाद, D2 -प्रनाद (for -प्रणादो) —b) D1 वीरो, D10 नादान (for नाद) Ś1 D1 2 6 12 13 T2 M1 विमुचस्, D4 प्रमुचस्, D5 ह्यमुचस्, D8 T1 3 G1 M3 ह्यमुचत्, Cv r as in text (for व्यमुञ्चत्) ❀ Cv r नादं व्यमुञ्चदिति पाठ ❀ M2 प्रनीत (for प्रतीत) Ñ1 विमुच्य वीरस्त्वरया प्रनीत, D3 11 विमुच्य नाद परमप्रतीत —c) Ñ1 D6 सूर्य, D5 G1 क्रोध- (for शौर्य) D13 -विवृद्धि- (sic), G1 -समृद्ध- (for -विवृद्ध) D3 11 वेग (for -तेजा) —d) Ñ1 सरस्वती (for सरित्पतिर्) Ś1 D2 4 12 13 पर्वणि (for वानिल) ❀ Cv r वानिलचञ्चलोर्मिरिति पाठे वा शब्द इवार्थे ❀

Colophon —*Sarga name* Ś1 D2 4 12 वालिसमाह्वान (D2 °ह्वय, D4 °ह्वान), Ñ1 सुग्रीवदर्शन, V B किष्किन्धागमन, D1 पुनर्युद्ध, D3 सुग्रीवप्रहर्षण, D11 सुग्रीवहर्षण, D13 वालिसमाजय —*Sarga no* (figures, words or both) Ś1 Ñ1 V1 2 B1 2 D2 4 12 om, Ñ2 11, V3 15, B4 D7 13, D1 8, D11 10, D13 11 —After colophon, G1 3 conclude with श्रीरामाय नम, G2 with श्रीरामचन्द्राय नम

१५

अथ तस्य निनादं तं सुग्रीवस्य महात्मनः ।
शुश्रावान्तःपुरगतो वाली भ्रातुरमर्षणः ॥ १
श्रुत्वा तु तस्य निनदं सर्वभूतप्रकम्पनम् ।
मदश्चैकपदे नष्टः क्रोधश्चापतितो महान् ॥ २
स तु रोषपरीताङ्गो वाली संध्यातपप्रभः ।
उपरक्त इवादित्यः सद्यो निष्प्रभतां गतः ॥ ३
वाली दंष्ट्राकरालस्तु क्रोधाद्दीप्ताग्निसंनिभः ।
भात्युत्पतितपद्माभः समृणाल इव ह्रदः ॥ ४
शब्दं दुर्मर्षणं श्रुत्वा निष्पपात ततो हरिः ।
वेगेन चरणन्यासैर्दारयन्निव मेदिनीम् ॥ ५
तं तु तारा परिष्वज्य स्नेहाद्दर्शितसौहृदा ।
उवाच त्रस्तसंभ्रान्ता हितोदर्कमिदं वचः ॥ ६
साधु क्रोधमिमं वीर नदीवेगमिवागतम् ।
शयनादुत्थितः काल्यं त्यज भुक्तामिव स्रजम् ॥ ७ G 4 14 7 B 4 15 7 L 4 10 6

15

M1 begins with श्रीरामाय नम

1 a) Ś1 D4 12 च, Ñ2 B1 3 4 D1 2 6 7 13 G2 M3 तु, D3 11 म (for त) —b) V1 2 B [अ]भिगर्जत, V3 [अ]भिगर्जित (for महात्मन) —c) V2 सुग्रीव, D4 श्रुत्वा च (for शुश्राव) B4 [अ]न्तर्गृहगतो —d) D2 13 वाली सध्यातपप्रभ

2 V2 om 2ab —a) T2 निनद तस्य (by transp). Ś1 Ñ1 D1–4 11–13 श्रुत्वा तस्य निनाद त(Ś1 D12 तत्), Ñ2 V1 3 B D7 श्रुत्वैव च निनाद त(B1 तु) —b) Ś1 D1–4 11–13 सत्त्व- (for -भूत-) Ñ2 V1 3 B D7 वालिनो दारुण पुन (Ñ2 D7 स्वर, V1 वच) —c) Ś1 D12 सर्वेश (for मदश्) Ñ2 V1 3 B D7 एकपदे (for चैक°) D2 13 महच्चैकपदे नष्ट, D3 मदस्त्वेकपदे भ्रष्ट —d) D3 11 [उ]-त्पतितो, D5 8-10 T G3 M1 2 Ck t [आ]पादितो, Cg as in text (for [आ]पतितो) Ś1 D4 12 क्रोधेनाधिष्ठि(D4 °कृ)-तोभवत्, Ñ1 क्रोधेनाप्यायितोभवत्, Ñ2 V2 D7 क्रोधश्चास्याग(V2 °प्र)तोभवत्, V1 3 B1–3 क्रोधश्चास्य यतो(V1 B3 ततो, V3 यथा)भवत्, B4 क्रोधश्चास्यायतोभवत्, D1 2 13 क्रोधेन विकृ(D1 क्षोभि)तोभवत्

3 a) Ś1 D1 2 4 12 13 स हि, D5 8–10 T1 3 ततो, Cv m g k as in text (for स तु) Ñ2 V B D7 स रोप-ताम्रनयनो —b) D1 वाली स ताम्रलोचन, D2 3 वाली बालातपप्रभ, D5 वाली सध्याघनप्रभ, D8–10 वाली स कनक-प्रभ —d) V2 सोमो (sic) (for सद्यो) Ś1 Ñ1 D1–4 11–13 व्याकुलता (for निष्प्रभता)

4 ab) D1 व्यालो (for वाली) Ñ1 च, G3 -[आ]स्य (for तु) Ś1 D4 क्रोध- (for क्रोधाद्) Ś1 D1 4 11–13 -स(D11 सु)प्रभ, D5 8–10 -लोचन (for संनिभ) Ñ2 V B D7 दष्ट्राकरालवदन क्रोधताम्रतराकृति —c) D5 [उ]-त्पला°, Cr m g k t as in text (for [उ]त्पतित-) D1 -पत्राक्ष, D2 13 -पत्राक्षे, D6 पद्म°, K(ed) -पद्मस्तु (for -पद्माभ) Ś1 D4 12 भाति स्म पतितै पत्रै, Ñ2 V B1–3 D3 7 11 वभ्राजोत्फुल्लनयन (D3 11 °पत्राक्ष), B4 बभौ फुल्ल वृहत्पत्र, M1 विभात्युन्निद्रपद्माभ ❀ Cr m उत्पतितपद्माभ गजादिभिरुद्धृतपद्माभ ।, Cg उत्पतितपद्म विकसितरक्तोत्पल । उत्पतितपद्माभ इति पाठे उत्पतिता स्वोपरि प्रसृता पद्मानामाभा यस्मिन्स इत्यर्थ ।, Ck उत्पतितानि उत्पादितानि पद्मानि यस्य स उत्पतितपद्म । अय शब्द आवर्तते । उत्पतितपद्मत्वात् उत्प-तिता नष्टा पद्माभा पद्मजनिता शोभा यस्य स तथा ।, Ct उत्पतितपद्मेत्येकदेशे तन्त्रम् । उत्पतितैरुद्धृतै पद्मैरुत्पतिता नष्टा पद्मकृतशोभा यस्य तादृश ❀ —d) Ś1 D4 12 [अ]म्बुज, D1 [अ]म्बुद, D3 न्म (for ह्रद) Ñ1 सबलाक इवाम्बुद, D2 13 समृणालमिवाम्बुजं

5 a) Ś1 D4 सदा दुर्ध(D4 °र्म)र्षण शीघ्र, Ñ1 शब्दा-द्दुर्धर्षण शीघ्र, Ñ2 V B D7 सो(Ñ2 सा, V1 B1 3 अ, V2 आ)मर्षवशमापन्नो, D1 शब्दादमर्षण शीघ्र, D2 शब्ददुर्मर्षण शीघ्र, D3 11 13 स तु(D13 च) दुर्मर्षण शीघ्र, D12 स तदा-मर्षण शीघ्र —b) V1 D2 3 11 13 निपपात (for निष्पपात) Ñ2 V B D7 हरीश्वर —c) D5 8–10 T2 च पद- (for चरण-) —d) Ñ2 V B D1 2 4 7 12 13 कम्पयन् (for दारयन्)

6 a) G2 (after corr *sec m* as in text) रामा (for तारा) —b) Ś1 D1 2 4 12 13 स्नेहादभ्येत्य सौहृदात् (Ś1 D12 गौरवात्) —c) Ś1 Ñ1 D2 4 12 भृश-, D3 6 11 G2 M2 त्रास- (for त्रस्त-) D1 G3 उवाच च स(G3 सु)-सभ्राता(D1 °त) ❀ Ck त्रस्तसभ्रान्तेति पुवद्भाव । त्रस्ता भीता । सभ्रान्ता क्षुभितचित्ता ।, Ct त्रस्तसभ्रान्ता । कर्मधारये पुंवत्वम् । त्रस्ता भीता, सभ्रान्ता क्षुभितचित्ता ❀ —d) Ś1 Ñ1 D1 2 4 11–13 क्लीबोदर्कम् (for हितो°) D3 क्लीबोदर्कहित वच —For 6, Ñ2 V B D7 subst

312* तमुवाच ततस्तारा भर्तार वानराधिपम् ।
परिष्वज्य भयाद्रित्थ निष्पतन्त गुहामुखात् ।

[(l 1) B1-3 वानरेश्वर (for °राधिपम्) —(l 2) V1 3 B1 निपतन्त (for निष्प°) Ñ2 V1 B4 D7 गुहागृहात् (for °मुखात्)]

7 a) Ś1 D12 सानुक्रोशम्, Ñ1 साधु कोपम्, D2 स तु

सहसा तव निष्क्रामो मम तावन्न रोचते ।
श्रूयतामभिधास्यामि यन्निमित्तं निवार्यसे ॥ ८
पूर्वमापतितः क्रोधात्स त्वामाह्वयते युधि ।
निष्पत्य च निरस्तस्ते हन्यमानो दिशो गतः ॥ ९
त्वया तस्य निरस्तस्य पीडितस्य विशेषतः ।
इहैत्य पुनराह्वानं शङ्कां जनयतीव मे ॥ १०
दर्पश्च व्यवसायश्च यादृशस्तस्य नर्दतः ।
निनादस्य च संरम्भो नैतदल्पं हि कारणम् ॥ ११
नासहायमहं मन्ये सुग्रीवं तमिहागतम् ।
अवष्टब्धसहायश्च यमाश्रित्यैष गर्जति ॥ १२

क्रोधम्, D13 समुत्क्रोधम् (sic) (for साधु क्रोधम्) Ś1 T2 इव (for इम) —After 7^{ab}, Ś1 D1–4 11–13 ins

313* धर्ममालम्ब्य रतिमाश्रियन्तु त्वमिहार्हसि ।

—D12 om 7^{c}–8^{b} —^{c}) Ñ2 B D1 6 7 11 वाक्य, V1 माल्य, D2 4 13 काव्ये, D5 T1 3 काव्ये, Cv m g k t as in text, Cr काल (for वाक्य) Ś1 D7 शयनादुत्थित क्रोध —^{d}) D1 भुक्तम् Ñ2 V2 3 B D7 माल्य भुक्तमिव त्यज, V1 त्यज तोयमिव त्यज(sic), D2 13 त्यज भुक्तमिवाश्रय —After 7, D5 6 8–10 S ins

314* काव्यमेतेन सग्राम करिष्यसि च वानर ।
वीर ते शत्रुबाहुल्य फल्गुता वा न विद्यते ।

[(l 1) D6 कारणम् G3 M1 कपीश्वर (for च वानर) —(l 2) G1 om ते (subm) Ck फल्गुना (for फल्गुता)]

8 D12 om 8^{ab} (cf v l 7) —^{a}) Ś1 Ñ1 D1 2 4 13 सहसा ते विनिर्गन्तु, Ñ2 V B D7 तवाय सहसा भूयो(V1 °मा) —^{b}) Ś1 Ñ1 D2–4 11 13 मम बुद्ध्या, Ñ2 V B D7 निर्गमो मे, D1 अबुद्ध्या मे (for मम तावन्न) —^{c}) Ñ2 V2 3 B1–3 D3 6 7 11 T G3 M2 3 चाभिधास्यामि, M1 त्वभिधास्यामि —^{d}) B4 D8 10 13 निवार्यते (for °र्यसे)

9 ^{a}) V1 आपतित, M1 त्वापतित (for आपतित) —^{b}) Ś1 Ñ1 D12 त्वामाह्वयति सयुगे, Ñ2 V B D7 त्वा स आ (V1 B2–4 समा)हूतवान्युधि, D1 2 13 तवाह्वानाय(D2 13 °नस्य) सयुगे, D7 11 कृताह्वानश्च सयुगे, D4 त्वामाह्वयत स्युगे ❀ Cv आह्वयते आह्वयत । व्यत्ययेन भूतार्थे लट् । स्मशब्दो वाऽध्याहार्य ।, Cr आह्वयते । पुनरेत्य स्थितस्य तस्य तदाह्वान मे शङ्का ससहायत्वशङ्का जनयतीति योजना । इव शब्दो वाक्यालङ्कारे । अवधारणे वा । आह्वान कृतवान् । व्यत्ययेन भूतार्थे लट् । स्मशब्दो वा अध्याहार्य ।, Cm g आह्वयते । पुनरेत्य स्थितस्यै(Cg °तस्य तस्य)तदाह्वान मे (Cm मम) शङ्का सहायवत्त्व(Cg सहायसहितत्व)शङ्का जनयतीव जनयत्येवेति(Cg जनयतीति) योजना ।, Ck आह्वयते स्म ।, Ct आह्वयत ❀ —After 9^{ab}, D7 reads 14^{cd} (including 319*) —^{c}) D2 13 निपत्य, D3 11 नि पत्य (for निष्पत्य) D1 यश्चिर स (for च निरस्तस्) Ñ1 च (for ते) —^{d}) D2 13 M1 दिश (for दिशो) —For 9^{cd}, Ñ2 V B D7 subst

315* भयाद्रुतस्त्वया सख्ये बलान्निष्पत्य निर्जित ।

[V3 बल, B2 4 निलत्र् (for बलान्) V3 D7 निष्पीड्य, B1 3 नि सत्य (for निष्पत्य).]

10 ^{a}) B2 तत्र त्वया (for त्वया तस्य) —^{b}) Ś1 Ñ1 D1 3 4 6 11 12 पीडितस्य, Ñ2 B मृदितस्य, V D7 13 मृदितस्य, D2 मृदितस्य(corrupt), D6 त्रिदितस्य (for पीडितस्य) B4 कपीश्वर (for विशेषत) —^{c}) Ś1 Ñ1 D1–4 11 12 पुनरेति, B1 3 इ येन (for इहैत्य)

11 ^{a}) G1 मदश्च (for दर्पश्च) ❀ Ct अय दर्पादि कारणविशेषपूर्वक कार्यविशेषत्वादित्यनुमितम् ❀ —^{b}) D1 4 12 श्रूयते (for नर्दत) Ś1 D12 श्रूयते त(D12 त्व)स्य तादृश, Ñ2 D7 9 यादृशोऽस्य नर्दत, V1 2 B यादृशस्तस्य नर्दत, V3 यादृशोऽस्य विनर्दत, D2 यादृशस्तस्य श्रूयते —V1 3 B1 om, while B2 reads in marg 11^{c}–12 —^{c}) B3 [स]स्य, T1 3 M3 [स]पि (for च) Ñ2 V2 B2(m)–4 D7 महानादो, D3 स्वनादो, M1 नर्दस्य (for संरम्भो) Ś1 D1 4 12 नदतश्चैव(D1 °नस्य) महानादो(D4 °रम्भो), Ñ1 श्रूयते तस्य निर्हादो, D2 11 13 नर्दतश्चैव महानादो(D11 स्वनादो, D13 महानादो) —^{d}) D1 2 4 12 13 नेदम्, G1 M2 न तद् (for नैतद्) Ñ2 V2 B2–4 D7 नैतदल्प(Ñ2 B4 °ल्प)प्रयोजन, D6 नैतदल्पस्य कारण. —After 11, V2 ins

316* सहसा प्रहसन्मन्ये प्रगीतमिव काननम् ।

12 V B1 om, B2 reads in marg 12 (for V1 3 B1 2, cf v l. 11) —^{a}) Ś1 Ñ B4 D1 4 7 11–13 G3 ससहायम्, B2 3 असहायम्, Cr g k as in text (for नाम°) D2 3 7 11 13 G1 इम (for अह) —^{b}) M1 इव (for इह) Ś1 D12 त्वामिहागत, Ñ2 B2–4 अतितेजस, D7 11 पुनरागत, D7 अमितौजस, L(ed) त्वामुपागत (for तमिहागतम्) —Ś1 D12 om 12^{cd} —^{c}) Ñ2 B2–4 D7 अपि प्राप्त-(B3 D7 °प्त) (for अवष्टब्ध-) D2 13 [S]सो, T2 तु (for च) B4 अप चलसमहाय च, D3 अवष्टब्ध सहाय च, D4 अप्रलब्धसहायस्य —^{d}) D11 G1 [ए]व (for [ए]ष) Ñ2 B2–4 D7 स(B2 3 [ए]ष) नर्दति (for [ए]ष गर्ज°) Ñ1 D3 नानाश्रित्य प्रगर्जति, D1 नानाश्रित्यानुगर्जति, D2 13 नान्यथा स प्रगर्जति, D4 नान्यथा तस्य गर्जित —After 12, Ñ2 B2–4 D7 ins , V1.3 B1 ins after 11^{ab} (owing to om), V2 cont after 316*, while G(ed) ins after 12^{ab} (owing to om of 12^{cd})

317* सुव्यक्तमाश्रय लब्ध्वा वालिन पुनरागत ।

[B2 अव्यक्तम् (for सुव्य°) V2 बलिन (for वालिन) B3 पुनरागत (for °गत)]

प्रकृत्या निपुणश्चैव बुद्धिमांश्चैव वानरः ।
अपरीक्षितवीर्येण सुग्रीवः सह नैष्यति ॥ १३
पूर्वमेव मया वीर श्रुतं कथयतो वचः ।
अङ्गदस्य कुमारस्य वक्ष्यामि त्वा हितं वचः ॥ १४
तव भ्रातुर्हि विख्यातः सहायो रणकर्कशः ।
रामः परबलामर्दी युगान्ताग्निरिवोत्थितः ॥ १५
निवासवृक्षः साधूनामापन्नानां परा गतिः ।
आर्तानां संश्रयश्चैव यशसश्चैकभाजनम् ॥ १६
ज्ञानविज्ञानसम्पन्नो निदेशे निरतः पितुः ।
धातूनामिव शैलेन्द्रो गुणानामाकरो महान् ॥ १७
तत्क्षमं न विरोधस्ते सह तेन महात्मना ।
दुर्जयेनाप्रमेयेन रामेण रणकर्मसु ॥ १८
शूर वक्ष्यामि ते किंचिन्न चेच्छाम्यभ्यसूयितुम् ।
श्रूयतां क्रियतां चैव तव वक्ष्यामि यद्धितम् ॥ १९   G 4 14 20 B 4 15 23 L 4 10 19

---

13 ^{a}) Ś1 प्रश्रुतो, D12 प्रद्रुतो (for प्रकृत्या) Ñ1 निर्जितश् (for निपुणश्) Ś1 Ñ V B D1–4 7 12 13 चासो, T2 चैव (for चैव) —^{b}) D6 ऋद्धिमाश् (for बुद्धि°) D3 [श्च]पि (for [ए]व) —After 13^{ab}, Ñ2 V B D7 ins

318* नानाश्रय समाह्वान तव भूय करोति स ।
सत्यसधेन वीरेण राघवेण महात्मना ।
रामेण किल कृत्वैव सख्यमभ्यागत पुन ।

[(l 1) V2 3 नाना(V2° मा)श्रय, B1 2 रामाश्रय, G(ed) नानाश्रयात् (for नानाश्रय) V2 तवाह्वान (for समा°) B1 च (for स) —(l 2) V3 रामेण (for वीरेण) —(l 3) V1 राघवे (for रामेण) V2 सलु (for किल) V1 B2 4 [ए]व (for [ए]व) B1 3 किल कृत्वैव सुमहत् (for the prior half) B1 3 अत्रागत (for अभ्या°)]
—^{c}) Ś1 Ñ1 D1–4 8–13 नापरीक्षित-, Ñ2 V B1 2 (marg also) 3 4 D7 सुपरीक्षित-, V1 स परीक्षित- (for अपरी°) —^{d}) Ś1 Ñ1 D1–4 8–13 सख्यमेष्यति, D5 6 G M1 2 सह नेष्यति (for सह नैष्यति) Ñ2 V B D7 लब्धलक्ष्ये(D7 °क्ष्ये)ण धीमता

14 ^{ab}) G2 कथयता (for °यतो) Ñ2 V B D7 G(ed) परिश्रुतो मया पूर्वं रामेणैव(G[ed]°प) सहायवान् —Ñ2 V2 3 B om 14^{cd} D7 reads 14^{cd} (including 319*) after 9^{ab} —^{c}) D6 reads कुमारस्य in marg —^{d}) T1 G1 2 Cr g k t त्वा, Cv as in text (for त्वा) T2 हि तद्वच. (for हित वच) Ś1 D1–4 11–13 तत्ते वक्ष्यामि तत्त्वत, Ñ1 तत्ते वक्ष्याम्यशेषत, V1 यद्वक्ष्यामि हित शृणु, D5 7–10 वक्ष्याम्यद्य(D10 °म्यत्र) हित(D5 7 हि तद्) वच, D6 वक्ष्यामि त्वा हि तद्वच ❀ Cv पूर्वमेवेत्यादे पश्चार्धमङ्गदस्य कुमारस्य त्वा हित वच इत्येत(°तत् ?) l, Cr पूर्वमेव मया वीर श्रुत कथयतो वच । अङ्गदस्य कुमारस्य वक्ष्यामि त्वा हित वच । इति पाठ ❀ —After 14, D5–10 S ins

319* अङ्गदस्तु कुमारोऽयं वनान्तमुपनिर्गत ।
प्रवृत्तिस्तेन कथिता चारैरासेंर्निवेदिता ।
अयोध्याधिपते पुत्रौ शूरौ समरदुर्जयौ ।
इक्ष्वाकूणा कुले जातौ प्रथितौ रामलक्ष्मणौ ।
सुग्रीवप्रियकामार्थं प्राप्तौ तत्र दुरासदौ ।   [5]

[(l 1) D6 G1 3 M1 2 Crp वनाताद्, Cg k t as above (for °न्तम्) —(l 2) D5 7–10 आसीन् (for आसेंर्) —(l 3) G1 वीरौ (for शूरौ) —(l 4) D5 7–10 T2 G1 प्रथितौ (for प्रथितौ) ❀ Cr प्राप्तो शत्रुदुरासदाविल्यत्र इतिकरण द्रष्टव्यम् ❀]
—Thereafter D7 reads 315*

15 ^{a}) D5 8–10 स ते (for तव) M1 विक्रात (for विख्यात) —^{b}) V3 स सखा (for सहायो) D5 8–10 -कर्मणि (for -कर्कश) —^{d}) Ñ2 V B1–3 D7 11 युगाताग्निसम किल, B4 °रिव प्रभु, D3 °ग्निसमप्रभ

16 ^{a}) D2 13 स वास-(for निवास-) Ś1 D4 12 निवास स च, D11 निवास सर्व- —^{b}) Ś1 D3 4 9 12 प्रपन्नाना, Ñ1 D1 2 13 वि°, D11 व्या° (for आपन्नाना) T2(also) सदा (for परा) Ñ2 V B D7 आर्ता(B3 °)नामार्तिनाशन (B4 °क) —^{c}) D12 स ᐧश्र (for सश्रयश्) Ñ2 V B D7 सपदा महतीना च —^{d}) Ñ2 V1 3 B D7 भुवि, V2 भूरि, D1 2 11 13 T2 चैव (for चैक-) Ś1 D4 13 भाजन गुणसपदा, Ñ1 भाजन शुभकर्मणा, G1 यशसा चैव भाजन, M2 यशसामेकभाजन

17 ^{b}) B1 2 (before corr) निदेश-, D3 11 निर्देश-, D4 13 निर्देशे (for निदेशे) D6 [ऽ]तिरत (for निरत) —^{c}) Ś1 Ñ1 D2 4 12 13 कैलासो, D1 शैलोत्तो (for शैलेन्द्रो) —^{d}) V1 2 B3 गुहानाम् (sic) (for गुणानाम्)

18 ^{a}) Ñ2 D7 तद्युक्त, D1 8–11 T2 G Ct तत्क्षमो, D2 तत्कर्मा (for तत्क्षम) B2 नो (for न) B1 विरोद्धु, B2–4 D2 विरोध (for विरोधस्) Ś1 Ñ1 D12 तत (Ñ1 त) क्षमो नो(L[ed]न) विरोध, D4 तन्न क्षमो विरोधस्ते, D13 तत्कर्मो न विराधा ते (corrupt) ❀ Ck तत्तस्मात्तेनोच्यमानगुणेन रामेण सह विरोधस्ते तव न क्षमम् अयुक्त । अव्ययमिदम् ❀ —^{d}) B1 2(also) 3 वीरेण, B4 om (hapl.?) (for रामेण) D3 lacuna for रण- Ś1 D12 कर्कश (D12 °श), Ñ2 V B D7 -कर्मणि, D3 11 -मूर्धनि, L(ed) कर्कश (for -कर्मसु)

19 ^{a}) Ś1 शूरो (sic), D3 11 अह, D13 शूर, M1 शूरा (for शूर) Ñ2 V B D7 वक्ष्यामि त्वा हित किचिन् —^{b}) D1 3 चेच्छसि, D4 नेच्छामि (for चेच्छामि) ❀ Cr m

4 21 यौवराज्येन सुग्रीवं तूर्णं साध्वभिषेचय ।
5 -3 विग्रहं मा कृथा वीर भ्रात्रा राजन्बलीयसा ॥ २०
0 20 अहं हि ते क्षमं मन्ये तव रामेण सौहृदम् ।
सुग्रीवेण च संप्रीतिं वैरमुत्सृज्य दूरतः ॥ २१

लालनीयो हि ते भ्राता यवीयानेष वानरः ।
तत्र वा सन्निहस्थो वा सर्वथा बन्धुरेव ते ॥ २२
यदि ते मत्प्रियं कार्यं यदि चावैषि मां हिताम् ।
याच्यमानः प्रयत्नेन साधु वाक्यं कुरुष्व मे ॥ २३

इति श्रीरामायणे किष्किन्धाकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

अभ्यसूयितु नेच्छामि। त्वद्विषये अभ्यसूया न क्रियत इत्यर्थः।; Cg ते अभ्यसूयितु नेच्छामि त्वद्विषये अभ्यसूया दोषाविष्करण कर्तुं कदाचिदपि नेच्छामीत्यर्थं । यद्वा मया वक्ष्यमाणे हिते त्वया अभ्यसूया न कार्येत्यर्थं ।, Ck त्वया अभ्यसूयितु नेच्छामि देवदत्त भोक्तुमिच्छामीत्यादिवत्क्वचिदसमानकर्तृकेषु तुमुन् । कथमिय मा पुनर्वक्तीत्यभ्यसूया न कर्तव्येत्यर्थं ।, Ct अभ्यसूयितु नेच्छामि कथमिय मा प्रति वदतीति मदसूया न कर्तव्येत्यर्थं । आर्षत्वादसमानकर्तृत्वेऽपि तुमुन् ❀ Ś1 D12 न ते युक्त(D12 कर्तु)मसूयितु, Ñ2 V B2-4 D7 न(D7 तत्) तु शास्यतु(Ñ2 B4 °न, B2 °भ्य)सूयया, B1 न तु सम्यगसूयया, D11 न चेक्रोमभ्यशायत्तु (corrupt) —c) Ś1 Ñ1 D1 2 4 11-13 तद्य, B4 चैव, D7 यच्च, M1 चैतत् (for चैव) —d) D10 om (hapl) व in वक्ष्यामि Ś1 Ñ1 D1 2 4 12 13 नाहित (for यद्धितम्) Ñ2 V B D7 यत्त्वा(B2 अहो) वक्ष्याम्यह(Ñ2 D7 °मि ते) हित, D1 11 वक्ष्यामि तव नाहि (D11 यद्धि)त

20 D6 om 20 —a) T1 3 G1.2 यौवराज्ये तु(G1 2 च) Ñ2 V B D7 सुग्रीव प्लवगश्रेष्ठ —b) Ś1 Ñ1 D1-4 11-13 तूर्णं त्व(D12 त)म्, Ñ2 V B D7 यौवराज्ये (for तूर्णं साधु) —c) D5 निग्रह, G1 2 विरोध (for विग्रह) D2 न (for मा) D2 कृत (for कृथा) Ś1 Ñ1 D1-4 12 13 मौर्ख्याद्, D11 मौढ्याद् (for वीर) —d) G2 सह (for राजन्) D5 8-10 यवीयसा (for बली°) Ś1 Ñ1 D1-4 11-13 भ्रात्रा रामेण च (Ś1 D12 वा) स्वय, Ñ2 V B D7 रामेणामिततेजसा

21 a) V1 B1 (also) हि त (for हि ते) —b) D5 6 8-10 T2 M3 तेन, M1 शीघ्र (for तव) Ś1 Ñ V B D1-4 7 11-13 रामेण(B4 तेनाद्य) सह सौहृद —c) Ś1 Ñ1 D1-4 12 13 सह(D1 °म) भ्रात्रा, B4 च सुप्रीतिं (for च संप्रीति)

22 a) Ś1 D4 12 लाड°, V2 मान°, G1 2 M लाळ°, G3 पाल° (for लालनीयो) D3 हि नो, G3 हितो (for हि ते) —b) D8 वानर Ñ2 V B D7 यवीयान्वानरेश्वर(B2 3 °र) —c) D1-3 11-13 तत्रस्थः सन्, G3 M1 तत्रासन् (for तत्र वा सन्) D2 6 11 13 सन्निधिस्थो (for सन्निहस्थो). Ś1 D4 12 अत्रस्थः स वनस्थो वा, Ñ1 [illegible] वा [illegible]स्थो वा, Ñ2 V B D7 विधेयो वा(V2 °ध्य)विधेयो वा —d) Ś1 Ñ V B D1.4 7 12 13 स, D2 च, D6 तत् (sic) (for ते). —After 22, Ñ2 B2-4 D3 7 ins

320* न विरोध क्षम तेऽद्य सुग्रीवेण तवानघ।
अनिलस्यानलेनेव चिरकाल महात्मना।

[(l 1) Ñ2 [illegible] B2 3 [illegible], D3 [illegible] (for क्षम तेऽद्य) —(l 2) D3 [illegible] (for the post half)]
—Thereafter D3 ins the line of 22cd (var. स for ते)
—After 22, D5 6 8-10 S ins

321* न हि तेन सम बन्धु भुवि पश्यामि कचन।
दानमानादिसत्कार कुरुष्व प्रत्यनन्तरम्।
वैरमेतत्समुत्सृज्य तव पार्श्वे स तिष्ठतु।
सुग्रीवो विपुलग्रीवस्तव बन्धु सदा मत ।
भ्रातु सौहृदमालम्ब्य नान्या गतिरिहास्ति ते । [5]

[(l 4) T3 सम (for तव) D5 8-10 T2 सदा(D5 तथा, T2 सदा)नघुनेनस्तव (for the post half) —(l 5) D5 8-10 M1 भ्रात् (for भ्रातु)]

23 a) Ñ2 V B1 4 D7 वा मत्प्रिय, B2 रामाप्रिय, B3 रामप्रिय, G1 मे तत्प्रिय (for ते मत्प्रिय) —b) Ñ1 चे[illegible]हि, Ñ2 B3 वा वेत्सि, V B1 D3 7 13 G1 3 वावैषि, B4 वा वेत्सि, D1 वा वेत्थ (for चावैषि) B1 2 D2 11 मा हित, D4 मा हित, G(ed) ते हित (for मा हिताम्) —c) Ś1 D4 12 याचमाना(D4 °ना), Ñ2 याच्यमाने, M1 याच्यमान, L(ed) याच्यमाना (for याच्यमान) D5 8-10 प्रियत्वेन (for प्रयत्नेन) —d) Ñ2 V1 3 B D7 साधु मे कुरु भाषित, V2 [with hiatus] साधु मे अवभाषित, D5 साधु [illegible] कुरुष्व मे
—After 23, Ś1 Ñ1 D1-6 8-13 S ins

322* प्रसीद पथ्य शृणु जल्पित हि मे
न रोषमेवानुविधातुमर्हसि।
क्षमो हि ते कोसलराजसूनुना
न विग्रह शक्रसमानतेजसा।

१६

तामेवं ब्रुवतीं तारां ताराधिपनिभाननाम् ।
वाली निर्भर्त्सयामास वचनं चेदमब्रवीत् ॥ १
गर्जतोऽस्य च संरम्भं भ्रातुः शत्रोर्विशेषतः ।
मर्षयिष्याम्यहं केन कारणेन वरानने ॥ २
अधर्षितानां शूराणां समरेष्वनिवर्तिनाम् ।
32 D3 om 32^{ab} D11 repeats 32^{ab} and 48^{cd} after 49 —^{c}) V1 2 B1-3 D7 काम- (for शोक-) Ś1 Ñ1 D1-4 12 13 -परीतस्य, D11 M1 3 -[अ]भिभूतस्य (for -[अ]भितप्तस्य) —^{d}) V2 D5 8-10 तथा (for सौम्य) ※ Cv चत्वारो वार्षिका मासा गता वर्षशतोपमा इति। आश्वयुजकार्तिकावपि शरन्मासौ किंचिद्वर्षसम्बन्धाद्वार्षिकशब्देनोच्येते। तत्र श्रावणादयश्चत्वारो वार्षिका मासा सम्पन्ना भवन्ति। गता गतभूयिष्ठा कार्तिकान्ता वर्तन्त इति यावत् ।, Cr चत्वारो वार्षिका मासा वर्षशतोपमा गता इति सम्बन्ध । आश्वयुजकार्तिकयो शरदृतुत्वेऽपि वर्षानुवृत्त्या वार्षिकोक्ति ।, Cg चत्वार इति। चत्वार आषाढाद्या । केचिदाहु श्रावणाद्या इति। पूर्वोऽय वार्षिको मास श्रावण सलिलागम इत्युपक्रमोक्तेराश्वयुजकार्तिकयोर्वर्षानुवृत्त्या वार्षिकत्वम्। कार्तिके समनुप्राप्ते

प्रियाविहीने दुःखार्ते हृतराज्ये विवासिते ।
कृपां न कुरुते राजा सुग्रीवो मयि लक्ष्मण ॥ ३३
अनाथो हृतराज्योऽयं रावणेन च धर्षितः ।
दीनो दूरगृहः कामी मां चैव शरणं गतः ॥ ३४
इत्येतैः कारणैः सौम्य सुग्रीवस्य दुरात्मनः ।
अहं वानरराजस्य परिभूतः परंतप ॥ ३५
स कालं परिसंख्याय सीतायाः परिमार्गणे ।
कृतार्थः समयं कृत्वा दुर्मतिर्नावबुध्यते ॥ ३६
त्वं प्रविश्य च किष्किन्धां ब्रूहि वानरपुंगवम् ।
मूर्खं ग्राम्यसुखे सक्तं सुग्रीवं वचनान्मम ॥ ३७
अर्थिनामुपपन्नानां पूर्वं चाप्युपकारिणाम् ।
आशां संश्रुत्य यो हन्ति स लोके पुरुषाधमः ॥ ३८
शुभं वा यदि वा पापं यो हि वाक्यमुदीरितम् ।
सत्येन परिगृह्णाति स वीरः पुरुषोत्तमः ॥ ३९
कृतार्था ह्यकृतार्थानां मित्राणां न भवन्ति ये ।
तान्मृतानपि क्रव्यादः कृतघ्नान्नोपभुञ्जते ॥ ४० G 4 30. 13 B 4 30 73 L 4 23 30

त्व रावणवधे यतेति पूर्वोक्तवचने तु कार्तिके समनुप्राप्त इत्यस्य समाप्त इत्यर्थ इत्याहु ❀ —After 32, D5 6 8–10 S ins

583* चक्रवाकीव भर्तार पृष्ठतोऽनुगता वनम् ।
विषम दण्डकारण्यमुद्यानमिव चाङ्गना ।

[(l 2) T M3 चागता (for चाङ्गना)]

33 Ś1 om 33 —[b]) B2 3 कृतराज्ये, T वने सौम्य (for हृतराज्ये) —[c]) B4 transp कृपा and न —[d]) Ñ2 V1 2 B6 D7 मानद, B1–3 वानर (for लक्ष्मण)

34 [a]) D5 सुनाथो Ś1 Ñ D1 3 7 12 -दारश्च, V1 2 B D11 -राज्यश्च, D2 4 13 -राज्योह (for राज्योऽय) G(ed) अनाथो राष्ट्रभ्रष्टश्च —[b]) T2 वानरेण (for रावणेन) Ś1 D1–4 12 13 प्रधर्षित D6 वानरेण च धर्षिणा —[c]) D2 13 दुराग्रह (for दूरगृह) ❀ Ct 'दूरग्रह' इति पाठे दूरवर्तिस्त्रीविषयो ग्रहो रावणोऽभिनिवेशो वा यस्येत्यर्थ ❀ D11 दुर्बलो दुर्ग्रह कामी —[d]) Ś1 D2–4 12 13 तस्यैव, Ñ2 V1 2 B D7 मा चापि (for मा चैव) V2 B4 शरणागत

35 [a]) Ś1 D4 12 [ए]तत्-, Ñ2 V1 2 B1–3 D7 [ए]भि (for [ए]तै) D11 इत्येभि कारणैस्तात —[b]) D6 महात्मन (for दुरा°) Ś1 Ñ1 D1–4 11–13 सुग्रीवेण दुरा(D2 13 महा)त्मना —[c]) Ś1 Ñ1 D1–4 11–13 M1 राजेन, Ck t as in text (for -राजस्य) ❀ Ct वानरराजस्य वानराजेन शेषे षष्ठी ❀ —[d]) Ś1 D1–4 12 13 न सशय , Ñ1 [ऽ]द्य लक्ष्मण, Ñ2 V1 B4 D8 10 परतप (for °तप) ❀ Cg सुग्रीवस्य परिभूत इति "क्तस्य च वर्तमाने" इति षष्ठी।, Ck परिभूत इति। मतिबुद्धीत्यत्रानुक्तसमुच्चयार्थेन चकारेण वर्तमानक्ते क्तस्य च वर्तमान इति षष्ठी ❀

36 [a]) Ś1 D4 12 शरदा(Ś1 °द) स च कालो मे, Ñ1 D1–3 13 स चतुर्मासकाल(Ñ1 °लो) मे —[d]) D3 दुर्गतिर्, D6 दुरात्मा, D11 दुर्मना (for दुर्मतिर्) Ś1 D2 4 12 13 [अ]ति(D2 13 [अ]भि)मन्यते, Ñ V1 2 B1–3 D1 3 7 11 [अ]भिपद्यते, Ck [ए]व बुध्यते (for [अ]वबुध्यते) —After 36, D3 11 ins

584* न त पश्यामि सौमित्रे कृते प्रतिकरोति य ।
सर्वस्य हि कृतार्थस्य मतिरन्या प्रवर्तते ।

37 [a]) Ś1 Ñ V1 2 B D G2 3 स(D5 om) किष्किधा प्रविश्य(Ś1 D1 5 °श) त्व, G1 M1 2 किष्किधा सप्रविश्य त्व —[b]) Ś1 Ñ1 D1–4 12 13 ब्रूहि त(D3 4 त्व) (D12 ...) वानराधिप(Ś1 D4 12 °श्वर) —[c]) M1 आत्य (sic) (for मूर्ख) Ś1 D12 त तु, D4 6 ग्राम- (for ग्राम्य-) Ñ1 -सुखे रक्त, D10 12 सुखे °क्त, G3 -सुखासक्त, G(ed) -सुखे सुस (for सुखे सक्त) —[d]) B1 3 वचन (for °नान्) —After 37, B1–3 ins

585* समयस्ते कृतो योऽसौ तस्य कालविलम्बनम् ।

38 [a]) Ś1 Ñ1 V2 B4 D1–4 11–13 अर्थिना याचमानाना —[b]) D8 वा (for च) —[c]) Ś1 D12 सश्राव्य (for सश्रुत्य) B4 हन्यात् (for हन्ति) D11 आशा यो हति सुग्रीव

39 D1 om 39 D2 reads 39 in marg —[ab]) D2 13 शुद्ध (for शुभ) After 39[a], Ñ1 wrongly ins पूर्वं चाप्युपकारिणा Ñ2 V1 B1 3 D5–7 T2 G3 Cm येन, Cvp mp as in text (for यो हि) Ś1 Ñ1 V2 B2 4 D2–4 12 13 वाक्य य (D2 3 13 यत्) समुदीरित (for [b]) D11 मृदु वा दारुण वापि यद्वाक्य समुदाहृत —[c]) Ś1 Ñ1 D2 4 12 13 सत्यवाङ्गना (D2 °वाग्वा)भिजानाति, Ñ2 V1 2 B D7 सत्यमि(Ñ2 D7 °त्य प्र)त्यभिजानाति(V2 °मि), D3 11 सत्येन प्रतिजानाति (D11 °गृह्णाति) —[d]) Ś1 Ñ V1 2 B D2–4 7 12 13 G3 लोके, D11 सौम्य, M2 वीर (for वीर) Ś1 Ñ1 V2 पुरुषाधम —After 39, Ñ2 V2 B2–4 D7 ins

586* न त पश्यामि सौमित्रे योऽर्थी न कृपण वदेत् ।
त च नैवानुपश्यामि योऽर्थिन नावमन्यते ।

[(l 1) B3 missing for first न —(l 2) V2 B4 तु (for च) Ñ2 D7 तमह नव पश्यामि (for the prior half)]

40 [a]) D2 9 13 कृतार्थो D1 [अ]कृतार्थाश्च (for °र्थाना) Ñ2 V1 B1–3 D7 सत्कृताश्च कृतार्थाश्च —[b]) D7 T1 3 मित्राणि D2 13 भय त्यजेत्, D7 भजति ये (for भवन्ति ये) ❀ Cr m g मित्राणा न भवन्ति मित्राणामुपकारका(Cg °राय) न भवन्तीत्यर्थ । अस्य श्लोकस्यान्ते इतिकरण द्रष्टव्यम् । इति सुग्रीव ब्रूहीति पूर्वेण सबन्ध ❀ —[c]) D6 तादृशान् (for तान्मृतान्) D2 13 मृतानपि च क्रव्यादा ❀ Cv कृतघ्नान्नोपभुञ्जत इत्यत्र सुग्रीवसदेशवाक्यसमाप्तिसूचकमितिकरण

30 18 30 74 23 31 नूनं काञ्चनपृष्ठस्य विकृष्टस्य मया रणे ।
द्रष्टुमिच्छति चापस्य रूपं विद्युद्गणोपमम् ॥ ४१
घोरं ज्यातलनिर्घोषं क्रुद्धस्य मम संयुगे ।
निर्घोषमिव वज्रस्य पुनः संश्रोतुमिच्छति ॥ ४२
काममेवंगतेऽप्यस्य परिज्ञाते पराक्रमे ।
त्वत्सहायस्य मे वीर न चिन्ता स्यान्नृपात्मज ॥ ४३
यदर्थमयमारम्भः कृतः परपुरंजय ।
समयं नाभिजानाति कृतार्थः प्लवगेश्वरः ॥ ४४
वर्षासमयकालं तु प्रतिज्ञाय हरीश्वरः ।
व्यतीतांश्चतुरो मासान्विहरन्नावबुद्ध्यते ॥ ४५
सामात्यपरिषत्क्रीडन्पानमेवोपसेवते ।
शोकदीनेषु नास्मासु सुग्रीवः कुरुते दयाम् ॥ ४६
उच्यतां गच्छ सुग्रीवस्त्वया वत्स महाबल ।
मम रोषस्य यद्रूपं ब्रूयाश्चैनमिदं वचः ॥ ४७

द्रष्टव्यम्। अत पर हि वाक्य लक्षण प्रति प्रयुज्यते। न सुग्रीवाय सदिश्यते ❀—After 40, Ñ2 V1 2 B D3 7 11 read 45

41 Ñ2 V1 2 B D7 read 41 and 42 after 50, while D3 11 read the same after 46 —[a]) D2 13 तूर्णं (for नून) Ś1 -चित्रस्य, D12 -शिष्टस्य (for -पृष्ठस्य) —[b]) Ñ2 D7 विकृतस्य, D2 13 व्यावृत्तस्य (for विकृष्टस्य) V1 D2 7 13 महारणे D3 मया विकृष्टस्य रणे —[c]) Ñ V1 2 B D8–10 इच्छसि, D2 13 इच्छामि (for इच्छति) —[d]) D2 4 6 7 12 T1 G M1 2 Ck -गुणो- (for गणो)

42 Ñ2 V1 2 B D7 read 41 and 42 after 50, while D3 11 read the same after 46 —[a]) D5 9 G1 M1 घोर-, Cg as in text (for घोर) D12 ज्याघात- (for ज्यातल-). —[b]) Ś1 D1–4 12 मम क्रुद्धस्य (by transp), D13 समक्रुद्धस्य, G1 क्रुध्यतो मम (for क्रुद्धस्य मम) —[c]) Ś1 Ñ1 V1 2 B D1–4 11–13 निष्पेषम् (for निर्घोषम्) —[d]) Ś1 Ñ1 D4 12 त्व, D2 13 त (for स-) Ś1 Ñ1 B4 D4 5 8(after corr) 9–13 इच्छसि Ñ2 V1 2 B1–3 श्रोतुमिच्छसि(B2 °च्छामि) वानर, D7 श्रोतुमिच्छति वानर ❀ Cv r g पुन सश्रोतुमिच्छतीति पाठ ।, Ct सश्रोतुमिच्छसीत्युत्तरमिति सुग्रीव ब्रूहीति सबन्ध ❀—After 42, V2 B3 4 ins, while D3 11 cont after 590*

587* काल कालप्रकर्षेण तिष्ठ सत्ये कपीश्वर।
यद्यर्थस्तव राज्येन जीवितेन सुखेन वा।

[(l 1) B4 काम (for काल) D3 11 अन्न कालातिपातेन त्वमुत्तिष्ठ हरीश्वर —(l 2) B4 यद्, D11 न हि (for यदि) B4 जीवनेन (for जीवितेन) D3 11 च (for वा)]

43 Ś1 D4 12 om 43–48[b] Ñ1 D1 2 13 om 43–47 B3 reads 43 in marg —[a]) B4 काम चैव, D8 Ck कामवेग (for °मेव-) Ñ2 V1 2 B D7 गते काले, D3 परिज्ञाते, D11 G3 गते कार्ये (for गतेऽप्यस्य) —[b]) D3 गते कार्ये, D6 परिज्ञाने (for परिज्ञाते) —[c]) D11 मत्- (sic) (for त्वत्) —[d]) B1 3 D7 चिन्ता सा (for चिन्ता स्यान्) —After स्यान्, D9 wrongly reads 42[d] in place of नृपात्मज

44 Ś1 Ñ1 D1.2.4.12 13 om 44 (cf v l 43) —[a]) B4 यदर्थश्च (for यदर्थम्) V1 स मया (for अयम्) —[c]) Ñ2 B1–3 D7 तमसौ, D3 11 तन्त्र (for समय) V2 B4 समय नाभिजानासि —[d]) V2 B4 प्लवगेश्वर, G3 स हरीश्वर

45 Ś1 Ñ1 D1 2 4 12 13 om 45 (cf v l 43) Ñ2 V1 2 B D3 7 11 read 45 after 40 V2 B4 read 45 twice —[a]) D8 9 वर्षा, T G1 3 M2 (after corr sec m as in text) Cv m वर्षं, Ct as in text (for वर्षा-) V2 B4 (both first time) हि (for तु) Ñ2 V1 2 B (V2 B4 second time) D3 7 11 प्रतिकार हि मे राजा(V2 B °जन), M1 वार्षिक समय काल ❀ Cv वर्षं वर्षाकाल समयस्यावसरम्।, Cr m वर्षं तु वर्षाकालमेव समयकाल प्रतिज्ञायावस्थाय, सङ्केतकाल प्रतिज्ञायेत्यर्थ ।, Cg वर्षेति। वर्षासमयकाल वर्षा एव समयकाल सङ्केतकालस्तम्। वर्षाशब्देन चत्वारो मासा उपलक्ष्यन्ते ।, Ct वर्षा वर्षोत्तरकाल सङ्केतविषय काल प्रतिज्ञाय ❀—[b]) D3 11 प्रतिकर्तुं (for प्रतिज्ञाय) ❀ Ck व्यतीतांश्चावबुध्यत इत्यन्वय ।, Ct व्यतीतान्व्यतीतप्रायान् ❀ —After 45, Ñ2 V1 2 B D3 7 11 ins

588* तत्कालपरिणामश्च सहायश्चानवस्थित ।
तस्याश्च गतिरज्ञाता कथ शक्य न शोचितुम्।

[(l 1) D3 11 -परिणामाश् (for °णामश्) D3 11 सहायाश्चानवस्थिता (for the post half) —B2 reads l 2 in marg —(l 2) V1 कस्य (for कथ) V3 शक्या, B2 मत्य (for शक्य) D3 कथ न शोचितु क्षम (for the post half)]

46 Ś1 Ñ1 D1 2 4 12 13 om 46 (cf v l 43) —[a]) D6 सोमात्य- D3 11 सामात्य स्वपुरे क्रीडन —[b]) D3 11 सुखम् (for पानम्) G1 [उ]पसेव्यते —For 46[ab], Ñ2 V1 2 B D7 subst

589* सामात्य परिसत्क्रीडन्कामस्य वशमागत ।

[V1 पर्षदि (for परिस-) V2 B4 D7 सहामात्य परिक्रीडन् (for the prior half) V1 कालस्य, B1 यमस्य (for कामस्य)] —[c]) B1 शोकशीलेषु Ñ2 V1 2 B1–3 D7 च (for न) T2 [अ]स्माक (for [अ]स्मासु) —[d]) Ñ2 V1 2 B1–3 D7 रमते निरपत्रप, B4 रमते निरुपद्रव —After 46, Ñ2 V1 2 B D7 read 50, 41, 42, while D3 11 read 41 and 42

47 Ś1 Ñ1 D1 2 4 12 13 om 47 (cf v l 43) Ñ2 V1 B1 2 D7 om 47 —[a]) V2 वा ।, B3.4 वीर (for गच्छ) G1 M2 तदुच्यता हि(M2 स) सुग्रीवस् —[b]) V2 D5 8–10 वीर

न च संकुचितः पन्था येन वाली हतो गतः ।
समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः ॥ ४८
एक एव रणे वाली शरेण निहतो मया ।
त्वां तु सत्यादतिक्रान्तं हनिष्यामि सबान्धवम् ॥ ४९
तदेवं विहिते कार्ये यद्धितं पुरुषर्षभ ।
तत्तद्ब्रूहि नरश्रेष्ठ त्वर कालव्यतिक्रमः ॥ ५०
कुरुष्व सत्यं मयि वानरेश्वर
प्रतिश्रुतं धर्ममवेक्ष्य शाश्वतम् ।
मा वालिनं प्रेत्य गतो यमक्षयं
त्वमद्य पश्येर्मम चोदितैः शरैः ॥ ५१
स पूर्वजं तीव्रविवृद्धकोपं
लालप्यमानं प्रसमीक्ष्य दीनम् ।
चकार तीव्रां मतिमुग्रतेजा
हरीश्वरे मानववंशनाथः ॥ ५२

इति श्रीरामायणे किष्किन्धाकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

G 4 30 0
B 4 30 85
L 4 23 35

(for वत्स) D3 6 10 T2 महाबल —^{c}) T2 महा- (for मम) D3 11 क्रुद्धस्य (for रोषस्य) —^{d}) D3 11 ब्रूहि चैनम्, T2 ब्रूयाश्चैवम् (for °श्चैनम्)

48 Ś1 D4 12 om 48^{ab} (cf v l 43) Ñ1 D1 2 13 transp 48 and 49 M1 transp 48^{ab} and 48^{cd} —^{a}) Ñ V1 2 B2–4 D1–3 5 7–11 13 G M1 3 स, G(ed) हि, Cg as in text (for च) Ñ1 वाणो (for पन्था) —^{b}) Ñ1 B2 D2 13 मया (for गत) —D11 repeats 48^{cd} (cf v l 32) Ś1 transp 48^{cd} and 49^{ab} —^{d}) M3 -वधम् (for -पथम्)

49 Ñ1 D1 2 13 transp 48 and 49 Ś1 transp 48^{cd} and 49^{ab} —^{a}) D1 2 13 G2 M1 एकेनैव Ñ2 B1–3 D7 मया, G1 हतो (for रणे) V1 एष एव तदा वाली —^{b}) Ś1 D1 3 4 12 13 [अ]भिहतो (for निहतो) G(ed) पुरा (for मया) Ñ2 V1 B1–3 D7 वाणेन निहतो रणे (V1 मया), G1 वाणेन समरे मया —Ś1 D4 12 om 49^{c}–50 —^{c}) D5 13 त्वा (for त्वा) Ñ1 V1 B1–3 D1–3 13 अपक्रान्त (for अति°) —^{d}) D1 3 6 G3 M1 2 वधिष्यामि (for हनि°) D2 13 वधामि सहबान्धव —After 49, D3 ins, while D11 repeats 32^{ab} and 48^{cd} after 49 and then ins

590* प्रतिज्ञा रक्ष सुग्रीव या कृता वह्निसाक्षिकी ।
मा सत्यात्त्वामतिक्रान्त नयिष्ये यमसादनम् ।

—Then D3 11 cont 587*

50 Ś1 Ñ1 D1–4 11–13 om 50 (for Ś1 D4 12, cf v l 49) Ñ2 V1 2 B D7 read 50 after 46 V2 B3 4 read 50^{ab} twice. —^{a}) D8 10 यदेव (for तदेव) V1 हि गते (for विहिते) Ñ2 V1 2 B D7 काले (for कार्ये) V2 B3 (both first time) प्रतीत्यैवगते कार्ये, B4 (first time) गच्छत्यैवगते कार्ये —^{b}) Ñ2 V1 2 B1–3 (V2 B3 second time) D7 हित यत् (by transp), B3 (first time) तद्धित (for यद्धित) V2 (second time) प्लवगेश्वर (for पुरुषर्षभ) —^{cd}) M1 काले (for काल-) T1 G1 M1 Cr -व्यतिक्रम (for °क्रम) V2 B3 4 तद्ब्रूहि वा नरश्रेष्ठ (V2 वानरश्रेष्ठ) पुरा कालोति (B3 °भि) वर्तते ❀ Cv कालव्यतिक्रम, भवतीति शेष ।, Cm g कालव्यतिक्रम, मा भूदितिशेष । अतस्त्वर-स्वेति (Cg °स्त्वर त्वरस्वेति) सबन्ध ।, Ct त्वराहेतु कालव्यतिक्रम, जायत इति शेष ❀ —For 50^{cd}, Ñ2 V1 B1 2 D7 subst, while V2 B3 4 ins after 50^{ab}

591* तच्चिन्तयाशु वैदेह्या न कालोऽतिक्रमेयथा ।

[Ñ2 D7 तच्चितयस्व, V1 तस्याश्चिनाशु (sic) (for तच्चिन्तयाशु) B4 वैदेह्या (for वैदेह्या)]

—After 50, Ñ2 V1 2 B D7 read 41 and 42

51 ^{c}) D2 13 स त्व (for सत्य) Ñ1 V2 B4 D2 3 6 8 10 11 13 T3 मम (for मयि) Ś1 Ñ1 D1 12 वानरर्षभ, Ñ2 V2 B1–3 वानरेन्द्र तत्, D7 वानरेन्द्र —^{b}) V2 B2 परिश्रुत, D1 प्रतिश्रव (for प्रतिश्रुत) D1 7 अपेक्ष्य (for अवेक्ष्य) B4 प्रतिश्रव त त्वमवेक्ष्य शाश्वत, D4 (mostly in marg) प्रतिश्रुत यद्भवता ममाग्रे —^{c}) Ñ2 B1–3 D7 न, V1 moth-eaten (for मा) Ś1 Ñ1 V1 2 B1–3 D1 3 4 7 11 12 प्रेतगत, Ñ2 प्रेतक्षय (sic), B4 D5 6 8–10 T G1 3 M2 Ck t प्रेतगतो D2 प्रेतगतिर्, D13 प्रेतगति, G2 प्रेतगते (for प्रेत्य गतो) Ś1 Ñ2 V2 B1 2.4 D T2 G1 2 M1 2 यमक्षये (for °क्षय) —^{d}) V1 हतो (for त्वम्) V1 D5 8 10 T G2 M2 Ck t मम चोदित, G3 निहतो मया (for मम चोदितै) Ś1 Ñ V2 B D1–4 7 11–13 हतोद्य (D4 हत च) पश्येस्त्व (D10 °श्य त्व) मजिह्मगै शरै ❀ Cv कुरुष्वेत्याद्युपन्यास सङ्ग्रहेण तद्वचनदिक्प्रदर्शनार्थं ।, Cr सदिष्ट सक्षिप्योप्यदिशति । कुरुष्वेति ।, Cm कुरुष्वेत्याद्युपन्यास सग्रहेण सुग्रीवहितप्रदर्शनार्थम् (°र्थ !) ।, Cg उक्तमर्थं पुन सक्षेपेण सर्गान्ते दर्शयति । कुरुष्वेति ।, Ck अथोपदेशसक्षेप कुरुष्वेत्यादि ।, Ct उपदेशसक्षेप । कुरुष्वेति ❀

52 ^{a}) Ś1 Ñ V1 2 B D1–4 7 11–13 -शोक, D5 -क (for -कोप) —^{c}) Ś1 D2 4 12 13 रौद्रा, T1 दीप्त (for

३०

1 1 36 स कामिनं दीनमदीनसत्त्वः
शोकाभिपन्नं समुदीर्णकोपम् ।
नरेन्द्रसूनुर्नरदेवपुत्रं
रामानुजः पूर्वजमित्युवाच ॥ १

न वानरः स्थास्यति साधुवृत्ते
न मंस्यते कार्यफलानुषङ्गान् ।
न भोक्ष्यते वानरराज्यलक्ष्मीं
तथा हि नाभिक्रमतेऽस्य बुद्धिः ॥ २

मतिक्षयाद्ग्राम्यसुखेषु सक्त-
स्तव प्रसादाप्रतिकारबुद्धिः ।
हतोऽग्रजं पश्यतु वालिनं स
न राज्यमेवं विगुणस्य देयम् ॥ ३

तीव्रा) Ñ2 D7 गतिम् (for मतिम्) Ś1 Ñ2 B2 3 D1 2 4 7 12 13 उग्रवेगो —d) Ś1 Ñ1 D1 2 4 7 12 13 -देवनाथ , D3 11 देवपुत्र , D5 6 8–10 T G2 3 M1 Ck t -वशवर्धन (for -वशनाथ) —After 52, Ś1 Ñ1 D1–4 12 13 read 4 30 1–5, while D11 reads 4 30 1–9 —After 52, B1–3 ins

592* उवाच सत्य प्रसभ हित च
सौमित्रिरत्यर्थमुदारसत्त्वम् ।

[(1 1) B3 प्रसृत (for प्रसभ)]

Colophon —*Sarga name* Ś1 लक्ष्मणसुग्रीवसदेश , Ñ1 D11 रामसदेश , Ñ2 V1 2 B1–3 D7 सुग्रीवाह्वान, B4 शरद्विलास , D1 रामवाक्य, D2 4 12 13 सुग्रीवसदेश , D3 लक्ष्मण प्रति रामवाक्य —*Sarga no* (figures, words or both) Ś1 Ñ1 V1 B1 2 D2 4 om , Ñ2 V2 G3 29(as in text), B3 4 D3 7 31, D1 20, D5 6 8–10 12 T G1 2 M 30, D11 26, D13 27 —After colophon, G concludes with श्रीरामाय नम

30

☞ V3 illeg up to किष्किन्धा in 26d (cf v l 4 27 34) M1 begins with श्रीरामाय नम

1 Ś1 Ñ1 D1–4 12 13 read 1–5, D11 reads 1–9 after 4 29 52 —a) D5 6 8–10 T G2 3 M3 Cg अदीनमत्त्व —b) B4 कोप- (for शोक) B4 T2 3 M1 2 -कोप , D5 8–10 T1 -काम, Cg as in text (for -कोपम्) —For 1, Ś1 Ñ V1 2 B1–3 D1–4 7 11–13 subst

593* स लक्ष्मणस्तद्वचन निशम्य
रामस्य शोकाभिपरिप्लुतस्य ।
उवाच वाक्य मतिमानमर्षी
रामार्थसिद्ध्यर्थमदीनसत्त्व ।

[(1 3) D12 नतिमान् (for मतिमान्) Ñ2 D1 3 7 मनीषी, V1 2 B2 (*sup. lin* after corr as above) मनस्वी (for अमर्षी) —(1 4) V2 रामात्मसिद्ध्यर्थम्, D11 हितार्थमत्यर्थम् D13 -सर्व (sic) (for सत्त्व). Ñ1 अतिप्रयुक्त (for अदीनसत्त्व)]

2 For the sequence in Ś1 Ñ1 D1–4 11–13, cf v l 1 —a) D3 शुद्ध- (for साधु-) —b) Ñ1 V1 2 D5 8–10 T1 Ct मन्यते, Cm g k as in text (for मंस्यते) Ś1 D12 काल(D12 °म)फलानुपगी, Ñ1 कालफलाभियगान , Ñ2 D7 धर्मफलानुरगान(D7 °पग) , B G1 कर्मफलानुपग(B1 °नुमगवान, B4 °नुमग), D1–4 11 13 काम(D1 °ल)फलानुपग(D3 °सगात , D11 °पग), D5 8 T2 3 G(ed) कर्मफलानुपगात(G[ed] °बंध) —Ñ2 om (hapl ?) 2c —c) Ñ1 तोपते, G3 भोज्यते (for भोक्ष्यते) B D1–4 10 11,13 T1 G M2 Cr k राज , Cm g t as in text (for -राज्य-) Ś1 D12 न तोपतेसौ नरराजलक्ष्म्या, L(ed) न मोक्ष्यते वानरराजलक्ष्म्यास —d) Ś1 D12 तवाहिताय, Ñ1 V2 B D8 9 T1 G1 M1 2 Ck t*p* तथा हि नाति-, Ñ2 D7 °साति-, V1 तथा । नाति , D3 एपा हि नोप-, D4 L(ed) °नाद्य, D11 °नोप , Cv r m g as in text (for तथा हि नाभि) D4 L(ed) [ऽ]ल्पबुद्धि D2 13 नत्वा हि नाश्वाक्रमते विबुद्धि (sic) ❀ Ck नातिक्रमत इति पाठ । , Ct तथा हि नातिक्रमत इति पाठ पाठ ❀

3 For the sequence in Ś1 Ñ1 D1–4 11–13, cf. v l 1 —a) D6 M1 -प्रमाद् (for -क्षयाद्) V2 ग्राम- (for ग्राम्य-) B1 3 अतिक्रिया प्राप्य (for मतिक्षयाद्ग्राम्य-) —b) D13 भवत्- (for तव) Ś1 D12 भवत्प्रसादात्प्रतिकार दीन , Ñ1 D1–4 11 भवत्प्रसादात्प्रति(D11 °दादप)कारबुद्धि (D3 °पद्य राज्य), Ñ2 V1 B1–3 D7 कामप्रवृत्तोप्रति(Ñ2 V1 °त्ताप्रति, B1 3 °त्तोनिप्र)कारबुद्धि , V2 B4 D6 8–10 T G2 3 Ck t तव प्रसादात्प्रति(G2 °त्वप)कारबुद्धि , G1 तवप्रसादात्प्रतिपन्नराज्य , M2 कामप्रधानोप्रतिकारबुद्धि , Cm g as in text ❀ Cm तव प्रसादे उपकारे विषये। अप्रतिकारबुद्धि प्रत्युपकारबुद्धिरहित । , Cg तव प्रसादाप्रतिकारबुद्धि प्रसादस्य राज्यप्रदानादिरूपस्य अप्रतिकारबुद्धि प्रत्युपकारकबुद्धिरहित । , Ck तव प्रसादात् सप्राप्तेषु ग्राम्यसुखेषु सक्त इति । यदेवमतस्तस्य प्रतिकारबुद्धिर्न वर्तते। एव पाठपाठस्य योजना शक्या। तव प्रसादाप्रतिकारबुद्धिरिति पठित्वा अगमकसमाससङ्गीकृत्याक्लिश्यत्पर ❀ —c) B3 4 ततो (for हतो) Ñ1 Cv पश्यति Ś1 D1 3 4 11 12 वालिन मया, V1 °न शरैर्, V2 B4 D5 6 8–10 T G M1 2 वीर वालिन, D2 13 °न सदा, M3 वीर तस्य (for वालिन स). D7 हताग्रजो वालिवधेन तुष्टो ❀ Cv हतोऽग्रज पश्यति वीर वालि इति सम्यक् । इकारान्तत्वमृषिप्रयोगनिपा-

न धारये कोपमुदीर्णवेगं
निहन्मि सुग्रीवमसत्यमद्य ।
हरिप्रवीरैः सह वालिपुत्रो
नरेन्द्रपत्न्या विचयं करोतु ॥ ४

तमात्तबाणासनमुत्पतन्तं
निवेदितार्थं रणचण्डकोपम् ।
उवाच रामः परवीरहन्ता
स्ववेक्षितं सानुनयं च वाक्यम् ॥ ५

न हि वै त्वद्विधो लोके पापमेवं समाचरेत् ।
पापमार्येण यो हन्ति स वीरः पुरुषोत्तमः ॥ ६

नेदमद्य त्वया ग्राह्यं साधुवृत्तेन लक्ष्मण ।
तां प्रीतिमनुवर्तस्व पूर्ववृत्तं च संगतम् ॥ ७

सामोपहितया वाचा रूक्षाणि परिवर्जयन् ।
वक्तुमर्हसि सुग्रीवं व्यतीतं कालपर्यये ॥ ८

सोऽग्रजेनानुशिष्टार्थो यथावत्पुरुषर्षभः ।
प्रविवेश पुरीं वीरो लक्ष्मणः परवीरहा ॥ ९

G 4 31 9
B 4 31 9
L 4 24 4

तनेन । वालिनमिति पाठे एकादशाक्षरायास्त्रिष्टुभ द्वादशाक्षराया जगत्या साङ्कर्यं स्यात् । , Cr हतोऽग्रज पश्यतु वीर वालिनमित्यत्र वृत्तभङ्ग आर्ष । हतोऽग्रजं पश्यतु वीर वालिमिति सम्यक् पाठ । , Cg अत एव हत सुग्रीव अग्रज वालिं पश्यतु । एव विगुणस्य तस्य राज्य न देयम् । वालिनमिति क्वचि पाठ । तत्र वृत्तमुपजाति· ❀ —^{d}) D7 om न D9 एव Ś1 D12 चैव राज्य (for राज्यमेव). Ś1 V2 B4 D1–4 11–13 विगुणाय (for °णस्य)

4 For the sequence in Ś1 Ñ1 D1–4 11–13, cf v l I —^{a}) B2 D2 13 वारये V1 चापम्, D1–4 11 13 रोपम्, M2 शोकम् (for कोपम्) Ś1 D12 विदारये मेरुम् (for न धारये कोपम्) L(ed) दोषविदीर्ण- (for कोपमुदीर्ण-) —^{b}) D4 निर्धूय, D6 न हन्मि (for निहन्मि) Ś1 D12 अदीनम्, Ñ1 V2 B1 3 4 D2–4 11 13 G2 3 अश(Ñ1 D3 11 G2 3 °स)क्तम्, Ñ2 V1 D7 अह तम्, G(ed) अयुक्तम् (for असत्यम्) D1 निहत्य सुग्रीवमसक्तबुद्धि —^{c}) V2 B4 तत (for हरि-) Ś1 D1–4 12 13 हत(D4 °ते)प्रवीरोद्य (D4 °रेद्य, D13 °रोच) नरेन्द्रसूनुर्, Ñ V1 B1–3 D7 हत(B2 तत)-प्रवीरोद्य हरीन्द्रसूनुर्, D11 हतप्रवीरो न तु वानरेन्द्रो —^{d}) Ñ2 reads नरेन्द्र- in marg Ñ V1 2 B2 4 D1 3–5 7–10 T G2 M1 -पुत्र्या, B1 3 G(ed) -कन्या- (for -पत्न्या) V1 D2 4 13 विजय D2 13 Ck करोति (for °तु) Ś1 D12 नरेन्द्रपुत्री विधवा करोतु (sic), D11 नरेन्द्रपत्नीमवलोकयेद्यत

5 For the sequence in Ś1 Ñ1 D1–4 11–13, cf v l I —^{a}) D2 आर्त- (sic) (for आत्त-) Ś1 D4 12 तमार्त (D12 °त्त)वेगाद्य समुत्पतत —^{b}) Ś1 Ñ V1 2 B D1–3 7 11–13 -चडवेग, D4 (marg) -निर्गमाय (for -चण्डकोपम्) —^{c}) B1 3 वीर, B4 वीर (for राम) —^{d}) Ś1 Ñ1 D2–4 11–13 स्व(D4 स्वा)पेक्षया, V1 D1 स्वपेक्षित, B1 सुचे°, D8–10 T1.2 Ct स्ववी°, Cm g k as in text (for स्ववेक्षित)

6 For the sequence in D11, cf v l I —^{a}) M1 [ए]व (for वै) Ś1 Ñ1 B4 D1–4 11–13 न पापे(D4 त्वर्थं) त्वद्विधा(Ñ1 B4 D11 °ध)स्तात, Ñ2 V2 B1–3 D7 G(ed) न खलु त्व(G[ed] °त्वस्म)द्विधास्तात, V1 पश्य त्व त्वद्विधास्तात —^{b}) Ñ1 illeg, Ñ2 V1 2 B1–3 D1–4 11 13 प्रकुर्वते, D7 प्रवर्धते (for समाचरेत्) Ś1 D12 पाप कुर्वंति निश्रित, B4 पापमेवानुवर्तते —^{c}) Ś1 D12 पाप मर्पेण, Ñ1 D1–4 11 13 पापमार्गेण, D8–10 कोपमा°, G(ed) °भावेन, Cv as in text (for पापमार्येण) D6 कोप धैर्येण यो हति —^{d}) D1 न (for स) V1 B2 D3 6 11 T1 M2 वीर, D13 धीर (for वीर) D3 11 पुरुषाधम

7 For the sequence in D11, cf v. l I —^{a}) D6 8–10 T1 G3 अत्र (for अद्य) Ś1 Ñ V1 2 B D1–4 7 11–13 G1(after corr as in text) कार्यं (for ग्राह्य) —^{b}) B2(after corr as in text) सानुवृत्तेन Ś1 D2–4 11–13 गर्हित (for लक्ष्मण) D1 साधुवृत्तविगर्हित —^{c}) Ñ1 G(ed) वृत्तिम् (for प्रीतिम्) —Ñ1 illeg from 7^{d} up to सुग्री in 8^{c} —^{d}) Ñ2 V1 2 D7 सौहृद, D2 4 11 13 लक्ष्मण (for सगतम्) Ś1 D12 पूर्ववत्त(Ś1 °त्व) च लक्ष्मण, B1–3 पूर्वं वृत्त(B1 °र्ववत्त) च सौहृद, B4 पूर्वदृष्ट च सगम, D1 3 पूर्ववृत्ते च(D3 °त्ता तु) लक्ष्मण

8 For the sequence in D11, cf v l I Ñ1 illeg up to सुग्री in 8^{c} (cf v l 7) —^{a}) Ś1 D12 सम- (for साम-) V2 D3 -[उ]पह(D3 °ग)तया, D1 °पन्नया (for °हितया) —^{b}) V2 D2 13 परिमार्जयन् D4 11 परिवर्जयेत् —^{d}) D12 -सग्रह (for -पर्यये) Ś1 Ñ V1 2 B D3 4 7 11 अतीत(Ñ2 D7 11 °ते) कालसग्रहे(Ś1 Ñ1 °ह), D1 2 13 पति(D1 सत, D2 पत)त कालसग्रहे ❀ Ck व्यतीत भावे निष्ठा ❀

9 For the sequence in D11, cf v l I —^{a}) Ś1 D4 12 एवम् (for ऽग्रजेन) D2 13 [अ]वशिष्टार्थो —^{c}) Ś1 Ñ1 D1–4 11–13 प्रययौ ता(Ñ1 स) (for प्रविवेश). B4 श्रीमॉल् (for वीरो) Ñ2 V1 2 B1–3 D7 आ(V2 B2 3 प्र)जगाम पुरीं श्रीमॉल —^{d}) Ś1 Ñ2 V1 2 B1–3 D7 12 शुभलक्षण, Ñ1 D1 3 पुण्यलक्ष(D1 °क्ष्म)ण, B4 कमलेक्षण, D3 11 पुण्यकर्मकृत्(D11 °र्मण) (for परवीरहा). ❀ Cv सोऽग्रजेत्यादिश्लोकद्वय वक्ष्यमाणस्य सक्षेप । So also Cr m ❀

ततः शुभमतिः प्राज्ञो भ्रातुः प्रियहिते रतः ।
लक्ष्मणः प्रतिसंरब्धो जगाम भवनं कपेः ॥ १०
शक्रबाणासनप्रख्यं धनुः कालान्तकोपमः ।
प्रगृह्य गिरिशृङ्गाभं मन्दरः सानुमानिव ॥ ११
यथोक्तकारी वचनमुत्तरं चैव सोत्तरम् ।
बृहस्पतिसमो बुद्ध्या मत्वा रामानुजस्तदा ॥ १२
कामक्रोधसमुत्थेन भ्रातुः कोपाग्निना वृतः ।
प्रभञ्जन इवाप्रीतः प्रययौ लक्ष्मणस्तदा ॥ १३
सालतालाश्वकर्णांश्च तरसा पातयन्बहून् ।
पर्यस्यन्गिरिकूटानि द्रुमानन्यांश्च वेगतः ॥ १४
शिलाश्च शकलीकुर्वन्पद्भ्यां गज इवाशुगः ।
दूरमेकपदं त्यक्त्वा ययौ कार्यवशाद्द्रुतम् ॥ १५

---

10 ^{a}) B2 3 स सुमति, D1 4 9 T2 3 G3 शुभमति-, D2 13 शुभगति (D13 °ति-) (for °मति) B1 अतिवेगगति प्राज्ञो —^{b}) T2 भ्रातृ- (for भ्रातु) V1 भ्रातु प्रियतर वच —^{c}) D3 G1 -सक्रुद्धो (for -सरब्धो) —^{d}) D1 भुवनं, D4 तद्भन, D7 भवन (for भवन) V3 B4 हरे

11 ^{a}) D5 शत्रु- (for शक्र-) V1 3 B2 -बाणाशनि- (for -बाणासन-) Ś1 Ñ1 D1–4 11–13 शक्रचापनिभ(Ñ1 illeg from भ to काला in ^{b}) घोर(D1 3 चाप), G1 शक्राशनिसमप्रख्य —^{b}) D1 चित्र (for धनु) Ś1 Ñ1 D1–6 8–13 T1 2 G1 3 M1 Ck t -[उ]पम (for -[उ]पम). Ñ2 V1 2 B D7 धनुर्दंडमिवातक —^{c}) B1 प्रकृष्ट-, D13 प्रतिगृह्य (hypm) (for प्रगृह्य) Ñ2 V1 B1 3 D7 गिरिशृगाभो, V3 B4 गिरिसकाशो, G(ed) स महावीर्यो.—G(ed) om 11^d–12^c —^{d}) D13 मदर V2 प्रसानुमान्(hypm), M3 शृगवान् (for सानुमान्) B1 यथा (for इव) D5 मदर सोशुमानिव —After 11, D3 ins, while D11 subst. for 12^{ab}

594* स रोषादभिताम्राक्षो निदाघरविसनिभ ।

[D3 सरोपाद्]

12 G(ed) om 12^{abc} (cf v l 11) —^{a}) Ñ2 V1 2 B D7 यथोक्तवक्ता (for °कारी) D3 यथोक्तवचन वक्ता —^{b}) Ñ2 V1 B1–3 D7 सत्त्व(V1 स च, B1–3 साम)युक्तो महाबल, V2 आरेभे वचनोत्तर, B4 D3 सारवच्चैव चोत्तर —For 12^{ab}, Ś1 Ñ1 D1 2 4 12 13 subst

595* यथोक्तवचसा वक्ता ब्राणा कर्मणोत्तम ।

[D2 13 मनुजोत्तम (for कर्मणो°) Ñ1 ++++मनुत्तर (illeg), D1 मोत्तराणाम + . (lacuna up to 22^{cd}) (for the post half)],

whereas D11 subst 594*

—^{c}) Ś1 Ñ2 V1 D2 4 7 11–13 -मतिर्वीरो, Ñ1 -समो वीरो, V2 B4 -समो धीरो, B1–3 -मतिर्धीमान्, D3 -मतिर्धीरो (for -समो बुद्ध्या) —^{d}) Ñ2 V1 2 B D7 11 G(ed) वभौ, G2 ज्ञात्वा (for मत्वा) V2 T2 M2 3 तथा (for तदा) Ś1 Ñ1 D2–4 12 13 भ्राता रामस्य लक्ष्मण

13 D1 lacuna for 13 (cf. v. l. 12) —^{a}) Ñ2 V2 B1 4 D2 7 13 राम- (for काम-) D11 -शोक- (for -क्रोध-) T3 -समुद्भेन —^{b}) Ñ1 D5 6 8–11 T1 G Ck t भ्रातु· क्रोध, Ñ2 V1 2 B D7 ज्वलि(D7 °ल)तेन, D2–4 13 भ्रातृ(D3 °तु)-शोक- (for भ्रातु कोप-) Ś1 D12 भ्रातृशोकेन चावृत —^{c}) Ś1 Ñ1 V1 2 B D2 4 11–13 [अ]विष्ट, D3 [अ]सक्त, D6 10 प्रीत., G3 [अ]धृष्टि·, Ct as in text (for [अ]प्रीत·). G(ed) यथाधृष्ट (for इवाप्रीत) —^{d}) V2 B D11 स ययौ (for प्र°) D5 6 8–11 G M2 तत, T2 तथा (for तदा). —For 13^{cd}, Ñ2 D7 subst., while V2 B ins after 13

596* शरजालांशुमान्वीर स लक्ष्मणदिवाकर ।
कपिराजहृद दीप्त पास्यन्निव शरांशुभि ।

[B2 om. l 2 —(l 2) Ñ2 D7 दीप्त, B1 3 दिव्य (for दीप्त) B3 पश्यन् (sic) (for पास्यन्)]

14 D1 lacuna for 14 (cf v l 12).—^{a}) Ñ2 V1 2 B1 2 4 D2–4 6 7 11 शाल-, G(ed) सालास् (for साल) V2 तु, B2–4 D7 स (for च) Ś1 D12 सालास्ताला(D12 सालताला)स्तमालाश्च, D13 शालाश्वकर्णांश्च पनसान् (hypm) —^{b}) Ñ1 illeg for पातयन्बहून् G1 पादपान्, G3 चालयन् (for पात°) Ś1 D2–4 11–13 द्रुमान्, D5 8–10 बलात् (for बहून्) —After 14^{ab}, Ñ B1–3 D2–4 7 11–13 L(ed) read 15^{cd} —V1 2 B4 G(ed) om 14^c–15^b —^{c}) Ñ2 प्रविशन्, B1–3 D7 प्रपश्यन्, D2 4 5 13 पर्यस्य (for पर्यस्यन्) —^{d}) D3 8–10 T1 2 G2 3 M2 Ck t वेगित· (for वेगत·) Ś1 Ñ B1–3 D2 4 7 11–13 द्रुमान्भजन्महाबल

15 D1 lacuna for 15 (cf v. l 12) V1 2 B4 G(ed) om 15^{ab} (cf v l 14) —^{a}) D11 शालाश्च (for शिलाश्च) —^{b}) Ś1 B1–3 D2–4 7 11–13 वज्र, Ñ2 वक्र (sic) (for गज) D4 इवासुर —Ś1 om 15^{cd} —Ñ B1–3 D2–4 7 11–13 L(ed) read 15^{cd} after 14^{ab} —^{c}) D3 एक (for एक) D5 पदी (for पद) Ñ1 D2 4 12 13 दूरादेव(D4 °क-) पथ त्यक्त्वा, Ñ2 V1 2 B2 4 D7 दूरादेकपदीं (B2 °दीम्) त्यक्त्वा, B1 3 दूरादेव कपीस्त्यक्त्वा, D3 (sic) 11 दूरादेक(D3 °व)पथस्त्यक्त्वा —^{d}) D6 द्रुत, D11 त्वरात् (for द्रुतम्) B4 ययौ कार्यवशा गत

तामपश्यद्बलाकीर्णां हरिराजमहापुरीम् ।
दुर्गामिक्ष्वाकुशार्दूलः किष्किन्धां गिरिसंकटे ॥ १६
रोषात्प्रस्फुरमाणोष्ठः सुग्रीवं प्रति लक्ष्मणः ।
ददर्श वानरान्भीमान्किष्किन्धाया बहिश्चरान् ॥ १७
शैलशृङ्गाणि शतशः प्रवृद्धांश्च महीरुहान् ।
जगृहुः कुञ्जरप्रख्या वानराः पर्वतान्तरे ॥ १८
तान्गृहीतप्रहरणान्हरीन्दृष्ट्वा तु लक्ष्मणः ।
बभूव द्विगुणं क्रुद्धो बह्विन्धन इवानलः ॥ १९
तं ते भयपरीताङ्गाः क्रुद्धं दृष्ट्वा प्लवंगमाः ।
कालमृत्युयुगान्ताभं शतशो विद्रुता दिशः ॥ २०
ततः सुग्रीवभवनं प्रविश्य हरिपुंगवाः ।
क्रोधमागमनं चैव लक्ष्मणस्य न्यवेदयन् ॥ २१
तारया सहितः कामी सक्तः कपिवृषो रहः ।
न तेषां कपिवीराणां शुश्राव वचनं तदा ॥ २२ G 4 31 19 B 4 31 22 L 4 24 18

16 D1 lacuna for 16 (cf v l 12) —[a]) Ś1 Ñ1 D2–4 11–13 अथ (for ताम्) Ñ2 V1 2 B1–3 D3 7 11 समाकीर्णां, G2 गजाकीर्णां —[b]) V2 B4 कपि- (for हरि-) Ś1 Ñ1 2 (marg) V1 B1–3 D2–4 7 11 13 कपिराजपुरीं शुभा (Ñ2 V1 B1–3 D7 तदा) —[c]) Ś1 Ñ1 D3 4 12 सौम्याम्, D2 13 सौम्य (for दुर्गाम्) D11 ऋक्षवानरसकीर्णां —[d]) Ś1 (here and below) किष्किदा D11 गिरिसनिभा —For 16^{cd}, Ñ2 V1 B1 D7 subst , while V2 B2–4 D3 11 ins after 16^{ab}

597* कपिभि शैलसकाशै ससानूपवनैरिव ।

[D3 11 मेघ- (for शैल-) V1 प्रभजनवनैरपि, D3 11 कायवद्भिर्नगैरिव, G(ed) समाहितैर्महाबले (for the post half)]
—After 16, Ś1 Ñ1 D2–4 12 13 ins

598* कपिभि शैलसकाशै समन्तादभिनादिताम् ।
तत सुग्रीवभवन लक्ष्मण स ददर्श ह ।

[(l 1) Ś1 D12 साल- (for शैल) —D9 om l 2 —(l 2) D4 सददर्श]

17 D1 lacuna for 17 (cf v l 12) Ñ2 V1 2 B D7 G(ed) om 17 D3 om 17^{ab} —[a]) D4 11 प्रस्फुरमाणौष्ठ —[b]) Ś1 D2 4 12 13 वानर (for सुग्रीव) —[c]) Ñ1 D3 च हरीन् (for वानरान्) Ñ1 D3 11 भीतान् , M2 वीरान् (for भीमान्) —[d]) Ñ1 D5 8 10 11 T1 किष्किधाया —For 17^{cd}, Ś1 D2 4 12 13 subst

599* स ददर्श हरीन्भीतान्किष्किन्धाया च नि स्वनान् ।

[D2 निस्वनान्, D4 12 निस्वरान]

—After 17, D5 6 8–10 S ins

600* त दृष्ट्वा वानरा सर्वे लक्ष्मण पुरुषर्षभम् ।

18 D1 lacuna for 18 (cf v l 12) Cr does not comm on st 18–27 —[a]) Ñ1 D2 -शृंगाश्च (sic) (for -शृङ्गाणि) —D6 reads from तश up to रुहान् in [b] in marg D3 M1 बहुश (for शतश) —[b]) Ñ2 V1 2 B1–3 D7 महाद्रुमान् (for महीरुहान्) —[c]) D9 कुजरप्रख्य- —[d]) Ś1 Ñ1 B4 D2–4 11–13 ये (D11 ते) वनातरे, Ñ2 V1 2 B1–3 D7 तद्भयात्तदा (for पर्वतान्तरे)

19 D1 lacuna for 19 (cf v l 12) V1 2 om 19 —[a]) D2 तान्प्रगृहीत- (hypm) —[b]) Ś1 Ñ2 B2–4 D2 3 7 12 13 सर्वान्दृष्ट्वैव, Ñ1 B1 D4–6 8–10 G M2 सर्वान्दृष्ट्वा तु (B1 स, G1 °थ), D11 दृष्ट्वा सर्वान्स (for हरीन्दृष्ट्वा तु) —[c]) D5 परम-, D6 9 द्विगुण- (for द्विगुण) D3 11 दीप्तो (for क्रुद्धो) Ś1 Ñ B D2 4 7 12 13 भूय एवाभवत्क्रुद्ध (D13 °त्क्रोधो) —[d]) Ñ2 B D7 हविषाक्त, D13 वाग्किधन (corrupt) (for बह्विन्धन)

20 D1 lacuna for 20 (cf v l 12) —[a]) B1–3 D7 G1 3 ततो, D11 ते त (by transp) (for त ते) Ñ2 V1 2 B D7 समाविष्टा (for परीताङ्गा) —[b]) D4 5 8–10 क्षुब्ध (for क्रुद्ध) —[c]) Ś1 D11 12 काल (for काल-) G2 -कृतान्ताभं (for -युगान्ताभ) D6 T3 कालमृत्युमिवा(D6 °त्यु समा)यात —[d]) Ś1 Ñ1 D2–4 12 13 दुद्रुवुस्तदा(Ñ1 D3 °त), Ñ2 V1 2 B1–3 D7 विद्रुतास्तत , B4 D11 [ऽ]थ(B4 त्रि) प्रदुद्रुवु (for विद्रुता दिश)

21 D1 lacuna for 21 (cf v l 12) —[b]) Ś1 Ñ1 D2–4 12 13 हरयस्तदा(Ñ1 °था) (for हरिपुगवा) —[cd]) B4 सक्रोधमागत चैव (for [c]) Ś1 Ñ1 D2 4 12 13 तस्मै सर्वं, B4 लक्ष्मण च (for लक्ष्मणस्य) Ñ2 V1 2 B1–3 D3 7 11 ते(D3 11 प्र) शशसुरमात्येभ्यो लक्ष्मण क्रुद्धमागत

22 D1 lacuna for 22 (cf v l 12) —[ab]) D10 ता दिश (sic) (for तारया) D5 8–10 -वृषस्तदा, T1 -वृषा तदा, G2 -वृषो हरि (for -वृषो रह) Ś1 D4 12 ताराया सह काताया (Ś1 सहकर्ता य) सक्त कपिवरे(Ś1 °ने)श्वर , D2 13 ताराया सम(D13 सग)मासक्त श्रुत्वा कपिवरेश्वर —For 22^{ab}, Ñ V1 2 B D3 7 11 subst

601* तारया सह सुग्रीवो रममाण पुरे तदा ।

[B4 कामार्तो (for सुग्रीवो) D7 पुर, G(ed) सुरस (for पुरे) Ñ1 प्रयुक्त कपिवरो रह (hypm), B4 रक्त कपिनृपो रह , D3 वसन्नन पुरे रह , D11 क्रीडन्नत पुरे स्थित (for the post half)]

—[c]) Ś1 Ñ1 D2–4 12 13 G2 हरि- (for कपि) D5 8–10 -सिंहाना (for -वीराणा) —[d]) Ñ2 V1 2 B1–3 D7.11 क्रोशता (for वचन) T2 तथा, G(ed) स्वन (for तदा)

31 20 ततः सचिवसंदिष्टा हरयो रोमहर्षणाः ।
31 23 गिरिकुञ्जरमेघाभा नगर्या निर्ययुस्तदा ॥ २३
24 19 नखदंष्ट्रायुधा घोराः सर्वे विकृतदर्शनाः ।
सर्वे शार्दूलदर्पाश्च सर्वे च विकृताननाः ॥ २४

दशनागबलाः केचित्केचिद्दशगुणोत्तराः ।
केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः ॥ २५
कृत्स्नां हि कपिभिर्व्याप्तां द्रुमहस्तैर्महाबलैः ।
अपश्यल्लक्ष्मणः क्रुद्धः किष्किन्धां तां दुरासदाम् ॥ २६

---

23 [a]) Ś1 D12 सचिवा (for सचिव-) D3 -निर्दिष्टाः D11 -सहृष्टा (for -संदिष्टा) D1 तत कपिवरा सर्वे, D13 ततस्ते विवश दृष्ट्वा —[b]) Ñ1 कपयोः D1 समतात् (for हरयो) V1 B लोमहर्षणा, D2 13 कामरूपिण, D3 11 भीमविक्रमा, D6 T2 G2 रोमहर्षिण Ś1 D4 12 कपय कामरूपिण —D11 om 23[cd] —[c]) Ś1 Ñ1 B4 D1–4 12 13 मेघकुञ्जरगि (D1 °भा)र्याभा —[d]) Ñ V1 2 B D1 3 6–10 G M2 Ck t नगरात् (for नगर्या). T2 तथा (for तदा)

24 [a]) Ñ2 V1 B1–3 D6 7 9 11 वीरा, B4 भीता॰, D1 3 रौद्रा, D8 10 सर्वे (for घोरा) Ñ1 नखदंष्ट्रायुधधरा, V2 नखदन्तायुधा भीमा —D4 om (hapl) 24[b] —[b]) D3 भीमा, D8 10 वीरा (for सर्वे) D13 विकृति- —Ś1 Ñ V1.3 B1 3 D7 om (hapl) 24[cd] —[c]) B2 4 -विन्नाता, D6 8–10 -दष्टाश्च (for -दर्पाश्च) —[d]) B2 4 सुव्यक्त- (for सर्वे च) D8–10 Ct सर्वे विकृतदर्शना

25 [b]) D9 om (hapl) केचिद् D11 केचिद्वायुबलोपमा —After 25[ab], D11 ins 602*. —[d]) V1 D8 10 तस्य, D9 तत्र (for तुल्य-) D6 8–10 Ct -प्रचैम (for -विक्रमा) —After 25, Ś1 Ñ V1 2 B D1–4 7 12 13 T G2 ins, D11 ins after 25[ab], K(ed) ins after 25 (within brackets)

602* सन्ति चौघबला केचित्केचिद्वायुबलोपमा ।
अप्रमेयबलाश्चान्ये तत्रासन्हरियूथपा ।

[Ñ1 D4 G2 om l. 1 D11 transp l 1 and 2 —(l 1) Ś1 D12 कोटिबला, B1 3 चौर° (sic), D3 मेघ°, D11 13 वौघ° (for चौघ°) D1 सन्ति नागबला केपि (for the prior half) D2 13 T -बलोत्तमा (T °रा) (for -बलोपमा) Ñ2 V1 2 B1–3 D7 केचित्पवन(B1 °रम)रहस, D11 केचिद्दशगुणोत्तरा (for the post half) —(l 2) D3 T G2 केचिद् (for चान्ये) D3 वासयन् (for तत्रासन्) T हरिपुंगवा]

—Thereafter Ś1 Ñ1 D1–4 12 13 cont, B4 ins after 26, whereas G3 K(ed, within brackets) ins after 29

603* तानचिन्त्य महावीर्यो लक्ष्मण· परवीरहा ।
प्रविवेश महाबाहु सुग्रीवभुजपालिताम् ।
तत कैलाससंकाश तप्तकाञ्चनवेदिकम् ।
सुग्रीवभवन श्रीमद्दृष्ट्वा द्वारि व्यवस्थित ।

[(l 1) Ñ1 illeg up to लक्ष्मण Ś1 तान्विचिन्त्य, G3 K(ed) वाणामन- (for तानचिन्त्य) D1 3 महावीर्यान् B4 तामासाद्य तदा वीर्यो (for the prior half) —(l 2) B4 G3 K(ed) प्रविवेश दुराधर्षां पुरीं सुग्रीवपालिता —(l 3) Ñ1 तत स (hypm) (for तत). G3 K(ed.) नीलाभ्र- (for कैलास-) D4 -सघात, D11 -सकाशं (for -संकाश). D13 -वेदिका (for -वेदिकम्) —(l 4) B4 -वचन, D1 भुवन (for -भवन) Ñ1 दृष्ट्वा श्रीमान्, D2 13 श्रीमान्दृष्ट्वा (for श्रीमद्दृष्ट्वा) B4 श्रीमानासाद्य विष्ठित (for the post half) G3 K(ed) श्रीमद्विमानमासाद्य रमणीय मनोरम.]

—Then Ś1 Ñ1 B4 D1–4 12 13 read 4.32. 21–24, while G3 K(ed) cont

604* शुश्राव परमस्त्रीणा सोत्कृष्ट हसितस्वनम् ।
[K(ed) सोत्कृष्ट]

On the other hand, Ñ2 V1 2 B D7 T G2 K(ed within brackets) cont after 602*, whereas Ś1 Ñ1 D1–4 12 13 cont after 615*, D11 ins l 4 only after 25

605* विप्रकीर्णमिवाकाश सछन्नमिव तद्वनम् ।
तेन वानरसैन्येन सुग्रीवस्य महात्मन ।
ततो द्वाराणि बलवानङ्गद समचिवारयत् ।
पर्यधावत दुर्धर्षो नक्षत्राणीव चन्द्रमा ।

[D3 om up to the prior half of l 2 (cf v l 615*) T1 om l 1 —(l 1) Ś1 Ñ1 D1 2 4 12 13 G2 प्रतिपूर्णम्, B2 प्रविकीर्णम्, B4 परिपूर्णम् (for विप्रकीर्णम्). V1 2 सछिन्नम् (for सछ°) D2 13 तद्बल (for तद्वनम्) B4 सच्छन्नेव महागुहा (for the post half) —(l 2) Ś1 Ñ1 D1–4 12 13 महाकपे (for °त्मन) —T om l 3 —(l 3) V2 om, B1 द्वारे च, B3 द्वारि च (for द्वाराणि) Ś1 Ñ1 B4 D1–4 12 13 G2 K(ed) सर्वाणि, V1 धवलान् (sic) (for बलवान्) Ñ1 दृष्ट्वा (for अङ्गद) —Ñ1 illeg from समचिवारयत् up to the prior half of l 4 Ś1 D2 4 12 13 दृष्ट्वा परिवारयन्, B4 युवराजो महात्मा, D1 3 दृष्ट्वा पितृराजया, G2 K(ed) चा (K[ed] अ)गतो गजशामनान् (for the post half) —(l 4) Ś1 पर्युत्क्रामन, B4 D2 4 12 13 पर्याक्रमन, D1 3 पराक्रमत (for °धावत) D11 पर्यक्रामत्सुदुर्धर्षो (for the prior half) D4 नक्षत्राणा च (for °णीव) G(ed) महावेगेन सर्वश (for the post half)]

—Thereafter Ś1 Ñ1 D1–4 12 13 read 26 and 27

26 Ś1 Ñ1 D1–4 12 13 read 26 and 27 after 605* (cont after 615*) —[a]) Ñ2 V1 B1–3 D7 स कृत्स्ना, V2 सत्कृता, D2 4 11 13 G2 कृत्स्न हि, D8–10 ततस्तै (for कृत्स्नां हि) Ñ1 D1 3 गुप्तां, D12 व्याप्ता (for व्याप्तां) D5 कृत्स्ना हि कपिभिर्व्याप्ति (sic). —[b]) Ñ1 महाबल·, Ñ2 V1 2 B2 4

ततस्ते हरयः सर्वे प्राकारपरिखान्तरात् ।
निष्क्रम्योदग्रसत्त्वास्तु तस्थुराविष्कृतं तदा ॥ २७
सुग्रीवस्य प्रमादं च पूर्वजं चार्तमात्मवान् ।
बुद्ध्वा कोपवशं वीरः पुनरेव जगाम सः ॥ २८
स दीर्घोष्णमहोच्छ्वासः कोपसंरक्तलोचनः ।
बभूव नरशार्दूलः सधूम इव पावकः ॥ २९
बाणशल्यस्फुरज्जिह्वः सायकासनभोगवान् ।
स्वतेजोविषसंघातः पञ्चास्य इव पन्नगः ॥ ३०
तं दीप्तमिव कालाग्निं नागेन्द्रमिव कोपितम् ।
समासाद्याङ्गदस्त्रासाद्विषादमगमद्भृशम् ॥ ३१
सोऽङ्गदं रोषताम्राक्षः संदिदेश महायशाः ।
सुग्रीवः कथ्यतां वत्स ममागमनमित्युत ॥ ३२

G 4 31 0
B 4 31 32
L 4 24 33

D7 समतत , B1 3 सदैव हि, D11 महात्ममि (for महाबले) —[c]) G(ed) तत्र (for क्रुद्ध) —[d]) Ś1 D4 12 च, Ñ1 स, V2 3 B4 D2 3 11 13 G3 सु- (for ता) Ñ2 V1 B1–3 D7 वालिपालि(Ñ2 °लि॰)ता, D1 दुमरासदा (sic) (for ता दुरासदाम्) —After 26, B4 ins 603*

27 Ś1 Ñ1 D1–4 12 13 read 26 and 27 after 605* (cont after 615*) B4 reads 27 (including 606*) after 616* —[a]) Ś1 D1–4 11–13 तु (for ते) Ñ2 V B1–3 D6 7 वानरा सर्वे, B4 वानरश्रेष्ठा (for हरय सर्वे) —[b]) Ś1 Ñ2 D2–4 12 13 प्रासाद-, D7 प्राकारात् (for प्राकार-) G3 प्लवमानास्ततस्तत —[c]) Ś1 Ñ1 निर्गम्य, G3 विक्रम्य D1 -सत्त्वास्ते, D11 -सत्त्वास्ते (for सत्त्वास्तु) D2 4 12 निर्गम्यो- (D4 °म्यो)दग्रसत्त्वास्ते, D3 13 नि क्रा(D13 निर्ग)म्योदय-सत्त्वास्ते —[d]) Ś1 D12 अधिकृतास् , D1–4 13 T1 आविष्कृतास् (for आविष्कृत) M1 तस्थुराविष्कृतायुधा ❀ Cm g प्राकार परिखान्तरान्निष्क्रम्याविष्कृत प्रकट यथा (Cg प्रकाश यथा भवति) तथा तस्थु । , Ck प्राकारस्तद्बहिर्वर्तिनी परिखा च तदनन्तरात्तदवधेरपि बहिर्निष्क्रम्याविष्कृतमाविष्कृतानिरोधन यथा तथा। तदा तस्थु ।, Ct प्राकाराद्बहिर्वर्तिनी परिखा तदन्तरात्तदवधेरपि बहिर्निष्क्रम्याविष्कृत प्रकटित यथा तथा तस्थु ❀—For 27[cd], Ñ2 V B D7 subst

606* निर्ययुश्च पुरोद्यानाधे तत्र पुरत स्थिता ।

[Ñ2 D7 ते (for च)]

—Thereafter D7 reads 35[ab], 1 2 of 622*, 621* and 43[ab]

28 D11 om 28–34 Ñ2 V B1–3 D7 read 28–31 after 4 32 24 Ñ1 illeg from प्र in [a] up to रेव in[d] —[a]) D10 सुग्रीव॰ Ś1 D1 प्रमोद, D6 प्रसाद (for प्रमाद) Ñ2 V2 3 B1–3 D2–4 7 12 13 स सुग्रीवप्रमो(Ñ2 V3 B1 3 D7 °सा)द च, V1 स सुग्रीव च प्रासाद (sic) —[b]) Ś1 D4 12 पूर्वजस्यार्तिमुत्तमा, Ñ2 V B1–3 D1–3 7 13 पूर्वजे चा(D2 13 °ना)र्तिमुत्तमा, B4 G(ed) पूर्वजे चार्तिमात्मन (G[ed] °मेव च), D5 8–10 M1 Ct पूर्वजस्यार्थ(M1 °र्ते)मात्मवान् ❀ Cv r पूर्वज चार्तमात्मवानिति सम्यक् ❀—V1 illeg from [c] up to पुनरे in [d] —[c]) Ś1 B4 D6 T G M1 2 क्रोधवश, V2 कोपपर, B1 3 °वशाद्, G(ed) °वशो (for कोपवश) D2 13 सुकोप भृशसचीर (sic), D5 8–10 दृष्ट्वा क्रोधवश वीर —[d]) Ś1 Ñ2 V B D1–4 6 7 12 13 ह (for स)

29 D11 om 29 (cf v l 28) For the sequence in Ñ2 V B1–3 D7, cf v l 28 —[a]) D5 स दीर्घोष्णमहेष्वास (corrupt), G2 स तु दीर्घोष्णनिश्वास —[b]) D6 क्रोध- (for कोप-) —For 29[ab], Ś1 Ñ V B1–3 D1–4 7 12 13 subst

607* नि श्वस्य दीर्घमुष्ण च कोपाद्रक्तान्तलोचन ।

[Ñ2 V1 2 B1 3 D1 2 4 7 13 निश्वस्य Ñ2 V1 3 B1–3 D7 उद्भ्रान्तलोचन]

—[d]) Ñ2 V B D7 विधूम (for सधूम) —After 29, G3 K(ed , within brackets) ins 603* and 604*

30 D11 om 30 (cf v l 28) For the sequence in Ñ2 V B1–3 D7, cf v l 28 —[a]) Ś1 D12 -खड्ग-, D1 -शिल्प , D2 4 13 -शब्द-, D5 शल्य (for -शल्य-) —Ñ1 illeg after सा in 30[b] up to नागेन्द्र in 31[b] —[b]) D4 सायकामनसो भवान (corrupt) —[c]) V3 D7 सुतेजो-, D2 13 स्वरयो- (for स्वतेजो-) D5 8–10 Ct सभूत (for -सघात) —[d]) D4 (erroneously through eye-wandering) पावक (for पन्नग)

31 D11 om 31 (cf v l 28) For the sequence in Ñ2 V B1–3 D7, cf v l 28 Ñ1 illeg up to नागेन्द्र in [b] (cf v l 30) —[a]) V1 प्रदीप्तम्, D3 सदी° (for त दीप्तम्) —[b]) B4 रोपित (for कोपितम्) —[d]) D5 8–10 पर, Ck as in text (for भृशम्) B4 G3 विषादी स(G3 °दवि)मुखोभवत् —For 31[cd], Ś1 Ñ V B1–3 D1–4 7 12 13 subst

608* सहसैवाङ्गदो दृष्ट्वा द्वारप्रतिमुखोऽभवत् ।

[D1 2 4 13 [आ]गत (for [अ]ङ्गदो) D2 द्वास , D4 द्वार (for द्वार) Ñ2 V B1–3 D7 G(ed) द्वास्थो(V1 B1 2 द्वा स्थो G[ed] आनो) हीण(V नीत, B3 प्रीत)मुखोभवत् (for the post half)]

—Ñ2 V B1–3 D7 cont

609* अन्ये च हरयो द्वास्था गृहकक्षागतास्तथा ।
कृताञ्जलिपुटा नीचैर्लक्ष्मणाय प्रणेमिरे ।

[(l 1) Ñ2 B1 D7 महवो (for हरयो) B1 2 द्वा स्था V3 गृहकच्छ-, B1–3 गृहकक्षा, G(ed) °कक्ष्य (for °कक्षा-) —(l 2) D7 लक्ष्मणस्य]

32 D11 om 32 (cf v l 28) Ñ2 V B1–3 D7 om 32–34 —[a]) D10 सोंगदे D3 -सविघ्न (for -ताम्राक्ष) Ś1

33 एष रामानुजः प्राप्तस्त्वत्सकाशमरिंदमः ।
34 भ्रातुर्व्यसनसंतप्तो द्वारि तिष्ठति लक्ष्मणः ॥ ३३

लक्ष्मणस्य वचः श्रुत्वा शोकाविष्टोऽङ्गदोऽब्रवीत् ।
पितुः समीपमागम्य सौमित्रिरयमागतः ॥ ३४

D2 4 12 13 अंगद रोषसंविग्न°, Ñ1 D1 अंगद रोषसदुष्ट —^{b}) Ś1 Ñ1 D1–4 12 13 महाबल, D5 °यथा (for °यशा) —^{c}) B4 सुग्रीवे (for °व) —^{d}) B4 ममागमनकारण —For 32^{cd}, Ś1 Ñ1 D1–4 12 13 subst.

610* मामिहोपस्थित शीघ्र सुग्रीवाय निवेदय ।
[D1 3 [अ]वस्थित (for [उ]प°)]

33 Ñ2 V B1–3 D7.11 om 33 (for D11, cf. v l 28 and for the rest, cf v l 32) —^{b}) B4 त्वत्समीपम् (for त्वत्सकाशम्) B4 D5 8–10 T M1 Ck अरिंदम, Cg अरिंदम (as in text) —^{c}) T1 G2 M2 Cg भ्रातृ- (for भ्रातुर्). T3 -सदीप्तो, Cg as in text (for -संतप्तो) B4 भ्रातुर्वचनमास्थाय —^{d}) B4 तेग्रत (for लक्ष्मण·) ❀ Cv एष रामानुज इत्याद्युत्तर इतिकरणे सबन्ध ।, Ck एष इति द्वारासन्नस्य परामर्श ❀ —For 33, Ś1 Ñ1 D1–4.12 13 subst

611* एष वै लक्ष्मणो नाम रामवाक्यप्रचोदित ।
व्यवसायरथेनाशु शीघ्र प्राप्तो महाकपे ।

[(l 1) D1 2 13 प्रनो(D13 °णो)दित (for -प्रचोदित) D3 रामवाक्येन नोदित (for the post half) —(l. 2) Ñ1 illeg for the prior half D1.3 [अ]च and महाबल (for [आ]शु and °कपे respy)]

—After 33, B4 D5 6 8–10 S ins

612* तस्य वाक्य यदि रुचि क्रियता साधु वानर ।
इत्युक्त्वा शीघ्रमागच्छ वत्स वाक्यमरिंदम ।

[(l 1) D5 M3 वाक्ये, Ck t as above (for वाक्य) D6 8 (before corr) 9 10 वानर (for वानर) B4 श्रूयतामयि वानर (for the post half) —(l 2) D5 वश्य (for वत्स) B4 D5 6 8–10 G1 3 M2 Ct इद मम, Ck as above (for अरिंदम)]

34 Ñ2 V B1–3 D7 11 om 34 (for D11, cf v l. 28 and for the rest, cf v l 32). —^{b}) G2 क्रोधाविष्टो, M2 त्वराविष्टो D1 3 [ऽ]भवत् (for ऽब्रवीत्) ❀ Cv लक्ष्मणस्येत्यादि वक्ष्यमाणस्य सग्रह ।, Cr सौमित्रिरयमागत इत्यत्र इतिकरण द्रष्टव्यम् ।, Cg लक्ष्मणस्येति । अयमागत इत्यनन्तरमितिकरण बोध्यम् ❀ —For 34^{cd}, Ś1 D1–4 12 13 subst

613* तथेति कृत्वा वचनमेतत्सर्वं न्यवेदयत् ।

[D2 13 च पितुर् (for वचनम्) D1 तथेत्युक्त्वा च पितुर् (for the prior half) D1 ग्तमर्थं, D2 3 13 एतदर्थं (for °त्सर्वं) D3 निवेदयत्]

—For 34, Ñ1 subst

614* अङ्गदस्तु वच श्रुत्वा सुग्रीवाय न्यवेदयत् ।

—Ñ1 cont, Ś1 D1–4 12 13 cont. after 613*

615* लक्ष्मणागमन श्रुत्वा सुग्रीव प्लवगेश्वर ।
लक्ष्मण कुपित प्राप्त विदित्वा समुपाविशत् ।

[(l 1) D3 om (hapl) from the post. half up to the prior half of l 2 of 605* Ś1 D1 प्लवगाधिप (for °गेश्वर) —(l 2) D1 मत्वा (for प्राप्त) D1 ततश्चिता समाविशत् (for the post half)]

—Then all the above MSS further cont 605*

—After 34, B4 D5 6 8–10 S ins

616* अथाङ्गदस्तस्य वचो निशम्य
सभ्रान्तभाव परिदीनवक्त्र ।
निपत्य तूर्णं नृपतेस्तरस्वी
तत कुमारश्चरणौ ववन्दे ।
सगृह्य पादौ पितुरुग्रतेजा [5]
जग्राह मातु पुनरेव पादौ ।
पादौ रुमायाश्च निपीडयित्वा
निवेदयामास ततस्तमर्थम् ।
स निद्राक्लान्तसवीतो वानरो न विबुद्धवान् ।
बभूव मदमत्तश्च मदनेन च मोहित । [10]
तत· किलकिला चक्रुर्लक्ष्मणं प्रेक्ष्य वानरा ।
प्रसादयन्तस्त क्रुद्ध भयमोहितचेतस ।

[(l 1) B4 चैव, D9 त्वस्य (for तस्य) D5 8–10 सुतीव्रवाचा (for वचो निशम्य) —(l 2) M1 -वेग (for -भाव) D8–10 Ct पर, Ct p as above (for परि-) B4 सभ्रातचेता परिवृत्तवक्त्र —B4 om l 3 and 4 —(l 3) D5 8–10 Ct निर्गत्य, D6 उपेत्य D8–10 T2 3 M1 Ct पूर्वं (for तूर्णं) —(l 4) D8–10 Ct रुमायाश्च, Cv r as above (for कुमारश्च) ❀ Cv r निपत्य तूर्णं नृपतेस्तरस्वी तत कुमारश्चरणौ ववन्दे इति पाठ ❀ —(l 5) M1 स गृह्य T1 3 M1 3 अदय (for उग्र-) —(l 7) D9 पदौ (for पादौ) —(l 8) D5 तमर्थं, D6 8 10 T2 G3 तदर्थं, D9 तदर्थं, G1 समर्थं (for तमर्थम्) ❀ Ck लक्ष्मणस्य वच इति सक्षेपश्लोकार्थस्य विस्तार अथाङ्गदस्तस्येत्यादि । So also Ct ❀ —(l 9) B4 -ग्लानि-, D6 -शाति-, T3 -क्लाति, G1 3 M1 3 -मद-, G2 ग्लात, Cv t as above (for -क्लान्त-) T2 -वीतानो (sic) (for सवीतो) B4 [अ]वबुध्यते, D9 विबुद्धिमान्, G1 3 [अ]वबुद्धवान्, Ct as above (for विबुद्धवान्) M1 वानरेंद्रो न बुद्धवान् (for the post half) —(l 10) D5 om (hapl), T2 मधुमत्तश्च (for मदमत्तश्च) D6 T2 स, T3 वि-, M1 सु- (for second च) B4 बभूव मदनार्त स मदेन च विमोहित —(l. 11) D5 M1 3 किलिकिला B4 वीक्ष्य (for प्रेक्ष्य) —(l 12) B4 T2 स-, D9 ते (for त) D6 क्रोद्ध (for क्रुद्ध) G3 लक्ष्मण समुपस्थित (for the post half).]

—Thereafter B4 reads 27 (including 606*)

ते महौघनिभं दृष्ट्वा वज्राशनिसमस्वनम् ।
सिंहनादं समं चक्रुर्लक्ष्मणस्य समीपतः ॥ ३५
तेन शब्देन महता प्रत्यबुध्यत वानरः ।
मदविह्वलताम्राक्षो व्याकुलस्रग्विभूषणः ॥ ३६
अथाङ्गदवचः श्रुत्वा तेनैव च समागतौ ।
मन्त्रिणौ वानरेन्द्रस्य संमतोदारदर्शिनौ ॥ ३७
प्लक्षश्चैव प्रभावश्च मन्त्रिणावर्थधर्मयोः ।
वक्तुमुच्चावचं प्राप्तं लक्ष्मणं तौ शशंसतुः ॥ ३८
प्रसादयित्वा सुग्रीवं वचनैः सामनिश्चितैः ।
आसीनं पर्युपासीनौ यथा शक्रं मरुत्पतिम् ॥ ३९

G. 4. 31 33
B 4 31 44
L 4 24 48

35 ^{a}) B4 महौघभुव, M2 महेभ° (for महौघनिभ) Ś1 Ñ1 D1 2 4 12 13 त महेद्रनिभ दृष्ट्वा, Ñ2 V B1–3 D3 7 ते महाद्रि(B1 3 °भ्र)निभाका(D3 °भा घो)रा, D11 ते महेंद्र-समाकारा —^{b}) D2 13 वज्रध्वनि- Ñ1 B4 -प्रभ, Ñ2 V B1–3 D3 7 11 -स्वना (for स्वनम्) —After 35^{ab}, D7 ins l 2 of 622*, 621* and then reads 43^{ab}. —^{c}) V3 भृश चक्रुर्, D3 महच्चक्रुर्, G1 3 समा°, G(ed) तदा° (for सम चक्रुर्) D1 सिंहनादस्वन चक्रुर् —^{d}) Ś1 D12 समतत, D4 विशेषत (for समीपत)

36 For 36–39, Ś1 Ñ V B1–3 D1–4 7 11–13 subst 618* —^{d}) D6 8–10 व्याकुल (for व्याकुल-) G3 व्याकु-लागविभूषण —After 36, B4 ins

617* सुग्रीवो वानरश्रेष्ठ सतार इव चन्द्रमा ।

37 For subst in Ś1 Ñ V B1–3 D1–4 7 11–13, cf v l 36 and 39 —^{b}) D6 तेन चैव (by transp) (for तेनैव च) B4 सहसागता, M2 च सहागतौ (for च समागतौ) —^{c}) B4 मन्त्रिणो —^{d}) G2 3 M2 Ck समतौ दा(G2 द्वा)र-, M1 समदौ दार-, Ct as in text (for समतोदार-) B4 -दर्शिन, D8–10 T1 Ct -दर्शनौ, Cm k -दर्शिनौ (as in text) G1 समतौ दारदर्शने ❀ Cm दारदर्शिनौ अन्त पुरप्रवेशयोग्यौ ❀

38 For subst in Ś1 Ñ V B1–3 D1–4 7 11–13, cf v l 36 and 39 For 38–39, B4 subst l 2–15 of 618* —^{a}) D5 प्लक्ष्यश्, D6 पक्षश्, D8 10 यक्षश्, D9 पयश्, M2 ऋक्षश्, Ck t as in text (for प्लक्षश्) T1 G1 (before corr as in text) 2 प्रभासश् (for °वश्) —^{b}) G3 -सिद्ध्यो (for -धर्मयो) D5 मन्त्रिणोदारविक्रमौ (sic) —^{c}) D5 विक्रमोच्चावच G1 प्राप्तौ (for प्राप्त) —^{d}) D6 त (for तौ)

39 ^{b}) D5 8 10 Ct सार्थ-, G1 सान्त्व- (for साम) D6 -निश्चयै, G3 सयुतै, Ct निष्ठितै (for -निश्चितै) D9 वचन सार्थनिश्चिते, G2 वचनै सान्त्वसयुतै —For 36–39, Ś1 Ñ V B1–3 D1–4 7 11–13 subst, B4 subst l 2–15 for 38–39, whereas G3 ins l 2–5 after 39^{ab}

618* तेन शब्देन महता तारया प्रतिबोधित ।
सुग्रीव सचिवै सार्धममन्त्रयत वानर ।
विनतेन सुषेणेन नीलेन च नलेन च ।
अङ्गदेन च शूरेण प्राज्ञेन च हनूमता ।
एते सर्वे महात्मान सर्वे वानरयूथपा ।
एकान्ते ये समासीन शक्र सुरगणैरिव ।
बलविक्रमयुक्ताश्च मन्त्रे च परिनिष्ठिता ।
उत्साह च प्रभाव च मन्त्रे चैवार्थधर्मयो ।
समन्त्र्य सचिवैस्तैस्तु चकार मतिमान्मतिम् ।
लक्ष्मणस्य प्रसादार्थं वानर स प्रचोदित ।
वाक्यमुच्चावच तेषा लक्ष्मण प्रति शुश्रुवे ।
अर्थधर्मसमायुक्त मन्त्रिणा स कपीश्वर ।
तेषा तद्वचन श्रुत्वा सर्वेषामायतिक्षमम् ।
प्रसादयित्वा सुग्रीव बुद्धिमान्मारुतात्मज ।
अब्रवीत्पर्युपासीन यथा शक्र बृहस्पति ।

[(l 1) D1 त्वरया, D3 11 सत्वर (for तारया) Ñ2 V B1–3 D7 च वि(V3 विप्र [hypm])बोधित —(l 2) Ñ1 मन्त्रयामास (for अमन्त्रयत) Ñ2 V B D3 7 11 मन्त्रार्थ(B4 °र्थे, D3 11 °य) समुपाविशत् (for the post half) G3 सुग्रीवमचिवा सर्वे मन्त्रार्थे समुपाविशन् —(l 3) Ś1 Ñ1 विनीतेन, D4 विनयेन (for विनतेन) —(l 4) D11 तथा सार्धं वीरेण (for च शूरेण प्राज्ञेन) —For l 3–4, Ñ2 V B D3 7 G3 subst

618(A)* विनतश्च सुषेणश्च नीलोऽथ नल एव च ।
अङ्गदो वालिपुत्रश्च हनूमांश्चैव बुद्धिमान् ।

[(l 2) B1 वायु- (for वालि-) G3 -सूनुश् (for -पुत्रश्). B3 om first च Ñ2 V हनुमाश्]

—D3 reads l 5 twice (var) —(l 5) Ś1 D3 (first time) 4 12 एतेन्ये च (metri causa), Ñ1 D1 एते चान्ये, V1 एते चैव, D2 13 इत्येते च (D13 °श्च), D3 (second time) 11 सर्वे एव (for एते सर्वे) Ñ2 V B D3 (second time) 7 11 G3 G(ed) सुग्रीव वानरोत्तमा (G[ed]°त्तम) (for the post half) —(l 6) D1 2 13 यैरान्ते पर्यु-पासीन, D4 एकाते च पुरासीन (for the prior half) Ñ1 B4 D3 11 आसीन पर्युपासीना (B4 °सत) शक्र सुरगणा इव (B4 देवा यथा पुरा), Ñ2 V B1–3 D7 पर्युपासन (V B1–3 °सत) आसीन शक्र सुरगणा इव —Ñ1 D1 2 4 13 om l 7 and 8 —(l 7) B1 वाणि (for बल) B4 -मयुक्ता (for -युक्ताश्च) V1 B2 3 -निश्चिना (for निष्ठिना) B4 मन्त्रेषु परिनिश्चिता (for the post half) —V1 om l 8–14 —(l 8) Ñ2 V2 3 B1–3 D7 प्रमाण (for प्रभाव) —D12 om (hapl) from the post half up to the prior half of 618(B)* D3 मन्त्र (for मन्त्रे) Ñ2 V2 3 B1–3 D7 मन्त्रिणामर्थ(Ñ2 °नु)-निश्चये, B4 मन्त्रश्चैनार्थसिद्धये, D11 मन्त्राणा मन्त्रनिर्णय (for the post half) —After l 8, Ś1 B4 D3 12 ins

618(B)* प्रक्षेप च प्रचार च मन्त्रिणो मन्त्रसिद्धये ।

1 34
1 45
4. 48 सत्यसंधौ महाभागौ भ्रातरौ रामलक्ष्मणौ ।
वयस्यभावं संप्राप्तौ राज्यार्हौ राज्यदायिनौ ॥ ४०
तयोरेको धनुष्पाणिर्द्वारि तिष्ठति लक्ष्मणः ।
यस्य भीताः प्रवेपन्तो नादान्मुञ्चन्ति वानराः ॥ ४१
स एष राघवभ्राता लक्ष्मणो वाक्यसारथिः ।
व्यवसायरथः प्राप्तस्तस्य रामस्य शासनात् ॥ ४२
तस्य मूर्ध्ना प्रणम्य त्वं सपुत्रः सह बन्धुभिः ।
राजंस्तिष्ठ स्वसमये भव सत्यप्रतिश्रवः ॥ ४३

इति श्रीरामायणे किष्किन्धाकाण्डे त्रिंशः सर्गः ॥ ३० ॥

[D12 om the prior half B4 दक्षिणा मन्त्रनिश्चये, D3 मनिणामर्थसिद्धये (for the post half)]
—Ñ2 V2 3 B D7 11 om l 9 and 10 —(l 9) Ñ1 illeg for सचिवे D1 2 13 न (for तु) D12 .मान् (for मतिमान्) —(l 10) Ñ1 प्रतिचोदित (for स प्रचो°) D1–4 13 वानरैः प्रतिवेदित (D1 °वेदित, D4 °दर्शित [meta]) (for the post half) —(l 11) Ś1 Ñ1 उवाच ते (for उवाच च) Ñ2 V2 3 B प्राप्त, D7 प्रोक्त (for तेषां) D11 वाक्यमुवाच त तत्र, D12 उवाच वाक्यं च तेषां (for the prior half) Ñ1 B1 D1 लक्ष्मण Ñ2 V2 3 B D7 शुश्रुवान, D11 तेभ्रुवन् (for शुश्रुवे). —Ñ2 V2 3 B D7 11 om l. 12 and 13 —(l 12) D2 13 अथ (for अर्थ-) D3 धर्मार्थमहित तेषा (for the prior half) D2 13 मन्त्रिणस्त (D13 °ण स), D4 मन्त्रीश म (for मन्त्रिणा म). —Ñ1 D2–4 13 om l 13 —(l 13) L(ed) चायतिक्षम —(l 14) Ñ2 V2 3 B1–3 D7 अथ प्रणाम्य (for प्रसादयित्वा) Ñ2 V2 3 B D7 वचन (for बुद्धिमान्) Ñ1 D1 3 पवनात्मज D11 उवाच हनुमांस्तत (for the post half) —(l 15) Ñ1 D1–4 13 पर्युपासीनो Ñ2 V B D7 उवाच मन्त्रिप्रवरो, D11 श्लक्ष्ण मधुरया वाचा (for the prior half)]

40 ^{a}) Ś1 Ñ1 V B1 3 D1–4 11–13 महात्मानौ, Ñ2 B2 4 D7 महोत्साहौ (B4 °...) (for महाभागौ) —After 40^{ab}, B4 ins

619* बलविक्रमसम्पन्नौ दुर्जयावमरैरपि ।

—^{c}) D8–10 Ct मनुष्यभाव —For 40^{cd}, Ś1 Ñ V B D1–4 7 11–13 subst

620* उपकारप्रवृत्तौ च राजन्राज्यस्य दायकौ ।

[Ñ2 V B1–3 D7 उपकारे च वर्तेते, B4 D11 वयस्यत्व तव गतौ (for the prior half) Ñ1 B1 3 D3 11 राजन्राज्यप्र (B2 °श्च)-दायकौ, B4 राजन्या राज्यदायकौ (for the post half)]

41 ^{a}) B2 4 G3 एक, D12 एव (for एको) —^{b}) Ś1 Ñ1 D1 2 4 11–13 भूमिप, V3 marg, D3 चारित (for लक्ष्मण) —^{c}) D2 13 तस्माद्, D3 11 G2 यस्माद् (for यस्य) ※Cr t यस्य भीता यस्माद्भीता ※ Ñ1 पलायतो, B4 D5 9 11 T3 G3 M1 प्रवेपते (T3 °ति) (for °पन्तो) Ś1 D4 12 G1 तस्य भीता प्रवेपते (G1 प्रवर्तते), Ñ2 V B1–3 D7 तस्य भीता वेपमाना —^{d}) Ñ V B D1–4.7.11–13 G1 2 M1 2 नाद Ñ2 D7 कुर्वंति (for मुञ्चन्ति).

42 ^{a}) D3 4 11 M2 एव (for एष) —^{b}) Ś1 D2 4.12 13 गुणसागर, V1 वाक्यमब्रवीत, B1 नाम सारथि, B3 4 रामसारथि (for वाक्यसारथि) —^{c}) Ś1 Ñ1 B1–3 D1 2 4.12 13 -रथ, V1 T2 G1 -रत, Cg t as in text (for रथ). V2 व्यवसाय पुर प्राप्तस् —After 42, Ś1 Ñ1 D1–4 12 13 ins., while Ñ2 V B cont after 622*, D7 cont after l 2 of 622*

621* स दह्यता वा प्रतिपिध्यता वा
यद्वा क्षम ते कुरु मन्यसे तत् ।
क्रुद्ध किलागच्छति लक्ष्मणोऽद्य
रोषस्य हेतु न हि विद्म सर्वे ।

[(l 1) V1 संदृश्यता, V3 समप्यतां (sic) —Ñ1 mostly illeg for l 2 —(l 2) B2–4 वाक्यतो, G(ed) अत्र क्षेम (for वा क्षम ते) Ñ2 V1 B4 D7 यत् (for तत्) Ś1 L(ed) यच्च क्षेम तदृश्यता (L[ed] भवता नद् [by transp]) विधेय, D1–4 13 यद्वा (D. °च) क्षम पार्थिव मन्यता च (D1.3 वा), D12 क्षेम च यत्तदृश्यता विधेय. —(l 3) Ś1 V2 3 B4 D1–4 12 13 [s]मी, Ñ1 illeg (for ऽद्य) —(l 4) V1 रामस्य (for रोष°) V3 B4 D3 च (for हि) D3 विद्म (for विद्म) Ś1 Ñ1 D1 2 4 12 13 रामस्य हेतोरिह न न विद्म (D1 °द्म)]
—After 42, Ñ2 V B ins , D7 ins l 1 after 42 and l 2 after 35^{ab}

622* हनूमतो वच श्रुत्वा शोकाविष्टोऽङ्गदोऽब्रवीत् ।
तथेति कृत्वा स पितुरेतदर्थं न्यवेदयत् ।

[(l 1) Ñ2 V हनुमतो —(l 2) Ñ2 om (subm), V B2 4 D7 च (for स)],

whereas D6 6 8–10 S ins

623* अयं च तनयो राजंस्ताराया दयितोऽङ्गद ।
लक्ष्मणेन सकाशं ते प्रेषितस्त्वरयानघ ।
सोऽयं रोषपरीताक्षो द्वारि तिष्ठति वीर्यवान् ।
वानरान्वानरपते चक्षुषा निर्दहन्निव ।

[(l 1) D6 G1 ते (for च) D6 दयिताङ्गद, M3 तनयोऽङ्गद (for दयितोऽङ्गद) K(ed) transp तनयो and दयितो —(l 2) D6 [s]नघ (for ऽनघ) —(l 3) G1 रोषपरीताङ्गो —(l 4) D6 G3 प्रदहन् (for निर्द°)]

43 V G(ed) om 43 D7 reads 43^{ab} after 621* (cf v. l 35). —^{a}) Ś1 D12 प्रणतस्, D6 6 8–10 T1 G1 2

३१

अङ्गदस्य वचः श्रुत्वा सुग्रीवः सचिवैः सह ।
लक्ष्मणं कुपितं श्रुत्वा मुमोचासनमात्मवान् ॥ १
सचिवानब्रवीद्वाक्यं निश्चित्य गुरुलाघवम् ।
मन्त्रज्ञान्मन्त्रकुशलो मन्त्रेषु परिनिष्ठितः ॥ २
न मे दुर्व्याहृतं किंचिन्नापि मे दुरनुष्ठितम् ।
लक्ष्मणो राघवभ्राता क्रुद्धः किमिति चिन्तये ॥ ३
असुहृद्भिर्ममामित्रैर्नित्यमन्तरदर्शिभिः ।
मम दोषानसंभूताञ्श्रावितो राघवानुजः ॥ ४

G 4 32 4
B 4 32 4
L 4 25 4

M2 प्रणाम (for प्रणम्य) —b) D11 सतार (for °पुत्र) D12 तव (for सह) D1 3 11 मन्त्रिभि, D8–10 T1 -बाधव (for बन्धुभि) D5 सबाधव (subm) (for सह बन्धुभि) —After 43ab, D5 6 8–10 S ins

624* गच्छ शीघ्र महाराज रोषो ह्यद्योपशाम्यताम्।
यदाह रामो धर्मात्मा तत्कुरुष्व समाहित ।

[T1 damaged for l 1 —(l 1) G2 कुरु (for गच्छ) D6 T2 3 G2 3 M3 Crp रोषो ह्यस्य निवर्त्य(G2 °र्ते)ता, G1 M2 रोषश्चाप्युपशाम्यता, M1 रोषोस्य ह्युपयाम्यता (for the post half) ❀Cr रोषो ह्यस्य निवर्त्यतामिति पाठ ❀—(l 2) D5 8–10 यथा हि, M3 यथाह (for यदाह)]

—c) D1 2 13 राज्ये, D3 राजन्कि (hypm) (for राजस्) Ś1 Ñ2 B D1–4 7 12 13 [अ]द्य (for स्त्र) D11 राजभिश्चैव समये —d) D2 13 तव, Cg as in text (for भव) D7 सत्त्व- (for सत्य-) Ś1 -प्रतिश्रवा D1 3 पत्युर्भा(D3 सती ना)र्येव तद्वश —After 43, Ś1 D1–4 12 13 ins

625* उपकारेण सयुक्त प्रतिकार स्मरस्व च ।
कर्तुमर्हसि सीतार्थे प्रीतिमानीय तद्वशे ।
स हि शूरो महेष्वास सर्वास्त्रविधिपारग ।
क्षमर्षी दु खसतप्त तस्य प्रतिकृत क्षमम् ।

[(l 1) D2 3 प्रतीकार, D4 उपकार (for प्रति°) —(l 2) Ś1 D12 सीतार्थे D1 3 भव सत्यप्रतिश्रव, D2 13 पत्यौ भार्येव तद्वशे, D4 प्रीतिभार्य च तद्वशे (sic) (for the post half) —(l 3) D3 स चास्त्र- (for सर्वास्त्र-) —(l 4) D3 अमर्ष- (for °र्षी)]

15 Ñ1 illeg for 15[ab] —[a]) Ś1 Ñ2 V B1–3 D1–4 7 12 13 तदिद (D1.2 13 °दम्) (for इद च) Ś1 बलिना (for ब्रह्मणा) D1 2 दत्तो (for दत्त) B4 D11 हेमायास्त (D11 °यै त)दिदं दत्त —[b]) Ñ2 V B1–3 हेमाया (B1 °या [sic]), D6 हेमाख्ये (for °यै) B2 3 बिलम् (for वनम्).

दुहिता मेरुसावर्णेरहं तस्याः स्वयंप्रभा ।
इदं रक्षामि भवनं हेमाया वानरोत्तम ॥ १६

मम प्रियसखी हेमा नृत्तगीतविशारदा ।
तया दत्तवरा चास्मि रक्षामि भवनोत्तमम् ॥ १७

G 4 51 18
B 4 51 18
L 4 42 18

Ś1 D12 विल तुष्टेन भो मयि, B4 हृष्टेन ब्रह्मणा वन, D1 2 13 वरो हृष्टेन हे(D13 चे[sic])मया, D3 4 विल तु(D4 रु)ष्टेन हेमया, D7 मायावनमनुत्तम, D11 तुष्टेन ब्रह्मणा वर —ᶜ) Ś1 Ñ1 D2 12 13 एवमेतच्च(D2 13 °त्तु) भ(D13 भु)वन, V1 2 B D6 7 11 शाश्वता कामभोगा(V2 °ग्या)श्च , D1 3 4 एवमेतत्तरुवन D5 G2 शाश्वत कामभोग(G2 °गाश्) च —ᵈ) D7 न (for च)

16 ᵃ) D4 मेरुसा· (illeg), G(ed) हेमसावर्णेर् (for मेरु°) —ᵇ) Ś1 Ñ1 V B D1–3 7 11–13 नाम्ना, D4 illeg , T2 G2 M1 तस्य (for तस्याः) D4 illeg for स्वयप्रभा —Ñ1 om 16ᶜᵈ —ᶜ) Ñ2 V B D7 सदा (for इद) V3 illeg from व up to मि in 17ᵈ D6 भुवन (for भ°) —ᵈ) Ś1 Ñ2 V1 2 B D1–4 7 11–13 वानरर्षभा (D12 °भ), T2 वानरोत्तमा (for °म)

17 V3 illeg up to रक्षामि in ᵈ (cf v.l 16) Ñ1 illeg for 17 —ᵃ) Ś1 D3 4 12 सा मे (for मम) B4 प्रिया (for प्रिय-) G1 कस्य वा मे प्रियसखी —ᵇ) Ñ2 B D1–4 7 11–13 नृत्य , G1 हेमा (for नृत्त-) D6 गीतनृत्य , T1 3 G2 3 M1 2 गीतनृत्त- (by transp) (for नृत्तगीत-) —ᶜ) Ś1 D12 गृह, B2 3 त्वया, D1–4 13 अह, D6 तदा (for तया) Ś1 D1–4 12 13 [इ]द, D11 [अ]ह (for [अ]स्मि) Ñ2 D7 सखित्वादुक्ताह, V1 B सखित्वाद्धाह, V2 सखीत्वाद्धाह (for दत्तवरा चास्मि) ❀ Cv दत्तवरा चास्मीति पाठ ❀ —ᵈ) D5 8–10 भवन महत् (for °नोत्तमम्) —After 17, Ñ2 V B D7 ins , while Ś1 Ñ1 D1–4 11–13 M2 ins after 19

1086* एवमुक्ते शुभे वाक्ये तापस्या धर्मसहिते ।
हनूमान्कपिशार्दूल प्रत्युवाच स्वयप्रभाम् ।
अर्थिन स प्रयच्छार्ये जल जलजलोचने ।
म्रियमाणान्निराहारान्सजीवयितुमर्हसि ।
सा तु तेषा वच श्रुत्वा तापसी धर्मचारिणी । [5]
आदाय फलमूलानि विधिनोपजहार ह ।
प्रतिगृह्य तु ते तस्यास्तदातिथ्य वनेचरा ।
विधिवद्भक्षयामासुस्ता चैव समपूजयन् ।
ते भक्षयित्वा तत्सर्वं पीत्वा च विमलं जलम् ।
सर्वे ददृशुरालोक सर्वतो हरियूथपा । [10]
प्रसन्नमनस सर्वे सर्वे च विगतज्वरा ।
सजातबलरूपाश्च तत्रासन्हरियूथपा ।
तर्पिता विविधैर्मूलै· फलै शीतेन वारिणा ।

[(l 1) Ś1 Ñ1 D1–4 12 13 एतच्छ्रुत्वा शुभ वाक्य (for the prior half) V1 तारस्य (sic) (for तापस्या). Ś1 Ñ1 D1–4 12 13 -सहित, B3 -सम्मिते (for सहिते) —V3 om. l 2–3 —(l 2) Ś1 Ñ1 D1–4 11–13 M2 हरि- (for कपि-) —(l 3) Ñ1 illeg from म up to ध (see Ś1 var) Ñ1 M2 अर्थिना (for न °) D3 सप्रयच्छाम, D4 मप्रयच्छार्थे, D11 स प्रयच्छार्थे, M2 न प्रय° (for स्म प्रयच्छार्ये) Ś1 D12 अर्थिना सप्रपन्नाना (for the prior half) D1 चर (for जल) Ś1 Ñ1 D1(om after धर्म up to तापसी in l 5) 2–4 11–13 M2 चर(Ś1 D12 कुरु) धर्ममनुत्तम (for the post half) —(l 4) M2 म्रियमाणो (for °णान्) Ś1 Ñ1 D2–4 11–13 M2 सजीवय तपोधने (for the post half) —(l 5) Ś1 Ñ1 D3 4 12 तस्य(Ñ1 · [illeg])सा तु, D2 13 सा तु तस्य, D11 साधु तस्य (for सा तु तेषा) M2 तच्छ्रुत्वा वचन तस्य (for the prior half) Ñ1 तापस (for °सी) V2 D13 ब्रह्म (for धर्म-) —(l 6) V3 illeg from the post half up to l 7 B2 4 च, D11 M2 सा (for ह) Ś1 D12 [उ]पानयत्तदा, Ñ1 D1 2 13 [उ]पाहरत्तदा, D3 4 [ए]वाहरत्तदा (for [उ]पजहार ह) —(l 7) D1 च (for तु) D13 सव (for तस्यास्) Ś1 D12 तस्यास्ते (by transp), D1 तस्यास्तु (for ते तस्यास्) D1 [आ]मित्य (sic) (for [आ]तिथ्य) —(l 8) D11 क्षुधिता, M2 क्षुधार्ता (for विधिवद्) Ś1 Ñ1 D1–4 12 13 भक्षयति स (for °यामासुस्) V3 त (for ता) V1 प्रत्यपृजयन् (for सम°) Ś1 Ñ1 D2–4 12 13 पूजयत स्वय(D12 °·)प्रभा, D1 पूजयन्तस्य तापमी (sic), D11 M2 शशसुश्च त(M2 प्रशसतस्त)-पोधनाम् (for the post half) —(l 9) Ś1 Ñ1 D1–4 12 13 भक्षयित्वा च(D1 3 4 तु) ते सव (for the prior half) D1 तु (for च) V1 3 विपुल (for विमल) D11 M2 पीत्वा सुरभि वारि च (for the post half) —(l 10) D11 सर्वं (for सर्वे) V3 illeg from ले up to l 11 M2 आलोकेस्, K(ed) आलोकान् (for °क) Ś1 Ñ1 D1–4 12 13 अपश्यन्सर्वे (Ñ1 अभन्सर्वत्र [sic]) एवेते(D1 3 4 °न्सर्वतो लोके) (for the prior half) V2 कामतो (for सर्व°) M2 वानरा गुहा (for हरियूथपा) Ś1 Ñ1 D1–4 12 13 दिशो(Ñ1 दश [sic], D1 दिश) वानरपुगवा —D12 om (hapl) l 11–12 —(l 11) D7 प्रमत्त- (for प्रसन्न-) Ś1 Ñ1 D1–4 11 13 M2 -वदना (for -मनस) M2 चामन् (for first सर्वे) Ñ2 V1 B2 D7 ते (for च) Ś1 Ñ1 D1–4 11 13 M2 सर्व सह(Ś1 D2 13 °तु)ष्टमानसा , B4 सर्वेद हृष्टमानसा (for the post half) —(l 12) Ñ2 -वन- (for -बल-) Ś1 Ñ1 D1–4 13 मजा(D1 °ज्ञा)तबलवीर्याश्च(D1 3 4 °स्ते), D11 M2 सजात बलवीर्य च (for the prior half) Ś1 Ñ1 D1 2 13 -पुगवा (for -यूथपा) D11 M2 तत्र तेषा वनौकसा (for the post half) —After l 12, V1 B4 read a colophon. [*Sarga name* V1 स्वयप्रभातिथ्य, B4 स्वयप्रभादर्शन —*Sarga no* (figures, words or both) V1 om , B4 55] —Ñ1 V B4 D1 M2 om l 13 —(l 13) Ś1 D12 स्वच्छेन

51 26 किं कार्यं कस्य वा हेतोः कान्ताराणि प्रपद्यथ ।
51 18 कथं चेदं वनं दुर्गं युष्माभिरुपलक्षितम् ॥ १८
52 19

इमान्यभ्यवहार्याणि मूलानि च फलानि च ।
भुक्त्वा पीत्वा च पानीयं सर्वं मे वक्तुमर्हथ ॥ १९

इति श्रीरामायणे किष्किन्धाकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

५१

अथ तानब्रवीत्सर्वान्विश्रान्तान्हरियूथपान् ।
इदं वचनमेकाग्रा तापसी धर्मचारिणी ॥ १
वानरा यदि वः खेदः प्रनष्टः फलभक्षणात् ।
यदि चैतन्मया श्राव्यं श्रोतुमिच्छामि कथ्यताम् ॥ २
तस्यास्तद्वचनं श्रुत्वा हनुमान्मारुतात्मजः ।
आर्जवेन यथातत्त्वमाख्यातुमुपचक्रमे ॥ ३
राजा सर्वस्य लोकस्य महेन्द्रवरुणोपमः ।
रामो दाशरथिः श्रीमान्प्रविष्टो दण्डकावनम् ॥ ४
लक्ष्मणेन सह भ्रात्रा वैदेह्या चापि भार्यया ।
तस्य भार्या जनस्थानाद्रावणेन हृता बलात् ॥ ५

(for शीतेन) D3 4 चाभसा (for वारिणा) D11 शीतेन शुभवारिणा (for the post half)]

—Thereafter Ñ2 V B D7 read 4 51 1

18 V3 illeg for 18^{ab} —^{a}) Ñ1 illeg for किं कार्यं —^{b}) Ś1 D2 12 13 च गच्छथ, Ñ1 D1 3 4 प्र(D4 ? [illeg])-गच्छथ, Ñ2 V1 2 B1–3 D7 समाश्रिता, M3 प्रविश्यथ (for प्रपद्यथ) D11 यूयं कातारमागता —^{c}) V2 [अ]पि, V3 [तु]व (for [इ]दं) Ś1 Ñ1 V B D1–4 7 11 13 बिलं, D12 बिले (for वनं)

19 Ñ2 V B D7 om 19 —^{a}) D6 8–10 T2 शुचीनि (for इमानि) Ñ1 illeg from णि up to ^{b} D8–10 11 G1 2 M1 Ct [अ]भ्यवहाराणि, Ck °हार्याणि (as in text) —^{d}) D6 11 G1 2 M1 2 सत्यं (for सर्वं) D8 9 अर्हसि (for °थ) ❀ Cg अस्मिन्सर्गे सार्धैकोनविंशतिश्लोकाः ❀ —After 19, Ś1 Ñ1 D1–4 11–13 M2 ins 1086*

Colophon Ñ2 V B D1 7 om —*Kānda name* D4 उद्योगकाडे —*Sarga name* Ś1 Ñ1 D2 12 13 स्वयंप्रभादर्शन(D2 13 °न), D3 4 बिलप्रवेश, D11 स्वयंप्रभावाक्य —*Sarga no* (figures, words or both) Ś1 Ñ1 D2 4 12 13 om, D3 5 6 8–10 T G1 2 M 51, D11 49 —After colophon, G concludes with श्रीरामाय नमः

51

D1 continues the previous Sarga M1 begins with श्रीरामाय नमः

1 Ñ2 V B D7 read 1 after 1086* —^{b}) Ś1 Ñ1 D2 12 13 T1 2 M3 -पुंगवान् (for -यूथपान्) Ñ2 V1 2 B1–3 D7 स(D7 प्र)हृष्टान्वनगोचरान्, V3 सहृष्टा[illeg] (illeg), B4 हृष्टाश्च वनगोचरान् —V3 illeg for 1^{cd} (except इदं वचनम्) —^{c}) Ś1 D2 12 13 एकैव, Ñ2 V3 B D7 अव्यग्रा, V1 अव्यग्र (for एकाग्रा) —^{d}) Ś1 ब्रह्मचारिणी —After 1, D11 wrongly repeats 4 50 18

2 ^{a}) V2 M1 खेद D11 वा खेदः (for वः खेदः) —^{b}) V2 D11 M1 प्रनष्ट Ś1 Ñ V2 3 B1–3 D1–4 7 12 13 मूल- (for फल-) —^{c}) Ś1 Ñ1 चेद, B1 चेतत्, B4 D1–4 12 13 G1 चेद, G2 M2 चैव, G3 वा तत्, Ck t as in text (for चैतत्) B4 D1 4 9 श्रव्यं, D2 13 शक्यं (for श्राव्यं) —^{d}) V3 illeg from इच्छामि up to 3^{b} Ñ2 V1 2 B1–3 D7 11 तत्त्वतः, D6 8–10 T2 तां कथां (for कथ्यताम्) Ś1 Ñ1 D1–4 12 13 श्रोतव्यं साधु कथ्यतां

3 V3 illeg for 3^{ab} (cf v l 2) —^{a}) B1 तु (for तद्) D11 तत्तस्या (by transp) (for तस्यास्तद्) —^{c}) Ś1 D12 आर्यवृत्त (for आर्जवेन) Ñ1 तथा (for यथा-) D9 -त्त्वधम्, D11 G3 -तथ्यम् (for -तत्त्वम्)

4 ^{a}) T2 जगतो (for लोकस्य) G2 राजा तु सर्वलोकानां

☞ Ñ1 missing from 4^{c} up to 4 52 7^{a}

V3 illeg from 4^{c} up to चा (see var) in 5^{b} —^{d}) Ś1 Ñ2 V1,2 B D1–3 11–13 M3 दंडकं(M3 °कान्) (for दण्डका-)

5 ^{b}) D6 8–10 T2 सह, D6 T1 3 G1 2 M2 चैव (for चापि) Ś1 D1–4 11–13 सीतया (for भार्यया) Ñ2 V1,3 B1–3 D7 भार्यया चा(V3 illeg up to चा)पि सीतया, V2 भार्ययापि च सीतया —^{c}) D3 4 सीता (for भार्या) G(ed) जनस्थाने (for °नाद्) —^{d}) V1 बलाद्धृता (for हृता बलात्)

वीरस्तस्य सखा राज्ञः सुग्रीवो नाम वानरः ।
राजा वानरमुख्यानां येन प्रस्थापिता वयम् ॥ ६
अगस्त्यचरितामाशां दक्षिणां यमरक्षिताम् ।
सहैभिर्वानरैर्मुख्यैरङ्गदप्रमुखैर्वयम् ॥ ७
रावणं सहिताः सर्वे राक्षसं कामरूपिणम् ।
सीतया सह वैदेह्या मार्गध्वमिति चोदिताः ॥ ८
विचित्य तु वयं सर्वे समग्रां दक्षिणां दिशम् ।
बुभुक्षिताः परिश्रान्ता वृक्षमूलमुपाश्रिताः ॥ ९

विवर्णवदनाः सर्वे सर्वे ध्यानपरायणाः ।
नाधिगच्छामहे पारं मग्नाश्चिन्तामहार्णवे ॥ १०
चारयन्तस्ततश्चक्षुर्दृष्टवन्तो महद्बिलम् ।
लतापादपसंछन्नं तिमिरेण समावृतम् ॥ ११
अस्माद्धंसा जलक्लिन्नाः पक्षैः सलिलरेणुभिः ।
कुरराः सारसाश्चैव निष्पतन्ति पतत्रिणः ।
साध्वत्र प्रविशामेति मया तूक्ताः प्लवंगमाः ॥ १२

G 4 51 40
B. 4 52 13
L 4 42. 13

6 ^{a}) M1 राजा (for राज्ञः) Ś1 Ñ2 V B D1–4 7 11–13 तस्य वीर सखा प्राज्ञ —^{b}) D3 4 नामत (for वानर) —^{c}) D5 om. (hapl) राजा वानर- Ñ2 V B1–3 D7 -वीराणा (for -मुख्याना) —V3 illeg from 6^d up to अङ्गद- in 7^d —^{d}) B2 D1 तेन (for येन) B1 वनं (for वयम्)

7 V3 illeg up to अङ्गद- in ^{d} (cf v l 6) Ś1 D1–4 12 13 om (hapl) 7 —^{a}) D11 T3 -[आ]चरिताम्, Cr m as in text (for चरिताम्) ❀ Cv अगस्त्यचरिता इत्याद्यर्धं **चिरपूर्वशेष ❀ —^{b}) B4 -पालिता (for -रक्षिताम्) —^{c}) V1 सदेव- (for सहैभिर्) Ñ2 V1 2 B1–3 D7 वीरैर्, D6 भीमैर्, M3 घोरैर् (for मुख्यैर्) —^{d}) M2 -प्रमुखा, Ck t as in text (for °खैर्) Ñ2 V B1–3 D7 वृता (for वयम्)

8 ^{a}) Ś1 राघव (sic), B3 वानर (sic), D11 राक्षस (for रावणं) D1 रावण सहितान्वेष्टु (metri causa) —D7 om (hapl) 8^b–10^a —^{b}) Ś1 D11 रावण (for राक्षस) —B1 om 8^c–9^b —^{c}) Ñ2 V B2 3 सहित वीरा (for सह वैदेह्या) —^{d}) V3 illeg after मार्गध्व up to 9^b. Ś1 D1 2 12 13 चागता, D3 4 चोद्यता॰, D11 नोदिता, G2 (after corr as in text) चेतसा, Ck t as in text (for चोदिता)

9 D7 om 9, B1 om 9^{ab}, V3 illeg for 9^{ab} (for all, cf v l 8) —^{a}) Ś1 विचेयत (sic), Ñ2 V1 2 B2 3 विचिन्वतो, D1 3 विचीयतो, D2 4 11–13 विचीय तु, D5 विचेतु च (sic) (for विचित्य तु) D5 8–10 G वन (for वय) Ñ2 B4 D8 10 सर्वे —^{b}) V1 D5 8–10 Ct समुद्र, D11 समस्ता, G1 सभ्राता (for समग्रा) —After 9^{ab}, Ś1 B4 D1–4 11–13 M2 G(ed) ins

1087* नाधिगच्छाम वैदेही रावण नापि त रिपुम् ।

[D11 M2 transp नाधिगच्छाम and वैदेही G(ed) च (for second न) B4 नैर्ऋत रावण, D1 3 4 M2 नापि त रावण (by transp) (for रावण नापि त) D11 रावण च निशाचर (for the post half)],

while Ñ2 V1 2 B2 3 ins

1088* बहुशो न तु पश्याम सीतया सह रावणम् ।

—^{c}) D11 पिपासार्ता (for परिश्रान्ता) D5 8–10 G2 वय बुभुक्षिता सर्वे —^{d}) V B1–3 D11 -मूलानि (for -मूलम्) B4 परिगम्यागवीन्द्रहून् (sic) ❀ Cv r बुभुक्षिता परिश्रान्ता (Cr °न्ता वृक्षमूलमुपाश्रिता) इति पाठ . ❀

10 D7 om 10^a (cf v l 8) V3 illeg for 10^{ab} (except विवर्णवद्) —After 10^a, Ś1 Ñ2 V1 2 B D1–4 11–13 ins

1089* सुग्रीवभयदर्शिन ।
तृष्णया चार्दिता सर्वे

[(l 1) G(ed) -भयकर्षिता (for °दर्शिन) —(l 2) Ś1 D2 3 12 13 तृषया (for तृष्णया) B4 विषण्णमनस सर्वे, D1 तृष्णाक्षुदर्दिता सर्वे, D4 तृषा खल्वर्दिता सर्वे]

—^{b}) B4 ध्यानशोक-, T1 3 सदा ध्यान- (for सर्वे ध्यान) —^{c}) Ś1 D1–4 12 13 न गच्छामो वय पार, V1 नाध्यगच्छामहे पार ❀ Ck नाधिगच्छामहे पारमिति । चिन्तामहार्णवस्येति शेष ।, Ct नाधिगच्छाम । हे इति स्वयप्रभासबोधनम् । नाध्यगच्छाम पार चिन्तामहार्णवस्येति शेष ❀ —^{d}) Ś1 D2 12 13 G3 M1 शोक-, D1 3 4 दुःख-, D11 दुःखे (for चिन्ता-)

11 ^{a}) Ś1 D12 सर्वे (for चक्षुर्) —^{b}) D5 महा-, D6 T G2 3 M2 3 वय, M1 ततो (for महद्) Ś1 Ñ2 V B D1–4 7 11–13 पश्यामो विवृत विल —^{c}) D3 4 -पल्लव- (for -पादप-) B4 D11 -सरुद्ध, D8–10 -सपन्न (for सछन्न) —^{d}) Ś1 Ñ2 V B D2–4 7 11–13 महदास्यमिव क्षिते, D1 महास्यमिव तत्क्षिते

12 ^{a}) D6 T2 G2 M1.2 तस्माद् (for अस्माद्) Ś1 Ñ2 V B D2 7 11–13 ततो हसा समुत्पे(B4 °मापे)तु, D1 3 4 ततो हसा ह्युत्पतति —^{b}) Ś1 B4 D1–4 12 13 सलिलरोधि (D3 4 °चि)भि, Ñ2 V B1–3 D7 सजलशीकरै, D5 °राविभि, D11 °शीकरै, T1 3 M3 °विस्रवै, Ck t as in text (for सलिलरेणुभि) D6 T2 G M1.2 निर्याता विवृताद्बिलात् —^{c}) T3 कुररा, M2 (after corr *inf lin sec m* as in text) कुमारा (for कुररा) B4 वजुला क्रौंचा (for

40 13 तेषामपि हि सर्वेषामनुमानमुपागतम् ।
14 गच्छामः प्रविशामेति भर्तृकार्यत्वरान्विताः ॥ १३
ततो गाढं निपतिता गृह्य हस्तौ परस्परम् ।
इदं प्रविष्टाः सहसा बिलं तिमिरसंवृतम् ॥ १४
एतन्नः कार्यमेतेन कृत्स्नेन वयमागताः ।
त्वां चैवोपगताः सर्वे परिद्यूना बुभुक्षिताः ॥ १५
आतिथ्यधर्मदत्तानि मूलानि च फलानि च ।
अस्माभिरुपभुक्तानि बुभुक्षापरिपीडितैः ॥ १६
यत्त्वया रक्षिताः सर्वे म्रियमाणा बुभुक्षया ।
ब्रूहि प्रत्युपकारार्थं किं ते कुर्वन्तु वानराः ॥ १७
एवमुक्ता तु सर्वज्ञा वानरैस्तैः स्वयंप्रभा
प्रत्युवाच ततः सर्वानिदं वानरयूथपान् ॥ १८

सारसाश्चैव) —^{d}) Ś1 D1–4 12.13 वञ्जुलाश्चैव पक्षिण॰, Ñ2 V B1–3 D7 G(ed) च(G [ed]म)ञ्जुलाश्चक्रसाह्वया , B4 सारसाश्चापि पक्षिणः, D11 चक्रवाकाश्च पक्षिण —After 12^{cd}, Ñ2 V B D7 11 ins , while Ś1 D1–4 13 ins l 2 after 12^{cd} only

1090* कादम्बा जलपृक्ताश्च तथान्ये च जलेचरा ।
ततो नो मतिरुत्पन्ना दृष्ट्वा तान्जलचारिण ।

[(l 1) Ñ2 V1 3 D7 जल(V3 illeg after जल up to 4 52 2^{ab})युक्ताश् (for °पृक्ताश्) D11 जलपृक्ता कल्बाश्च पृक्ता कमलरेणुभि —(l 2) Ś1 D1–4 11 13 मे(D11 नो) बुद्धिर् (for नो मतिर्) Ś1 B4 D1–4 13 transp दृष्ट्वा and तान्. V1 D1 वनचारिण., D11 °पक्षिण (for जलचारिण)]

—^{c}) V2 B4 सर्वे (for साधु) Ś1 D1–4,12 13 अत्र प्रवेक्ष्याम इति, D11 प्रविशामोत्र सामर्थ्यान् —^{f}) Ś1 D2 12 13 प्रोक्ता., Ñ2 V1 2 B1–3 D7 [उ]क्ता वै, B4 ह्युक्ता , D1 3 4 11 चोक्ताः (for तूक्ता)

13 V3 illeg for 13 (cf v.l 1090*) —^{a}) Ś1 D1–4 12 13 अमीषामपि (D3 4 °मेव), Ñ2 V1 2 B1–3 D7 एषामपि च, B4 D11 एतेषा चैव (for तेषामपि हि) —^{b}) Ñ2 V1 B2–4 D7 ऐकमत्यम् , B1 D11 एकपद्य(D11 °चित्त)म्, T1 3 G3 M1 अनुमानाद् , Cv m g k t as in text (for अनुमानम्) Ś1 D1–4 12 13 एषा(D3 4 °का) मति (L[ed.] बुद्धि)रुपस्थिता, V2 ऐकत्य समुपागत ꣸ Cr तेषामपि हि सर्वेषामनुमानादुपागतमिति पाठ । अनुमान जलक्लिन्नपक्षिनिर्गमनरूपलिङ्गदर्शनम् । तस्माद्बिलप्रवेशनमङ्गीकृतमित्यर्थं ꣸ —^{c}) After गच्छाम , B3 reads erroneously the portion from कार्यमेतेन in 15^{a} up to 16 (omitting 16^{d}), repeating the same in the proper place Ś1 D12 प्रविशामश्च, D1–4 13 प्रविशामोत्र(D1 °मो वा) (for °मेति) D6 8–10 अस्मिन्निपतिता सर्वे, D11 निशामोत्रेति गच्छामो —^{d}) D1 6 भर्तु , D6 8–10 [ऽ]प्यथ (for भर्तृ-) D1 कार्ये (for -कार्य-) Ñ2 V1.2 D7 -त्वरावता(V1 °त॰) (for त्वरान्विता) B भर्तृकार्ये त्वरावता(B2 3 °त), D13 भर्तृकार्यत्वमाश्रिताः

14 V3 illeg for 14 (cf v l 1090*) —^{a}) Ñ2 V1 2 B1–3 D7 परिहि(V1 B1.3 °हृ, V2 °ह)ता, B4 निकर्पंतो (for निपतिता) Ś1 D1–4 11–13 परि(D11 प्रति)गृह्य ततो गाढ. —^{b}) B4 T1 3 G2 M2 हस्ते, D6.8–10 Ct हस्तै॰ (for हस्तौ) Ś1 D1–4 11–13 वयं हस्त (D1 3 4 °स्तान् ; D11 °स्ते) (for गृह्य हस्ता) Ñ2 V1 2 B1–3 D7 हस्ता(V1 2 °स्ते)नादाय ते मिथ ꣸ Ct ‘हस्ते’ इति पाठेऽपि हस्तश्लिष्येवार्थे । परिष्वज्येति पूर्वोक्तस्मरणात्. ꣸ —^{c}) D1 सहिता (for सहसा). —^{d}) Ś1 D2 12 13 विलं सतिमिर महत्; B1 2 विलं त्रितिमिर वृत

15 V3 illeg for 15 (cf v l 1090*) —^{a}) V2 D4 एवं, D7 इद (for एतन्) Ś1 च , D1 च (for न) —^{b}) Ś1 D1–4 12 13 कार्येण (for कृत्स्नेन) G(ed) विलम् (for वयम्) V1 कृत्ये निश्चयमागता , G2 सर्वे वयमिहागता . —D1 om 15^{c}–16 —^{c}) V1 [अ]द्य गता , T1 2 [उ]पागता (for [उ]पगता) —Ś1 om (hapl) 15^{d}–17^{a} —^{d}) Ñ2 D3.4 7 11 म्रियमाणा, D5 वय द्यूना (for परिद्यूना) V1 2 B D2 11.12 म्रियमाणा बुभुक्षया.

16 V3 illeg for 16 (cf. v l 1090*). Ś1 D1 om 16 (cf v l 15) D2–4 12(D2 12 hapl ?) 13 om 16–17^{b} —^{b}) Ñ2 V1 2 B D7 त्वया मूल (for मूलानि च) —^{c}) Ñ2 V2 D6 8–11 T2 उपयुक्तानि (for °भुक्तानि) —^{d}) Ñ2 V1 2 B D7 -श्रमकर्षितैः (for -परिपीडितैः) D11 पुनर्जीवामहे वय

17 V3 illeg for 17 (cf v l 1090*) Ś1 om. 17^{a} (cf. v l 15) D2–4 12 13 om 17^{ab} (cf v.l 16) —^{a}) T ये (for यत्) Ñ2 V1 2 B1 2 4 D7 त्वया चास्मोद्धृता सर्वे, B3 D1 त्वां चैवोप(D1 निरीक्ष्या)गता सर्वे, D11 तत्त्वया स्मोद्धृता सर्वे —^{b}) V1 2 B1 4 D6 7 G2 बुभुक्षिता (for °क्षया) —^{c}) Ñ2 V1 2 B1–3 D7 वद (for ब्रूहि). B4 D13 प्रत्युपकार ते(D13 °रार्थे), G3 प्रत्युपहारार्थं —^{d}) T2 वा, G1 नु, Ck as in text (for ते) D6 कुर्वंति (for कुर्वन्तु) B4 किं कुर्वंतु वनौकस.

18 V3 illeg for 18 (cf v l 1090*) —^{a}) D11 च, G3 M1 [अ]थ (for तु) Ś1 B4 D1–4 11–13 धर्मज्ञा, Ñ2 V1 2 B1–3 D7 सा तत्र, D6 T1 3 G M1 2 धर्मज्ञैर् (for सर्वज्ञा) —^{b}) M1 तु (for तै) Ñ2 V1 2 B1–3 D7 तापसी वायुसूनुना —D11 om. 18^{c} – 19^{b} —^{c}) D7 च तान् (for तत) —^{d}) B4 D3 4 तान्हरि- (for वानर-) T1 3 पुगवान् (for -यूथपान्) Ś1 D2 12 13 इद तान्हरिपुगवान्, Ñ2 V1 2 B1–3 D7 वानरान्संशितव्रतान्, D1 उद्यतान्हरियूथपान्

सर्वेषां परितुष्टास्मि वानराणां तरस्विनाम् । | चरन्त्या मम धर्मेण न कार्यमिह केनचित् ॥ १९

इति श्रीरामायणे किष्किन्धाकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

५२

एवमुक्तः शुभं वाक्यं तापस्या धर्मसंहितम् । | उवाच हनुमान्वाक्यं तामनिन्दितचेष्टिताम् ॥ १

G 4 52 1
B 4 52 21
L 4 44 1

19 V3 illeg for 19 (cf v l 1090*) D11 om 19^{ab} (cf v l 18) V1 mostly damaged for 19^{b} —^{b}) Ś1 Ñ2 V2 B D1–4 7 12 13 महौजसा, D6 G2 तपस्विना, M1 महात्मना (for तरस्विनाम्) —^{c}) Ñ2 V1 2 B D7 धर्मं (B4 °र्मे) हि (for धर्मेण) Ś1 D3 4 12 चरता रामकार्यार्थं, D1 चरत्या इह धर्मं च, D2 13 चरत्या स्म इमं धर्मं (D13 °द धर्म्यं) —^{d}) D13 तत् (for न) Ś1 D1–4 12 13 मम (for इह) ❀ Ct अत्र कतकस्तु द्विपञ्चाशत्सर्गसमाप्तिमाह ❀ —After 19, Ś1 D1 3 4 12 ins

1091* एतदेव कृत मह्य यद्विश्रान्त श्रमातुरै ।

[Ś1 D12 एतेनैव (for एतदेव) D3 4 सर्वं (for मह्य)],

while M2 (*inf lin sec m* which is crossed) ins

1092* इत्युक्त्वा सा वानराणा वचस्त-
च्छ्रुत्वा राम लक्ष्मणेन स्थित तम् ।
नत्वा नत्वा ऋष्यमूक महीध्र
प्राप्यानुज्ञा प्राविशत्सा बिल च ।
द्विपञ्चाश सर्ग
प्रविश्य सा बिल दृष्ट्वा वानराणा स्वयप्रभा । [5]
युष्माक हि मया किंचित्कर्तव्य चैतदुच्यताम् ।

Colophon B4 D1 4 5 9 om —*Sarga name* Ś1 स्वयप्रभानामवाक्य, Ñ2 V1 B1–3 D7 स्वयप्रभासवादे (B1–3 °द), V2 सीतान्वेषणे स्वयप्रभासवाद, D2 12 13 स्वयप्रभावाक्य, D3 11 स्वयप्रभादर्शन (D11 °प्रवेश) —*Sarga no* (figures, words or both) Ś1 V1 B1 3 D2 12 13 om, Ñ2 V2 49, B2 D3 6 8 10 T G1 2 M 52, D7 53, D11 50, G3 51 (as in text), L(ed) 43 —After colophon, V2 concludes with

य सुरासुरयक्षरक्षसा
कारणस्य जनक सनातन ।
जानकीकुमुदिनीसुधाकरो
लेखकस्य दिशतु मङ्गल हरि ।,

D2 with श्रीराम, G with श्रीरामाय नम

52

1 Ñ1 missing up to 7^{a} (cf v l 4 51 4) V3 illeg up to 2^{b} (cf v l 1090*) —^{a}) D4 एतद् (for एवम्) Ś1 D11 T2 उक्त्वा, D1–4 12 13 श्रुत्वा, Cg k t as in text (for उक्त) Ñ2 V1 2 B1–3 D7 एवमुक्ते शुभे वाक्ये, B4 एवमुक्ते तु वचने —^{b}) D11 ते तस्या (for तापस्या) Ñ2 V1 2 B3 4 D7 -सहिते, B1 M2 -सस्थिते (M2 °त) (for -संहितम्) —^{d}) D5 8–10 -लोचना (for -चेष्टिताम्) —For 1^{cd}, Ś1 D1–4 11–13 subst.

1093* ऊचु प्राञ्जलय सर्वे परितुष्टा स्वयप्रभाम् ।
[D1 2 परितुष्टा (for °तुष्टा).]

—Thereafter they cont

1094* लोलस्वभावैरस्माभिर्यदिद व्याहृत वच ।
तत्सर्व मर्षणीय ते सर्वैरेव कृतोऽञ्जलि ।
एक तु वयमिच्छामस्त्वत्प्रसाद तपोधने ।
श्रूयतामभिधास्यामस्तच्छ्रुत्वा कर्तुमर्हसि ।
कृत्स्नो मास परिगतो वनेऽस्मिंस्तु तपोधने । [5]
न च जानीम त देश प्रविष्टा येन वानरा ।

[(1 1) D2 11 लोभ (for लोल-) —(1 2) Ś1 D2 एव (for एव) —(1 3) D2 3 13 एव (for एक) D2 नु (for तु) D1–3 11 13 त्वत्प्रमादात्, D4 त्वत्प्रभावात् D13 तपोनिधे

13 21 5 शरणं त्वां प्रपन्नाः स्मः सर्वे वै धर्मचारिणि । स तु कालो व्यतिक्रान्तो बिले च परिवर्तताम् ॥ २
यः कृतः समयोऽस्माकं सुग्रीवेण महात्मना । सा त्वमस्माद्बिलाद्घोरादुत्तारयितुमर्हसि ॥ ३

(for तपोधने) —D3 4 om (hapl) l 4–5 —(l 4) D11 अभिधास्यामि D1 कुरु तथ्य च तच्छुभे, D11 कुरु तथ्य वचश्च तत् (for the post half) —D11 transp l 5 and 6 —(l 5) D11 एष (for कृतो) D2 13 बिलेऽस्मिंस्तु, D11 बिले चास्मिन् (for वनेऽस्मिंस्तु) D13 तपोनिधे (for °धने) D1 कृतस्य मास परिज्ञाता बिले एस्मिंस्तपोधने —(l 6) D1 जानीम च (by transp) D11 कथयस्व बिलद्वार (for the prior half).], while Ñ2 V1.2 B D7 subst for 1^{cd}

1095* हनुमान्कपिशार्दूल प्रत्युवाच पुनर्वच ।

—Thereafter they cont

1096* भवत्यानुगृहीता स्म सर्वे एव वनौकसः ।
कृतमातिथ्यमस्माकं श्रमश्चापगतो महान् ।
कथितं चापि ते तत्त्वमस्माभिर्धर्मचारिणि ।
कारणं चापि वैदेह्या मार्गणे ते निवेदितम् ।
विचितः शतशश्चाथ देशो दक्षिणसज्ञितः ।
प्रेषितैर्वानरेन्द्रेण सीतार्थेऽस्माभिरागतैः ।
समयश्च कृतस्तेन कपीना संनिधौ तदा ।
पूर्णे मासि निवर्तध्वं वसन्वध्यो भवेन्मम ।
इति प्रतिसमादिष्टा भर्त्रा वयमनिन्दिते ।
विचिन्वन्तो दिशं सर्वा वानरा शीघ्रगामिनः ।
वयं तु दक्षिणामाशां सुग्रीवेण प्रचोदिता ।
समन्तात्परिधावन्तः पश्याम विवृतं बिलम् ।
प्रविश्य चैव सहसा सीताविचयकारणात् ।
न च पश्यामि निष्कामं बिलादस्मात्सुमध्यमे ।
एवमुक्ते हनुमता ते सर्वे वानरास्तदा ।
ऊचु प्राञ्जलयो भूत्वा तापसीं धर्मचारिणीम् ।
लोलस्वभावैरस्माभि किंचित्तेऽपकृतं यदि ।
सर्वं मर्षयितव्यं तत्सर्वैरेव कृतोऽञ्जलि ।
एकं तु वयमिच्छामस्त्वा वक्तुं धर्मचारिणि ।
श्रूयतां चाभिधास्याम सर्वं एव तवाग्रत ।
सर्वे परिगता देशा बिलेऽस्मिन्सर्ववानरैः ।
न च पश्याम तं देशं प्रविष्टा येन वानरा ।

[(l 1) V1 moth-eaten, B4 सर्वे ह्येव परिग्रहात् (for the post half) —(l 2) Ñ2 D7 [अ]य गतो (for [अ]पगतो) B4 मोहोपहतचेतसां (for the post half) —(l 4) B4 यथावत्परिमार्गणे (for the post half) —(l 5) V1 विदित (for विचित) V2 स ततश् (for शतशश्) B4 [अ]पि (for [अ]थ) B2 3 -संश्रित (for -सज्ञित) —After l 5, B4 ins

1096 (A)* शतशो हि दिशो वीरा वानरा भीमविक्रमा ।

—(l 6) B4 प्रेषिता (for °तैर्) B4 सुग्रीवेण महात्मना (for the post half) —(l 7) B4 तेषा (for तेन) B4 सर्वेषामुपवर्तते (for the post half) —(l 8) Ñ2 पूर्ण-, B2 मासे (for मासि) B4 सर्वं एव प्लवंगमा (for the post half) —(l 9) D7 एव (for इति) V1 तेन (for प्रति-) B4 भर्तुर्वचनचोदिता (for the post half) —(l 10) B4 विचिन्वति B3 दिश सर्वं (for दिश सर्वा) B4 वानराश्चण्डविक्रमा (for the post half) —(l 11) B4 हि (for तु) V1 प्रदर्शिता (for प्रचोदिता) B4 सुग्रीवमप्रचोदिता (for the post half) —(l 12) V2 न पश्यामि वृत बिल (for the post half) —(l 13) B4 बिल प्रविष्टाश्च सुमहत्सीताविचयकारिण (hypm) —(l 14) V1 2 B1–3 निष्कामं, B4 निर्याणं, D7 निष्क्रमं (for निष्कामं) B4 तपोधने (for सुमध्यमे) —(l 15) V1 एवमुक्ता B1 3 सर्वे ते (by transp) —For l 17–22, cf 1094* —(l 17) V1 B1–3 [ऽ]प्रकृत (for ऽप°) —(l 18) B2 सर्वे (for सर्वं) B1 3 ते (for तत्) B1 3 एव (for एष) —(l 19) V2 B1–3 एव (for एकं). B1 धर्मचारिणी —(l 20) V1 तवा* * (moth-eaten) (for तवाग्रत) —(l 21) B1 परिगतो देशो]

2 Ñ1 missing, V3 illeg. for 2^{ab} (cf v l 1) D6 reads 2^{ab} in marg —^{b}) D5 6 8 10 T2 G2 M2 धर्मचारिणि (T2 °णं). —For 2^{ab}, Ś1 Ñ2 V1 2 B D1–4 7 11–13 subst

1097* तदिच्छामो वयं भद्रे बिलादस्मात्तपोधने ।
त्वत्तेजसा विनिर्गन्तु त्वं हि नः परमा गतिः ।

[(l 1) Ñ2 V1 2 B D1 3 4 7 सर्वे (for भद्रे) D11 एवं मां परिगतो (for the prior half) D2 12 तस्माद् (for अस्माद्) D11 बिले चास्मिन् (for बिलादस्मात्) Ñ2 V1 2 B D7 मनोहराद्, D3 4 तु शोभने (for तपोधने) —(l 2) Ñ2 V1 2 B D7 11 -प्रसादाद् (for -तेजसा) D4 न निर्गंतु, D11 भयं हित्वा (for विनिर्गन्तु) D3 त्वत्तेजसा निर्गन्तुं तु (for the post half)]

—D9 om from 2^{c} up to अस्माद्बि in 3^{a}. —^{c}) Ś1 D1–4 12 13 कृतश्च, G1 यत्कृत (for यः कृतः) V1 2 D5 8 10 [ऽ]स्मासु (for ऽस्माकं) —^{e}) Ś1 D1–4 11–13 M3 च, B4 हि (for तु) D6 T2 3 M1 ह्यतिक्रान्तो (for व्यतिक्रान्तो) Ñ2 V B1–3 D7 स कालः समतिक्रान्तो —^{f}) G2 3 न (for च) Ś1 Ñ V B D1–4 7 11 12 [ऽ]स्मिन्परिधावतां D13 [ऽ]स्मिन्नपि धावतां, M1 च परिधावतां, M2 च परिवर्तिना (for च परिवर्तताम्) M3 वने महति वर्तता

3 Ñ1 missing (cf v l 1) D9 om up to अस्माद्बि in ^{a} (cf. v l 2) Ś1 om 3 —^{a}) Ñ2 V B1–3 D7 सर्वान्, D1–4 13 दुर्गाद्, D5 दूराद्, D8–10 12 अस्मान् (for घोराद्). —After 3, Ñ2 V B D7 ins

1098* तीक्ष्णो हि राजा सुग्रीवः प्रियार्थी राघवस्य च ।

तस्मात्सुग्रीववचनादतिक्रान्तान्गतायुषः ।
त्रातुमर्हसि नः सर्वान्सुग्रीवभयशङ्कितान् ॥ ४
महच्च कार्यमस्माभिः कर्तव्यं धर्मचारिणि ।
तच्चापि न कृतं कार्यमस्माभिरिह वासिभिः ॥ ५
एवमुक्ता हनुमता तापसी वाक्यमब्रवीत् ।
जीवता दुष्करं मन्ये प्रविष्टेन निवर्तितुम् ॥ ६

तपसस्तु प्रभावेन नियमोपार्जितेन च ।
सर्वानेव बिलादस्मादुद्धरिष्यामि वानरान् ॥ ७
निमीलयत चक्षूंषि सर्वे वानरपुंगवाः ।
न हि निष्क्रमितुं शक्यमनिमीलितलोचनैः ॥ ८
ततः संमीलिताः सर्वे सुकुमाराङ्गुलैः करैः ।
सहसा पिदधुर्दृष्टिं हृष्टा गमनकाङ्क्षिणः ॥ ९ G 4 52. 24 B 4 52 29 L 4 44 14

---

4 Ñ1 missing (cf v l 1) D2 13 om 4-5 —^{a}) D11 -समयाद् (for -वचनाद्) —^{b}) D1 विनिवृत्तान् (for अतिक्रान्तान्) D11 एते वृत्तास्तपोधने —After 4^{ab}, D1 3 4 ins

1099* अस्मिन्दुर्गे बिलेऽगच्छत्कालो न परिधावताम्।
[D1 कालो गतो (for ऽगच्छत्कालो)],

while D11 ins

1100* दिव्यान्यस्माभिरेतानि भुक्तानि हि फलानि च।
अमृतानि च मूलानि सर्वैरेव यशस्विनि।
स च काले बिले दुर्गे गतो न परिधावताम्।

—For 4, Ś1 Ñ2 V B D7 12 subst, D1 3 4 11 subst for 4^{cd} and both the groups read after 5

1101* तद्राजभयभीतान्न प्रीत्या जीवितुमर्हसि।

[Ñ2 V B D1 7 11 -भीताना Ñ2 V B D7 त्राण भवितुम्, D1 प्रत्यवेक्षितुम्, D3 4 प्रीत्यावेक्षितुम्, D11 मार्गमाख्यातुम्, D12 प्रत्याजीवयितुम् (hypm) (for प्रीत्या जीवितुम्)]

—Thereafter Ñ2 V1 B D7 cont

1102* अस्मानस्माद्बिलाद्दुर्गादुत्तारयितुमर्हसि।

—Ñ2 V1 B D7 further cont, Ś1 V2 3 D1 3 4 11 12 cont. after 1101*, D2 13 ins after 3 (due to om)

1103* इति ब्रुवाणास्तान्सर्वान्सर्वभूतहिते रता ।
[Ś1 V2 रतान् (for रता)]

5 Ñ1 missing, D2 13 om 5 (cf v l 1 and 4) —^{a}) Ś1 D1 3 4 11 12 कर्म (D11 कार्यं) कर्तव्यम् (for कार्यमस्माभि) —^{b}) Ś1 D1 3 4 12 अस्माभिर्, D11 अस्माक (for कर्तव्य) —^{c}) D1 11 तथापि (for तच्चापि) —^{d}) T2 युष्माभिर् (sic) (for अस्माभिर्) Ś1 D1 3 4 11 12 इहास्माक (D1 11 °भि) प्रवेशनात्, Ñ2 V2 3 B4 D7 इह न प्रवि (V2 D7 परि) लवनात्, V1 अस्माभि प्रविलवनात्, B1-3 इह न प्रवि (B2 3 °ति) लघनात् —After 5, Ś1 Ñ2 V B D1 3 4 7 11 12 read 1101*.

6 Ñ1 missing (cf v l 1) —^{ab}) Ś1 D1-4 11-13 इद मधुरया वाचा (for ^{a}) Ñ2 V B D7 उवाच परमप्रीता बिलादुत्तारणेच्छया —After 6^{ab}, Ś1 Ñ2 V B D1-4 7 11-13 ins

1104* इद विबुधराजेन बिल शक्रेण सयुगे।
असुरार्थे विमुक्तेन पुरा वज्रेण दारितम्।
दुरासद सुदुर्धर्षं बहुरत्नसमाकुलम्।
महाप्राज्ञेन पुत्रार्थे निर्मित विश्वकर्मणा।
तस्य वैरातिसर्गेण बिलेऽस्मिन्वज्रदारिते। [5]

[(l 1) Ś1 D1-4 12 13 तु (D3 4 हि) सुरराजेन, D11 दैवत° (for विबुधराजेन) D11 पुरा (for बिल) —(l 2) V2 वियुक्तेन Ś1 D1-4 11-13 असुरार्थं विसृष्टे (D11 °मुक्ते) न (for the prior half) K (ed) तदा वज्रेण पातित (for the post half) —V3 illeg from l 3 up to 7^{b} —(l 3) D7 दुराधर्ष (for सुदु°) V2 -वज्र- (for रत्न) Ś1 D1-4 12 13 दुराधर्ष दुरावाप (D1 °साध्य, D3 4 °साद) नानारत्नविभूषित, D11 उद्धर्ष सु (K [ed] दुर्धर्ष च) दुरामाद नानारत्नमन्वित —(l 4) Ś1 D12 भूतार्थं, B4 D1-4 11 13 पुत्रार्थं, K (ed) रत्नध (for पुत्रार्थे) —Ś1 om l 5 —(l 5) V1 -[अ]तिमार्गेण, B3 -[अ]भिसर्गेण V2 तस्य चैवाभिमार्गेण, D1 4 एव दे (D4 दे) वविसृष्टे तु, D2 3 11-13 एव देव (D11 तेन, D13 देवि) विसृष्टेन, K (ed) एव दैवविसृष्टे ते (for the prior half) D3 पुरा वज्रेण दारिते (for the post half)]

—^{c}) V1 2 B1 3 4 D3 11 13 जीवित (for °वता) D11 दुर्लभ (for दुष्कर) —^{d}) B1 2 निवर्तित

7 Ñ1 missing ^{a} V3 illeg for 7^{ab} (cf v l 1 and 6) —^{a}) Ś1 D1 3 4 12 च, D2 13 [ऽ]स्य, D5 8-10 सु-, T1 ते (for तु) —^{b}) D2-4 13 -[उ]पार्जनेन (for -[उ]पार्जितेन) Ñ2 D7 मे, V1 2 B2-4 वै (for च) Ś1 D11 नियमेनार्जये (D11 °र्जिते) न च, D12 नियमैर्मार्जनेन च —D4 illeg from एव in ^{c} up to नि in ^{d} (see var) —^{c}) Ś1 Ñ V B D1-4 7 12 13 सर्वे (for सर्वान्) M1 तस्माद् (for अस्माद्) D11 निष्क्रामयिष्ये सर्वान्वो —^{d}) D5 8-10 तारयिष्यामि G1 वानर Ś1 Ñ V B D1-4 7 12 13 नि (D4 illeg) ष्क्र (Ñ2 V B D1 7 °र्ग) मिष्यथ वानरा (V1 °रान्), D11 बिलादस्मात्प्लवगमा

8 D12 om 8^{ab} —^{a}) Ñ1 D13 समीलयथ, D1 2 (marg also as in Ñ1) 3 4 11 समीलयत (for निमील°) Ñ V B D1-4 7 11 13 नेत्राणि (for चक्षूंषि) —^{b}) V1 moth-eaten from वें up to यूथ (see var) Ñ2 V B D7 -यूथ (V1 moth-eaten) पा (for -पुगवा) —V3 illeg for 8^{c} - 13^{b} —^{c}) V2 B1 2 D2 3 9 11-13 निष्क्रामितु (for निष्क्रमितु) —^{d}) Ś1 Ñ V1 2 B D1-4 7 12 13 चक्षु (D2 3 °क्षू) पि ह्यनि (D3 °तु) मीलिते, D11 पुरुषैश्च प्लवंगमै

9 V3 illeg for 9 (cf v l 8) —^{a}) Ś1 Ñ V1 2 B1-3 D1-4 7 11-13 ते हरय, B4 G2 3 ते वानरा,

25 29 0 वानरास्तु महात्मानो हस्तरुद्धमुखास्तदा ।
निमेषान्तरमात्रेण बिलादुत्तारितास्तया ॥ १०
ततस्तान्वानरान्सर्वांस्तापसी धर्मचारिणी ।
निःसृतान्विषमात्तस्मात्समाश्वास्येदमब्रवीत् ॥ ११
एष विन्ध्यो गिरिः श्रीमान्नानाद्रुमलतायुतः ।
एष प्रस्रवणः शैलः सागरोऽयं महोदधिः ॥ १२
स्वस्ति वोऽस्तु गमिष्यामि भवनं वानरर्षभाः ।
इत्युक्त्वा तद्बिलं श्रीमत्प्रविवेश स्वयंप्रभा ॥ १३

D5 तु मीलिता, D6 G1 M1 2 ते मीलिता, D8–10 T2 Ck t निमीलिता° (for सुमीलिता) —^{b}) D4 illeg from मार up to कर Ñ2 B4 D7 सुकुमारतरं, V2 B1–3 सुकुमारतल (for °राङ्गुले) V1 सुकुमारस्तु वैकल° (corrupt) ❀ Ck सुकुमाराङ्गुलैरिति । समासान्तश्छान्दस ❀ —^{c}) D9 G दृष्टिद्, T2 स्पृष्ट्वा, Ck t as in text (for दृष्टि) D11 सम नेत्राणि निदधुर् —^{d}) T2 मुख (for हृष्टा) Ñ2 V1 2 B D6 8–10 T1 M3 काक्षया (for -काङ्क्षिण) —For 9^{cd}, Ś1 Ñ1 D1–4 12 13 subst

1105* समावृण्वन्तु नेत्राणि तुष्टा गमनकाङ्क्षिण ।

[Ñ1 D2 13 समावृण्वश्च, D1 समावृण्वन्तु-, D4 damaged, L(ed) °ण्वत (for °ण्वन्तु)],
while Ñ2 V1 2 B D7 subst

1106* सम न्यमीलयश्चक्षुर्विनिर्गमनकाङ्क्षिण° ।

[V1 न्यमीलयश्, V2 B4 आमीलयश्, B2 D7 निमीलयश् (for न्यमीलयश्) B4 -काक्षया (for -काङ्क्षिण)]

10 V3 illeg for 10 (cf v l 8). Ś1 Ñ1 D1–4 11–13 om 10 —^{b}) Ñ2 D7 -नद्ध-, V2 B1 2 (before corr) बद्ध- (for -रुद्ध-) Ñ2 V2 B D7 स्थिता, D6 G2 तथा (for तदा) —V1 moth-eaten for न्तरमात्रेण in ° —^{d}) T2 उद्धारितास्, G(ed) नि सारितास् (for उत्ता°) ❀ Cr वानरास्तु महात्मानो हस्तरुद्धमुखास्तदा । निमेषान्तरमात्रेण बिलादुत्तारितास्तयेति पाठ ❀

11 V3 illeg for 11 (cf v l 8) —^{a}) D5 8–10 उवाच सर्वांस्तास्तत्र, D6 G1 3 M2 Cr निलादुत्तारयामास —^{b}) D6 G1 3 M2 सर्वांस्तान् (for तापसी) D12 ब्रह्मचारिणी (for धर्म°) —^{c}) Ś1 Ñ1 D1–4 11–13 उत्ता(D13 °त्ती)र्य (for नि सृतान्) —^{d}) D7 4 समागम्य (for समाश्वास्य) —For 11, Ñ2 V1 2 B D7 subst

1107* उत्तार्य विषमात्तस्मात्समेत्य सुदती तदा ।
तत सा तान्समुत्तीर्णान्समाश्वास्येदमब्रवीत् ।

[(l 1) D7 विषयात् V1 युवती (for सुदती) —(l 2) V1 तान्सा (by transp)]

12 V3 illeg for 12 (cf v l 8) —^{b}) M3 -लताकुल (for °युत) S1 Ñ1 D2 12 13 एष सह्यो महाच(D2 13 °च)-ल, Ñ2 V1 2 B1–3 D7 बहुकंदर(Ñ2 D7 °कुंजर)निर्झर°, B4 D1 3 4 11 एष सह्यो(B4 मलयोय) महागिरि —^{c}) Ś1 Ñ1 D1–4,12 13 M1 श्रीमान् (for शैल) —^{d}) Ś1 Ñ V1 2 B1–3 D1–4 7 12 13 एष(D1 अय) पार्श्वे (for सागरोऽय) ❀ Ct प्रस्रवण किष्किन्धासमीपप्रस्रवणादन्योऽयमित्याहु । अ-स्युच्यत्वात्ततोऽपि तस्य दर्शनमित्यन्ये। यत्रेच्छा तत्र गन्तव्यमिति तात्पर्यम् ❀

13 V3 illeg for 13^{ab} (cf v l 8) —^{a}) G2 स्वस्त्यस्तु वो (by transp) (for स्वस्ति वोऽस्तु) —^{b}) T2 गमन (sic) (for भवन) Ś1 Ñ V1 2 B1–3 D1–4 7 12 13 G1 वानरोत्तमा (for वानरर्षभा) —^{c}) D3 4 मा, G2 तान् (for तद्) Ñ2 V B1–3 D7 घोर (for श्रीमत) —^{d}) Ś1 Ñ1 D2–4 12 13 यशस्विनी, Ñ2 V D7 मनस्विनी, B1–3 D1 तपस्विनी (for स्वयप्रभा) —After 13, Ñ2 V B D7 ins

1108* तपोयोगप्रभावेन निमेषान्तरचारिणी ।

—Thereafter they cont, while Ś1 Ñ1 D1–4 11–13 ins after 13

1109* बिल तु तद्वै तपसा स्वयप्रभा
प्रविश्य धर्मेण तथा तपस्विनी ।
स्थले तु तस्मिन्हरयो व्यवस्थिता
करावरुद्धैर्वदनैर्महाबला ।

Colophon

वानरास्तु महात्मानो हस्तरुद्धमुखा स्थिता । [5]
चक्षूंष्युन्मीलयामासुर्मुहूर्तात्सर्व एव हि ।

[(l 1) D11 स्वय मा (for तपसा) Ñ2 V B D7 तद्वै (V3 illeg after तद्वै up to l 4) बिल सा सहसा स्वयप्रभा. —(l 2) D1 यशस्विनी (for तप°) Ñ2 V1 2 B D7 प्रविश्य धर्म निय(V1 B °र)ता तप(B1–3 मन)स्विनी —(l 3) V2 स्थलेषु, D13 बिले तु (for स्थले तु) Ñ2 V1 2 B D7 सर्वे (for तस्मिन्) Ñ1 स्थितास्तु सर्वे हरय स°गता —(l 4) Ñ2 V1 2 B D1 7 नयनैर् (for वदनैर्) Ś1 Ñ1 D2 12 13 करामरुद्धैर्वदनै (D13 °र्हरिभि) समागता.

Colophon —*Sarga name* Ś1 Ñ1 V3 B4 D1–3 4 11–13 बिलनिष्क्र(D11–13 °ष्क्रा)मण (Ś1 Ñ1 V3 B4 D3 4 °ण), Ñ2 D7 बिलान्निष्क्रमण, V1 वानरबिलादुत्तारण, V2 बिलनिर्गमन, B1–3 सीतान्वेषणे बिलनिष्क्र(B2 °ष्क्रा)मण —*Sarga no.* (figures, words or both) Ś1 Ñ1 V1 B1 D2 4 12 13 om, Ñ2 49, V2 50, V3 55, B2 3 D3 53, B4 56, D1 32, D7 54, D11 51, L(ed) 44 —After colophon, D2 concludes with राम

—(l 5) V2 B1 4 D7 ते (for तु). Ś1 Ñ1 D1 2 11–13 महावीर्या, D3 4 महाभागा (for °हात्मानो) V2 B1–3 -बद्ध- (for -रुद्ध-) D11 तथा (for स्थिता) D3 4 हनुमत्प्रमुखा स्थिता (for the post half) —(l 6) Ś1 Ñ1 D1–4 12 13 तु(Ś1 Ñ1

ततस्ते ददृशुर्घोरं सागरं वरुणालयम् ।
अपारमभिगर्जन्तं घोरैरूर्मिभिराकुलम् ॥ १४
मयस्य मायाविहितं गिरिदुर्गं विचिन्वताम् ।
तेषां मासो व्यतिक्रान्तो यो राज्ञा समयः कृतः ॥ १५
विन्ध्यस्य तु गिरेः पादे संप्रपुष्पितपादपे ।
उपविश्य महाभागाश्चिन्तामापेदिरे तदा ॥ १६
ततः पुष्पातिभाराग्राँल्लताशतसमावृतान् ।
द्रुमान्वासन्तिकान्दृष्ट्वा बभूवुर्भयशङ्किताः ॥ १७
ते वसन्तमनुप्राप्तं प्रतिवेद्य परस्परम् ।
नष्टसंदेशकालार्था निपेतुर्धरणीतले ॥ १८
स तु सिंहर्षभस्कन्धः पीनायतभुजः कपिः ।
युवराजो महाप्राज्ञ अङ्गदो वाक्यमब्रवीत् ॥ १९

G 4 52 19
B 4 53 7
L 4 45 8

स)मुहूर्तेन कालेन, D11 मुहूर्तेनैव कालेन (for the prior half) Ś1 Ñ1 D2–4 11 12 चक्षूंष्युन्मील्य सग(D11 °स्थि)ता, D1 चक्षुरुन्मील्य सस्थिता, D13 चक्षून्मील्य मम गता (sic) (for the post half)]

—After 13, D5 8–10 M1 Ck t ins an additional Colophon [*Sarga no* D5 8–10 Ck t 52, M1 53]

14 Before 14, M1 ins श्रीरामाय नम —a) G3 सागर (for ददृशुर्) D11 भीम (for घोर) —b) Ś1 Ñ V B D1–4 7 12 13 समुद्र, G3 ददृशुर् (for सागर) D11 मकरालय (for वरुणा°) —V2 om 14cd —c) Ś1 Ñ2 V3 B D1–4 7 11–13 इव, G1 परि-, M2 अनु (for अभि-) Ñ1 अपारमिव दुर्धर्षं —d) D11 भीमैर् (for घोरैर्) T3 M3 आवृत (for आकुलम्) Ś1 Ñ V1 3 B D1–3 7 12 13 महोरगनिषेवित ❀ Ck अथ विलादुत्तार्य स्वयप्रभाविलगमनानन्तरमृतुलिङ्गत कालातिपात निश्चित्याङ्गदस्य प्राय प्रवृत्ति । एवमिह पूर्वापेक्षया प्रकरणविच्छेदादिह सर्गारम्भ । तथा च पाङ्क्तो विच्छेद' प्रकाशते। अन्ये त्विह नावच्छिन्दन्ति। ग्रन्थाल्पीयस्त्वादिमत्या। ततस्त इत्यादि ❀

—After 14, Ś1 Ñ1 D1–3 11–13 ins l 1–2 only, while Ñ2 V B D7 subst for 15ab

1110* ततस्त देशमागम्य सौम्य वितिमिर शुभम्।
यथाप्राप्तमकृत्वा च ततो वचनमब्रुवन्।
रामस्य भार्यां ता द्रष्टु रावण च निशाचरम्।

[(l 1) D2 13 ते (for त) Ñ2 V2 D2 7 13 आगत्य (for °म्य) D11 वै तिमिर (for वि°) D13 दिश (for शुभम्) —(l 2) Ś1 Ñ1 D12 अवगच्छत(D12 °च्छति) निष्क्रात, B4 यथा प्राप्तमति कृत्वा, D1 अपागच्छन निष्क्राता, D3 3 11 13 अवजग्मुर्(D3 11 °र)तिक्रात(D3 °तु) (for the prior half) V1 अब्रवीत् (for अब्रुवन्) Ś1 Ñ1 D1–3 11–13 सुग्रीवस्य प्रतिश्रुत (D1 °श्रम, D3 °श्रव) (for the post half)]

15 a) Ś1 D12 -[स]भिह(D12 °हि)त (for -विहित) —For 15ab, Ñ2 V B D7 subst 1110* —c) Ś1 Ñ1 B4 D1–4 11–13 स नो मासो, Ñ2 V B1–3 D7 स न कालो (for तेषा मासो) M1 ह्यतिक्रातो —d) V1 राज्ञा य (by transp) T2 हि न, Ck as in text (for कृत)

16 a) Ś1 Ñ V B1–3 D1–4 7 12 13 ते(V2 तत्) विंध्यस्य, D11 विले विध्य- (for विन्ध्यस्य तु) Ñ2 V2 3 B D7 पार्श्वे (for पादे) —b) Ś1 Ñ1 D1–4 11–13 चित्रपुष्पित-, V1 सप्रफुल्लित- (for सप्रपुष्पित-) Ś1 Ñ1 D2 12 13 -कानने (for -पादपे) —c) Ś1 Ñ V B D2–4 7 12 13 महाकायाश, D1 °मायाश, D5 8–10 T2 M3 °स्मानश (for महाभागाश) —d) M3 आसेदिरे (for आपे°) Ñ2 V B1–3 D7 परा, D11 G2 तथा (for तदा)

17 Ñ2 V B1 3 D7 om 17–18 —a) Ś1 D2 12 13 पुष्पातिभारातॉल्, B4 पुष्पाभि°, D1 पुष्पाणि साराग्रॉल्, D3 पुष्पाभिरामाग्रॉल्, D4 पुष्पाभिहाराग्रॉल्, D9 पुष्पित°, D11 पुष्पितशाखाग्रॉल्, G1 पर्वत° (for पुष्पातिभाराग्रॉल्) —b) Ś1 D12 वृति- (for -शत-) D6 11 -समाकुलान् (for -समावृतान्) B2 4 लताश्चैव सहस्रश —c) Ś1 Ñ1 B2 4 D2–4 12 13 दृष्ट्वा वासतिकान्वृक्षान्(B2 पुष्पान्), D1 11 दृष्ट्वा हैमतिकान्वृक्षान् —d) Ś1 Ñ1 D1 2 12 13 -विक्लवा, D11 सवृता (for -शङ्किता) D3 4 बुध्यध्व हि(D3) प्लवगमा —After 17, D3 reads 19cd (repeats in its proper place) and 21–22, while D4 reads 21–22 after 17

18 Ñ2 V B1 3 D7 om 18 (cf v l 17) —ab) D1 11 हेमतम् (for वसन्तम्) T2 अनुप्राप्ता, Cv r g k t as in text (for अनुप्राप्त) T3 G3 प्रतिबुद्धा, G2 M3 प्रतिपद्य, M1 प्रतिबोध्य (for °वेद्य) B2 4 प्रनिचिन्त्य(B4 °मृश्य) प्लवगमा (for b) Ś1 D12 ते वसतमह दृष्ट्वा राजभीतिवशा भवन् (archaic) —Ś1 D12 om 18c–19b —c) G2 3 -कार्यार्था (for -कालार्था) B2 नष्टसज्ञास्त्वनाथा हि —d) Ñ1 D1–4 13 निपेतुर् (for निपेतुर्) Ñ1 B2 4 D1–4 13 वसुधा- (for धरणी-) —After 18, D5 6 8–10 S ins, B4 ins l 1 only after 18

1111* ततस्तान्कपिवृद्धास्तु शिष्टाश्चैव वनौकस ।
वाचा मधुरयाभाष्य यथावदनुमान्य च ।

[(l 1) B4 च (for तान्) T2 अपि (for कपि-) B4 D5 8–10 T2 M2 च (for तु) B4 ताश्च सर्वान्, M1 विशिष्टास्तु (for शिष्टाश्चैव)]

19 Ś1 D12 om 19ab (cf v l 18) —a) Ñ V B D1–4 7 11 13 तत (for स तु) Ñ1 D1–4 13 पीनायत-, D5 8–10 G3 M3 सिंहवृष- (for सिंहर्षभ-) —b) D1 सिंहदर्प, D2–4 सिहर्षभ, D13 सर्षर्षभ- (for पीनायत) D1 2 4 11 13 -भुजो बली, D3 महाबली, G1 M2 महाभुज (for -भुज कपि) Ñ1 सिंहर्ष ... बली (illeg) —D3

20 8 9 शासनात्कपिराजस्य वयं सर्वे विनिर्गताः ।
मासः पूर्णो बिलस्थानां हरयः किं न बुध्यते ॥ २०
तस्मिन्नतीते काले तु सुग्रीवेण कृते स्वयम् ।
प्रायोपवेशनं युक्तं सर्वेषां च वनौकसाम् ॥ २१
तीक्ष्णः प्रकृत्या सुग्रीवः स्वामिभावे व्यवस्थितः ।
न क्षमिष्यति नः सर्वानपराधकृतो गतान् ॥ २२

repeats 19^{cd} here (cf v l 17) —^{c}) Ś1 D3 (first time) 12 अथागदो (for युवराजो) Ñ2 महाप्राज्ञम्, V B1–3 D7 महद्वाक्यम्, D11 हित वाक्य (for महाप्राज्ञ) Ñ1 D1 13 °ओगदो नाम, D1 3 (second time) 4 °ओगदो वाक्य B4 कुमारस्तत्वसदर्शी ❀ Cr महाप्राज्ञ अङ्गद इत्यसधिश्छान्दस ।, Ct प्राज्ञ अङ्गद इत्यार्षम् ❀ —^{d}) D11 युक्तम् (for वाक्यम्) Ś1 Ñ1 D2 3 (both times) 4 12 13 ततो (D3 [second time] 4 स्वस्थो) वचनमब्रवीत्, Ñ2 V B1–3 D7 अगदस्तानथाब्रवीत्, D1 सत्य चैवाब्रवीत्कपि. —After 19, V1 B4 ins l 1–2 only of 1114*

20 V3 illeg for 20 —^{a}) Ś1 Ñ1 D1 2 11–13 शासन (for °नात्) Ñ2 V1 2 B1–3 D7 -सिंहस्य (for -राजस्य) —^{b}) Ś1 D12 पूर्णे मासे (L[ed]°सि) निवर्तितु, Ñ1 D2 13 पूर्णे मासे निवर्त (Ñ1 °र्त्य)ता, Ñ2 V1 2 B1–3 D7 सर्वे वयमिहागता, B4 गिरि प्रस्रवण गता', D1 3 4 11 मासे पूर्णे निवर्तन (D1 °र्तितु) —^{c}) T2 विलस्थाने, G2 विलेस्माक (for °स्थाना) —^{d}) D9 10 'नु (for न) D5 6 8–10 G M2 बुध्यत, Cm as in text (for बुध्यते) M1 हर किं न न बुध्यत (corrupt) ❀ Ck किं न बुध्यतेति । कालात्ययमिति शेष ।, Ct किं न बुध्यत नाबुध्यत। कालात्ययमिति शेष ❀ —For 20^{cd}, Ś1 Ñ1 D1–4 11–13 subst

1112* स च पूर्णो विलेऽस्माक निबोधध्व प्लवगमा ।

[D3 प्राप्तोपा वय सर्वेस्माक (hypm) (for the prior half) —After ऽस्माक, Ñ1 erroneously repeats 20^{b} D1 तद्बुध्यध्व, D11 न बुध्यध्व (for निबोधध्व) D4 व्यतिक्रममिम प्रभु (for the post half).]

—Thereafter Ś1 D12 cont 1116*, D3 4 cont. 1118* —For 20^{cd}, Ñ2 V1 2 B D7 subst

1113* मास पूर्णे विलगता नावबुद्ध्याम वानरा' ।

(B4 पूर्णे मास (by transp) B2 -याता (for गता). Ñ2 V1 2 D7 नाबुद्ध्याम हि वानरा, B4 हरयो नावबुध्यत (for the post half)]

—After 20, D5 6 8–10 S ins, V1 B4 ins l 1–2 after 19, B2 3 cont. l 1–2 only after 1113*

1114* वयमाश्वयुजे मासि कालसख्याव्यवस्थिता ।
प्रस्थिता सोऽपि चातीत किमत कार्यमुत्तरम् ।
भवन्त. प्रत्ययं प्राप्ता नीतिमार्गविशारदा ।
हितेष्वभिरता भर्तुर्निसृष्टा सर्वकर्मसु ।
कर्मस्वप्रतिमा शूरा दिक्षु विश्रुतपौरुषा । [5]
मा पुरस्कृत्य निर्याता पिङ्गाक्षप्रतिचोदिता ।
इदानीमकृतार्थाना मर्तव्यं नात्र सशय ।
हरिराजस्य सदेशमकृत्वा क सुखी भवेत् ।

[(l 1) V1 B2 अश्वयुजे, D9 आश्वयुजे (for आश्वयुजे) D6 मासे (for मासि) —T1 3 om, M2 reads *inf lin sec m* l 2 —(l 2) V1 व्यतीतमयाश्चारम (for the prior half) D9 om (hapl), G2 3 किमित (for किमत.). V1 G2 उत्तम (for उत्तरम्) M1 किं न कृत्यमनतर (for the post half) —(l 3) M1 -शाग-, Cg k as above (for -मार्ग-) —(l 4) D6 -[अ]भिहिता (for °रता) —(l 5) T2 कर्मणि, Ck as above (for कर्मसु) D5 8–10 M3 सर्वे (for शूरा) G3 M2 विश्रुत- (for विश्रुत-) —(l 6) T2 M2 पिंगाक्षा, Ck as above (for पिङ्गाक्ष-) G2 -चोजिता, Ck as above (for -चोदिता) D6 पिंगलाक्षप्रचोदिता, G3 पिंगाक्षेशप्रचोदिता (for the post half)]

21 Ś1 D12 om. 21–22^{b} D3 reads 21–22 (including star passages) after 19^{cd} (first occurrence), D4 reads 21–22 (including star passages) after 17 —^{a}) Ñ1 D1–4 13 सोऽह, D8 10 अस्मिन् (for तस्मिन्). Ñ V B D1–4 7 11 13 व्यतीते, D6 गतेथ, D9 T3 अतीत- (for अतीते) Ñ1 B4 D1–4 11 13 समये (for काले तु). —^{b}) Ñ2 V B D7 11 स्वयं कृते (by transp) Ñ1 D1–4 13 सुग्रीवस्य महात्मन —^{cd}) B4 मन्ये (for युक्त). V1 2 B1 3 D6 7 T2 नो (for च) B4 अस्माक नात्र सशय' (for ^{d}) D11 प्रायोपवेश मन्येह युष्माक नात्र सशय. —For 21^{cd}, Ñ1 D1–4 13 subst

1115* इह प्रायोपवेश न पथ्य मन्येऽद्य वानरा ।

[D1 हि (for न). D3 4 प्रायमुपाशिष्ये (for प्रायोपवेश न). Ñ1 D3 4 13 वश्य (for पथ्य) D3 4 मान्यथ (sic) (for मन्येऽद्य)]

22 Ś1 D12 om 22^{ab} (cf. v l 21) D3 reads 21–22 (including star passages) after 19^{cd} (first occurrence), D4 reads 21–22 (including star passages) after 17 —^{ab}) D3 4 10 13 G1 3 M3 तीक्ष्ण- (for तीक्ष्ण) B4 बलवान् (for सुग्रीव) G2 M2 -कार्ये (for -भावे). Ñ1 D1–4 13 पितृव्यो मम वानरा, B4 D11 सुग्रीव' (D11 क्रूरश्च) प्लवगेश्वर (for ^{b}). Ñ2 V B1–3 D7 सुग्रीवो (V3 illeg after वो up to 22^{d}) बलवास्तीक्ष्ण. प्रकृत्या वानरेश्वर —After 22^{ab}, Ñ1 D1–4 11 13 ins, while Ś1 D12 cont after 1112*·

1116* राघवार्थे स्वकान्प्राणास्त्यजेचैव न सशय ।

[Ñ1 च स्वान्, D1 तु स्वान्, D3 4 मम, D11 तथा (for स्वकान्) Ñ1 एव, D1 3 4 11 इति (for चैव)]

अप्रवृत्तौ च सीतायाः पापमेव करिष्यति ।
तस्मात्क्षममिहाद्यैव प्रायोपविशनं हि नः ॥ २३
त्यक्त्वा पुत्रांश्च दारांश्च धनानि च गृहाणि च ।
यावन्न घातयेद्राजा सर्वान्प्रतिगतानितः ।
वधेनाप्रतिरूपेण श्रेयान्मृत्युरिहैव नः ॥ २४
न चाहं यौवराज्येन सुग्रीवेणाभिषेचितः ।
नरेन्द्रेणाभिषिक्तोऽस्मि रामेणाक्लिष्टकर्मणा ॥ २५
स पूर्वं बद्धवैरो मां राजा दृष्ट्वा व्यतिक्रमम् ।
घातयिष्यति दण्डेन तीक्ष्णेन कृतनिश्चयः ॥ २६
किं मे सुहृद्भिर्व्यसनं पश्यद्भिर्जीवितान्तरे ।
इहैव प्रायमासिष्ये पुण्ये सागररोधसि ॥ २७
एतच्छ्रुत्वा कुमारेण युवराजेन भाषितम् ।
सर्वे ते वानरश्रेष्ठाः करुणं वाक्यमब्रुवन् ॥ २८ G 4 53 16 B 4 53 20 L 4 45 17

—^{d}) M1 -कृतोद्यमान् (for -कृतो गतान्) —For 22^{cd}, Ś1 Ñ V1 2 B D1–4 7 11–13 subst

1117* क्षमिष्यति न सोऽस्माकं व्यतिक्रममिमं प्रभुः ।

[Ś1 Ñ1 D2 12 13 क्षमिष्यति स, Ñ2 V1 2 B D7 11 न क्षमिष्यति (by transp), D4 क्षमिष्यति न (corrupt) (for क्षमिष्यति न) Ś1 D12 नास्माकं, Ñ1 D2 13 नोस्माकं, B4 D11 नो राजा (for सोऽस्माकं) D3 4 बभूवुर्भयविक्लवा (D3 °ह्वला) (for the post half)]

—Thereafter Ś1 Ñ V1 2 B D1 ° 7 11–13 cont, while D3 4 cont after 1112*

1118* न हि ज्ञास्यति सुग्रीवो घोरं कर्म कृतं महत् ।

[Ñ2 B4 घोर- (for घोरं) Ś1 Ñ1 D1–4 12 13 कर्म घोरमिदं कृतं (D1 प्रभु) (for the post half)]

23 ^{a}) Ś1 Ñ V B D1–4 7 11–13 सीताधि(Ñ2 °तावा V2 B4 D1 11 13 °ताभि)गमनेस्माभि (D1 °कं) —^{b}) B1 D3 4 T3 एव (for एव) Ś1 D12 13 [आ]गमिष्यति, Ñ1 B1 3 D2 गमिष्यति (for करिष्यति) —V3 illeg for 23^{c}–24^{b} —^{c}) G3 [ए]वाद्य (by transp) (for [अ]द्यैव) B4 एव भजति न सर्वान् —^{d}) B4 D5 8–10 G2 M1 Ct गतु(B4 इद, G2 M1 हित) प्रायोपवेशनं ❀ Cr m g प्रायोपविशनमिति(Cr °शन)। गुणाभाव आर्ष ❀ —For 23^{cd}, Ś1 Ñ V1 2 B1–3 D1–4 7 11–13 subst

1119* प्राप्तदोषा वयं सर्वे साधु प्रायमुपास्महे ।

[V2 B1–3 सप्राप्ता स्म, G(ed) प्राप्तादेशा (for प्राप्तदोषा) Ñ1 reads सर्वे in marg V1 प्रियम् (for प्रायम्) D11 इहास्महे (for उपा°)]

24 V3 illeg for 24^{ab} (cf v l 23) V1 moth-eaten from पुत्रांश् in ^{a} up to धना in ^{b} —^{a}) D3 4 मित्राणि (for पुत्रांश्च) D6 reads दाराश्च in marg D11 G3 M1 transp पुत्रांश् and दारांश् Ś1 Ñ1 D2 12 13 त्यक्त्वा दाराश्च मित्राणि, D1 हत्वा दाराणि विद्राव्य (sic) —^{b}) B4 transp धनानि and गृहाणि —^{c}) Ś1 Ñ1 D1–4 12 13 स(Ñ1 न) चास्मान्, Ñ2 D7 न हि नो, V B1–3 न(V2 3 स) चास्मौ, D11 व्यक्त म (for यावन्न) D13 पातयेद्, M2 गातयेद् (for घात°) V2 दृष्ट्वा (for राजा) D5 6 8–10 T G2 3 M3 Cr t ध्रुवं नो हिंसते(M3 °सिता) राजा —^{d}) Ś1 Ñ V B D1–4 7 11 12 पश्चात्, D13 यश्च (for सर्वान्) V1 इति, B1 न च, B2 3 नर (sic), D1.11 अपि, G(ed) हि न (for इत) —^{e}) B2(before corr) धनेन, D11 विधिना, D12 वेधेन (sic) (for वधेन) —^{f}) Ś1 Ñ V B D1–4 7 11–13 मृत्युः श्रेयान् (by transp), G2 M1 श्रेयो मृत्युर् (for श्रेयान्मृत्युर्) ❀ Cr श्रेयो मृत्युरिहैव न इति पाठ ❀

25 B4 om 25^{ab} V3 illeg after यौवराज्ये in ^{a} up to 25^{d} —^{a}) Ñ2 D7 यौवराज्येपि, V1 2 B1–3 यौवराज्ये वै —^{b}) Ś1 Ñ1 D1–4 12 13 मते तस्य (for सुग्रीवेण) —D11 reads twice 25^{cd} —^{c}) Ñ2 V2 B1–3 D7 11 (first time) [ऽ]ह, V1 illeg, B4 हि (for ऽस्मि) Ś1 Ñ1 D1 3 4 11(second time) 12 सुग्रीवो यदि नोक्तः स्याद्, D2 13 सुग्रीवोयं चिरोक्तः स्याद् —^{d}) Ñ2 V1 2 B1–3 D7 विदितात्मना (for [अ]क्लिष्टकर्मणा) —After 25, Ś1 Ñ1 D1–4 11–13 ins

1120* अङ्गद परिपाल्यस्ते हतेऽस्मिन्स्यामह हत ।

[D4 परिपाल्योस्ति, D13 प्रतिपाल्यस्ते (for परि°) D1 हते चास्मिन्नह हत, D3 हतेस्मिनपितामिह (corrupt), D11 हतेस्मिन्भयमद्भुत (for the post half)]

26 ^{a}) Ś1 V1 2 B1 4 D7 9 12 पूर्व- (for पूर्वं) D7 मद्- (for मां) —^{b}) Ś1 Ñ1 D1–4 12 13 इमं दृष्ट्वा, Ñ2 V B1–3 D7 11 दृष्ट्वा राजा (by transp) (for राजा दृष्ट्वा) —^{c}) Ñ2 V2 3 B1–3 D7 तीक्ष्णेन (for दण्डेन) —V3 illeg from ^{d} up to 27 —^{d}) Ś1 Ñ1 D1–4 12 13 तीव्रेण ससुहृज्जन(D3 4 °न), Ñ2 V1 2 B1–3 D7 दण्डे(V1 तीक्ष्णे) नातिचिराद्धत, D11 तीव्रेण कुरु निश्चय

27 V3 illeg for 27 (cf v l 26) —^{a}) Ś1 D12 च मम (for व्यसन) Ñ1 न तात पुण्यमस्माभि —^{b}) Ś1 D12 13 पश्यतो (for °द्भिर्) Ś1 Ñ V1 2 B D1–4 7 11–13 जीवितान्तक, D6 °तातिके (for °तान्तरे) —^{c}) Ñ1 V1 2 B1 3 D1–6 8–10 13 T2 3 आशिष्ये B4 इहाद्य प्रायमाविश्ये, D11 इह प्राय समाशिष्ये —^{d}) Ś1 Ñ V1 2 B1–3 D1–4 12 13 रम्ये, M3 पूर्णे (for पुण्ये)

28 ^{a}) D12 एव तच् (hypm) (for एतच्) Ś1 Ñ1 D1–4 12 13 तु वचनम्, Ñ2 V B1–3 D7 11 तु करुण (for

17 21 18 तीक्ष्णः प्रकृत्या सुग्रीवः प्रियासक्तश्च राघवः ।
अदृष्टायां च वैदेह्यां दृष्ट्वास्मांश्च समागतान् ॥ २९
राघवप्रियकामार्थं घातयिष्यत्यसंशयम् ।
न क्षमं चापराद्धानां गमनं स्वामिपार्श्वतः ॥ ३०
प्लवंगमानां तु भयार्दितानां
श्रुत्वा वचस्तार इदं बभाषे ।
अलं विषादेन बिलं प्रविश्य
वसाम सर्वे यदि रोचते वः ॥ ३१
इदं हि मायाविहितं सुदुर्गमं
प्रभूतवृक्षोदकभोज्यपेयम् ।
इहास्ति नो नैव भयं पुरंदरा-
न्न राघवाद्वानरराजतोऽपि वा ॥ ३२

कुमारेण) B4 तच्छ्रुत्वा वचन तत्र —ᵇ) Ñ2 V B1–3 D7 युवराजस्य (for °जेन) Ś1 Ñ1 D1–3 12 13 अगदस्य मुखा च्युत —ᶜ) Ñ2 V B1–3 D7 ते सर्वे (by transp) B3 4 D2 4 11 13 वानरा (for वानर-) D11 दीना (for -श्रेष्ठा) —ᵈ) Ñ2 V B1–3 D7 इद वचनमब्रुवन्, D11 साश्रुगद्गदमब्रुवन्

29 V3 illeg from 29ᵃ up to 1121* —ᵃ) D1 3 10 तीक्ष्ण- (for तीक्ष्ण) —ᵇ) D5 6 8–10 T M2 Ck t -रक्तश् (for -सक्तश्) Ś1 Ñ V1 2 B D1–4 7 11–13 प्रियार्थी (Ś1 Ñ1 D2 12,13 °र्थं, D3 4 °र्थे) राघवस्य च (Ś1 D12 तु) —After 29ᵃᵇ, Ś1 Ñ V1 2 3 (illeg) B D T2 G1 M2 (marg) ins

1121* अस्मानकृतकार्याश्च तस्मिश्च समये गते ।

[Ś1 Ñ1 D12 -कार्यांस्तु, B4 -कृत्याश्च, D1 -वीर्यान्स (for -कार्याश्च) D5 6 8–10 T2 G1 M2 समीक्ष्याकृतकार्यांस्तु (G1 °र्यान्च, M2 °र्याश्च) (for the prior half) Ñ1 D2 13 सपूर्णे, Ñ2 D7 सर्वाश्च (for तस्मिश्च) D1 4 कृते (for गते) Ś1 D12 सपूर्णे समयागमे (for the post half)]

—ᶜ) Ñ2 V1 2 B3 D7 हि, V3 D1 3 M3 तु (for च) Ś1 Ñ V B D1–4 7 11–13 सीताया (for वैदेह्या) —ᵈ) D5 6 8–10 T2 M3 चैव (for [अ]स्माश्च) Ś1 Ñ1 D12 [आ]गतान्पुन, D2 13 गतान्पुन (for समागतान्) Ñ2 दृष्ट्वा नास्मान्गतान्प्रभु, V B1–3 D1 3 4 7 दृष्ट्वा (D4 °ष्टा)स्मानागतान्प्रभु (D1 3 4 °न्पुन), B4 D11 दृष्ट्वास्मानपि चागतान्.

30 B1 om 30ᵃᵇ —ᵃ) D6 11 G3 M1 राघव (for राघव-) Ñ2 V1 3 B2–4 D7 -कामार्थी, D3 -कार्यार्थं, D5 8–10 T1 3 G2 3 M1 2 -कामाय, Cr as in text (for कामार्थं) —ᵇ) D6 T2 G1 [अ]सशय (for °यम्) Ś1 Ñ1 B4 D2–4 11–13 वधिष्यति न सशय, Ñ2 V B2 3 D1 7 हनिष्यति न सशय —V3 illeg from 30ᶜ up to 1122* —ᶜ) D6 T1 3 G2 3 M1 तु (for च) Ś1 Ñ1 D3 4 12 न क्षमत्यपराधानि, Ñ2 V1 2 B1–3 D7 आगासि न क्षम (V2 लक्ष्मण)ते हि, B4 D1 क्षमते ना (D1 चा)पराध हि (D1 वै), D2 13 न क्षमंतेपराधाना, D11 न क्षमत्यपराध्यानि, T2 G1 न क्षम मापराधाना —ᵈ) Ś1 Ñ V1 2 B D1–4 7 11–13 प्रधानाना नराधिपा (D11 °प) —After 30, Ś1 Ñ V1 2 3 (illeg) B D T2 G1 M2 (marg) ins

1122* प्रधानभूताश्च वय सुग्रीवस्य समागता ।

[V1 सुग्रीवेण (for सुग्रीवस्य) Ś1 Ñ1 B4 D2–4 12 स (D3 ग)ता सदा, Ñ2 V1 2 B1–3 D7 सुमनसा, D1 सदा गता, D11 1ˢᵗ महात्मन (for समागता)]

—D5 6 8–10 T2 G1 M2 cont, T1,3 G2 3 M1 3 ins after 30

1123* इहैव सीतामन्विष्य प्रवृत्तिमुपलभ्य वा ।
नो चेद्गच्छाम त वीर गमिष्यामो यमक्षयम् ।

[(l 1) D5 8–10 T2 अन्वीक्ष्य (for अन्विष्य) —(l 2) T2 वय यम (for यमक्षयम्)]

31 V3 om 31.—ᵃ) B4 विवादेन, M1 प्रवादेन (for विषा°) —ᵈ) D11 सर्वे वसामो B4 हि व, D9 तव (for व) —For 31, Ś1 Ñ V1 2 B1–3 D1–4 7 12 13 subst

1124* श्रेय प्रायोपगमनमीदृशे कार्य आगते ।
भयार्दिताना तेषा तु प्लवगाना महात्मनाम् ।
उवाच वचन तारस्तत्कालसदृश हितम् ।
विषादस्त्यज्यतामेष सर्वैरेव प्लवंगमै ।
प्रविशामो बिल दुर्ग वय यस्माद्विनिर्गता । [5]
यदि वो रोचते वाक्य सर्वेषा हरिपुगवा ।

[Ś1 Ñ1 D1–4 12 13 om l 1 —(l 1) Ñ2 D7 -वसनम् (for -गमनम्) —(l 2) D3 4 मूर्धगाना (for प्लवगाना) —(l 3) Ś1 Ñ1 D1–4 12 13 उवाच वाक्य (D1 तथ्य) तारेयस् (for the prior half) Ś1 Ñ1 B1–3 D1 2 12 13 वच, D3 4 तदा (for हितम्) —(l 4) D1 एक (for एष) Ś1 D12 प्लवगमा (for °मै) —(l 5) Ś1 Ñ V1 D2 12 प्रविशाम (for प्रविशामो) V1 विनि ष्क्रान्ता (for °निर्गता) Ś1 Ñ1 D1–4 12 13 यस्मादद्य (D13 °दिह) विनि सृ (D3 °निर्ग, D12 निसृ)ता (for the post half).—D7 om l 6 —(l 6) Ś1 V1 D3 4 12 वा (for वो) Ś1 Ñ1 D1 3 4 12 ममेह, D2 13 ममेद (for सर्वेषा)]

—Then Ñ2 V1 2 B1–3 D7 cont 1126*

32 ᵃ) B2 तु (for हि) B4 सुगुप्त, D11 G3 M1 सुदुर्ग (for सुदुर्गम) —ᵇ) Ñ2 V B D7 11 M2 -भक्ष्य-, D5 8–10 -पुष्प- (for -वृक्ष-) B1–3 -भोज्यभक्ष्य, M3 भोज्यपेयकं (for -भोज्यपेयम्) —ᶜ) G1 महेन्द्रान् (for पुरदरान्) ❀ Cv r इद हि मायाविहितं सुदुर्गम (Cv °दुर्गं)मित्यादि वृत्तमर्धसमम् ❀ —For 32ᶜᵈ, Ñ2 V B D7 11 subst.

श्रुत्वाङ्गदस्यापि वचोऽनुकूल-
मूचुश्च सर्वे हरयः प्रतीताः ।
यथा न हन्येम तथा विधान-
मसक्तमद्यैव विधीयतां नः ॥ ३३

G 4 53 26
B 4 53 27
L 4 45 26

इति श्रीरामायणे किष्किन्धाकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

1125* ग्रहीतुमिन्द्रोऽपि न वोऽत्र शक्त
सुग्रीवरामौ सहितौ न चापि ।

[(l 1) B4 प्रवेष्टुम् (for ग्रहीतुम्) Ñ2 न नात्र, V1 3 न चात्र, B4 बिल न, D7 ततोत्र (for न वोऽत्र) —(l 2) B1–3 सहितौ च वापि, B4 कुत एव तस्मात् (for सहितौ न चापि)] —For 32, Ś1 Ñ1 D1–4 12 13 subst, Ñ2 V1 2 B1–3 D7 cont after 1124*

1126* क्रियतां किं विमर्षेण श्रेयो न क्रियतामिदम् ।
दुर्धर्षं च महच्चैव बहुभक्ष्यं च वानरा ।
तत्रस्थान्नो न शक्नोति द्रष्टुं सेन्द्रा हि देवता ।
किं पुना राघवो राजा लक्ष्मणो वापि वीर्यवान् ।
सुग्रीवो वानरेन्द्रो वा तथा सर्वे वनौकस । [5]

[D7 om l 1–2 —(l 1) Ś1 Ñ1 D2 विमृष्टेन, D1 3 4 12 13 °सृष्टेन (sic) (for विमर्षेण) Ñ2 V1 2 कुर्वताम् (for second क्रियताम्) Ś1 Ñ1 D1–3 ह्य(Ñ1 D1 ह्य, D2 व्यु)पदिशाम्यह (for न क्रियतामिदम्) D4 श्रेयाद्यपदिशाम्यह, D12 श्रेयोप्युपदिशाम्यह, D13 श्रेयोत्युपदिशाम्यह (for the post half) —(l 2) Ñ2 V1 महा चेन्, V2 B1–3 महच्चेद, D13 महा चैव (for महच्चैव) Ñ2 V1 D13 -भक्ष, B1 3 -भुक्त (for भक्ष्य) —(l 3) Ñ2 V1 2 B1–3 D7 च (for नो) Ñ1 D1 2 13 न शक्ता हि, Ñ2 V1 2 नर शक्ता, B1–3 न न शक्ता, D3.4 न शक्ता वै, D7 तत शक्ता (for न शक्नोति) Ñ2 V1 2 B1 2 D2 7 13 स्प्रष्टुं (for द्रष्टुं) B1–3 D1 च, D3 4 [अ]पि- (for हि) Ś1 D2 12 13 सेंद्रापि (metri causa) B1 दानवा (for देवता) —(l 4) Ñ2 V1 2 B1–3 D1 3 4 7 मानुषो रामो (for राघवो राजा) D1 नाम D2 चापि (for वापि) —(l 5) Ś1 D2 12 13 नो वा सर्वे, D1 ते वा स°, D3 ते च स°, D4 ते सर्वे च (for तथा सर्वे)]

[(l 1) V1 om the prior half (cf v l 22) D1 विक्राता (for विख्याता) B3 गरुत्मानिव रहसा (for the post half) —After l 1, V1 cont 1303* —(l 2) Cf 20^{ab} D11 तु (for [अ]स्य) Ñ2 V1 3 B1 3 4 D7 सागरप्लवने (V3 °प्रवणे) हरि (for the post half) —(l 3) V1 हरिश्रेष्ठा B3 तदा सूत हरिश्रेष्ठा, B4 स चारुफालयतु श्रेष्ठो (for the prior half) —After l 3, Ñ2 V3 B1 3 4 D7 cont 1303* and (V3 illeg) l 1 of 1299*, while V1 D1 3 4 11 read l 1 of 1299* D1 4 11 om, while B3 reads l 4–5 after l 1 of 1299* —(l 4) Ñ1 illeg up to भवद्भि B3 वीर्यं महत्तस्य]

—^{c}) G2 वा (for या) ❀ Cr m g प्लुवन्गमिति निर्देश-श्छान्दस (Cg °त्यार्षो निर्देश.) I, Ck प्लुवध्वमिति । प्लुध्वमिति यावत् ।, Ct प्लुवध्व प्लुध्वम् ❀ —^{d}) D5 6 8–10 G1 M3 प्लवने (for गमने) Ś1 Ñ1 D2 12 13 गमने व (D2 च) प्लवगमा —For 23^{cd}, Ñ2 V1 3(illeg) B1 3 4 D1 3 4 7 11 subst l 2 of 1299*

Colophon Ś1 Ñ V1 3 (illeg) B1 3 4 D1–5 7 11–13 om (cont the Sarga) —*Sarga no* (figures, words or both) D6 8–10 T1 3 G1 2 M2 3 64, T2 62, G3 63 (as in text), M1 65 —After colophon, G concludes with श्रीरामाय नम

64

Ś1 Ñ V1 B1 3 4 D1–5 7.11–13 continue the previous Sarga M1 begins with श्रीरामाय नम

1 ☞ V3 illeg up to गमि in 29^{a} (cf v l 1303*) B3 om 1–2^{b} —^{a}) Ś1 Ñ V1 B1 4 D1–4 7–10 12 13 Ck t अथाङ्गद-, D11 अंगदस्य, Cr m g as in text (for ततोऽङ्गद-) —^{b}) T2 transp सर्वे and ते Ś1 D1–4 11–13 ते वै (D11 च) शाखामृगर्षभा, Ñ1 D6 8–10 ते सर्वे वानरर्षभा, Ñ2 V1 B1 4 D7 हृष्टा शाखामृगर्षभा —V1 (first time damaged) repeats 1^{cd} after 1306* —^{c}) D1–3 11–13 गति-, D4 गतिं, T2 गतास् (for गतौ) Ś1 Ñ1 स्वा स्वा गति (for स्व स्व गतौ) ❀ Cr स्व स्व गतौ समुत्साहमिति पाठ । गतौ गमनविषये ❀ —^{d}) D5 6 8–10 Ck ऊचुस्, D11 प्राहुस् (for आहुस्) D1 3 4 11 -बल (for -क्रमम्) Ś1 Ñ1 V1 D2 12.13 ऊचुस्ते तु समाहिता .—For 1^{cd}, Ñ2 B1 4 D7 subst , D3 4 ins after 1^{ab}, while D11 cont after 1306*

1305* कृताञ्जलिपुटास्तत्र वाक्यमङ्गदमब्रुवन् ।

[B4 सर्वे (for तत्र)]

—Thereafter Ñ2 B1.4 D7 cont , V1 ins after 1^{cd} (first time), while D3 4 11 ins after 1

1306* सेनामध्यात्समुत्पत्य हर्षयन्त प्लवगमान् ।

[Ñ2 D7 प्लवगमा (for °मान्) V1 हर्षयतस्तथाङ्गद, D3 4 11 वानरान्सम्प्रहर्षयन् (for the post half)]

2 B3 om 2^{ab} (cf v l 1) —^{a}) Ñ2 B1 4 D7 गयो (for गजो) Ś1 Ñ1 D1–4 12 13 शरभो, D6 यो वय (sic) (for गवय) —^{b}) Ś1 Ñ1 D1–4 12 13 ऋषभो (for शरभो). —Ñ1 partly illeg for 2^{cd} V1 damaged from द up to जाम्ब in ^{d} —^{c}) D12 द्विविधश्, M2 विविदश् (for द्विविदश्) —^{d}) Ñ2 D6 8–10 अगदो, B1 3 4 D7 हनूमान् (for सुषेणो) Ś1 Ñ2 V1 B1.3 4 D1 3 4 7 12 13 M1 नल , D2 तत , D6 तदा (for तथा) D11 जाववाचल एव च ❀ Cv.r सुषेणो जाम्बवास्तथेति पाठ (Cv °थेति सम्यक्) ❀ —After 2, Ñ2 V1 B1 3 4 D3 7 ins

1307* नीलस्तारश्च रम्भश्च ऋषभ क्रथनस्तथा ।
सानुप्रस्थोऽथ पनसस्तथा दधिमुखो हरि ।
एतच्छ्रुत्वा महद्वाक्यमङ्गदेन समीरितम् ।
वक्तुकामा महात्मानस्तस्थु प्राञ्जलयस्तदा ।

[(l 1) V1 damaged after नील up to प्र in l 2 Ñ2 शरभ (for रम्भश्च) D3 शरभ (for ऋषभ) D7 कथनस् (for क्रथनस्) B3 सुषेण पनसस्तथा (for the post half) —(l 2) B3 च क्रथनस् (for ऽथ पनसस्) —(l 4) D3 महात्मान (for °नस्). V1 illeg for तस्थु V1 तथा (for तदा)]

3 ^{a}) Ś1 Ñ1 D1 2 11–13 अ(D1 2 11 13 आ)भापत (for आबभाषे) Ñ2 V1 B1 3 4 D7 गय (V1 °ज) पूर्वमुवाचेद्, D3 4 गजोब्रवीदह तावत् —^{b}) Ś1 D2 12 प्लुप्लुवे, Ñ2 V1 B1 4 D7 गमिष्ये, B3 दास्यामि, D3 4 क्रमेय, D13 प्लवने (for प्लवेय) T2 शत (for दश) —^{c}) B3 योजनाना तु, D2 °न्येव, D3.4 प्लवग प्राह (for योजनान्याह) —^{d}) Ś1 Ñ1 D2.11–13 प्लवेय द्विगुणान्यह, Ñ2 V1 B1 3 4 D7 गमिष्ये विंशतिं पर(B1 °रा), D1 क्रमेयं द्विगुणान्यत , D3 4 यास्ये विंशतियोजनं

गवयो वानरस्तत्र वानरांस्तानुवाच ह ।
त्रिंशतं तु गमिष्यामि योजनानां प्लवंगमाः ॥ ४
शरभो वानरस्तत्र वानरांस्तानुवाच ह ।
चत्वारिंशद्गमिष्यामि योजनानां न संशयः ॥ ५
वानरांस्तु महातेजा अब्रवीद्गन्धमादनः ।
योजनानां गमिष्यामि पञ्चाशत्तु न संशयः ॥ ६
मैन्दस्तु वानरस्तत्र वानरांस्तानुवाच ह ।
योजनानां परं षष्टिमहं प्लवितुमुत्सहे ॥ ७
ततस्तत्र महातेजा द्विविदः प्रत्यभाषत ।
गमिष्यामि न संदेहः सप्ततिं योजनान्यहम् ॥ ८
सुषेणस्तु हरिश्रेष्ठः प्रोक्तवान्कपिसत्तमान् ।
अशीतिं योजनानां तु प्लवेयं प्लवगर्षभाः ॥ ९

G 5 1 48
B 4 65 9
L 4 56 40

4 ^{ab}) Ś1 Ñ1 D2 5 8–13 शरभो, Cv as in text (for गवयो). D10 repeats वानरस्तत्र. D1 3 4 शरभो वानरान्सर्वान्हरिमध्ये व्य(D1 गणमध्येत्र)भाषत ❀ Cr गवयो वानरस्तत्र वानरास्तानुवाच हेति पाठ ❀ —D11 om (hapl) 4^{c}–5^{b} —^{c}) Ś1 Ñ1 D2 12 13 अहं त्रिंशद्, D1 त्रिंशतिं तु, D6 त्रिशतं तु (for त्रिशतं तु) ❀ Ct त्रिंशदित्यर्थे त्रिंशतमित्यार्षम् ❀ —^{d}) D13 न सशय (for प्लवगमा) —For 4, Ñ2 V1 B1 3 4 D7 subst

1308* अब्रवीद्गवय श्रीमान्स्तस्या वानरससदि।
यामि त्रिंशतमेकाह्ना योजनानीति वीर्यवान् ।

[(l 1) Ñ2 V1 तस्य (for °स्या) —(l 2) B4 पञ्चाशद् (for एकाह्ना)]

—All the above MSS cont , while Ś1 D2–4 12.13 ins after 4

1309* अथाद्रिशिखराकारो विक्रमेऽप्रतिमो हरि ।

[Ś1 D2–4 12 13 [अ]भ्र (for [अ]द्रि-) Ś1 D2–4 12 13 ऋषभ(Ś1 °भो)प्रतिमो गतौ, B3 बलवान्विक्रमो हरि (for the post half)]

5 D11 om 5^{ab} (cf. v.l 4) —^{a}) Ś1 Ñ1 D1–5 8–10 12 13 ऋषभो (for शरभो) Ś1 Ñ1 D2 12 13 वानरश्रेष्ठो, Ñ2 V1 B1 3 4 D7 सुमहातेजा , G2 3 M3 तानुवाचाथ, M1 वानरास्तत्र (for वानरस्तत्र).—^{b}) M1 वानरस् (for °रास्) D1 इति (for तान्) D6 G2 3 M3 वानरर्षभ (for तानुवाच ह) Ñ2 V1 B1 3 4 D7 प्रत्युवाचेदमगद —^{c}) D11 समेष्यामि (for गमि°) Ñ2 V1 B1 3 4 D3 7 चत्वारिंशत(V1 °ति)मेकाह्ना(B3 °त्मा, D3 °ह्नि), D1 4 चत्वारिंशतमेष्यामि —^{d}) B1 योजनानि (for °ना) Ñ2 V1 B1 3 4 D3.7 व्रजाम्यहं, D6 S प्लवगमा (for न सशय).

6 ^{a}) Ś1 Ñ1 D1.2 5 12 13 T2 3 M2 3 वानरस, D6 अब्रवीत् (for वानरास्) Ñ2 D7 ततो हेमप्रभ श्रीमान् ; V1 B1 3 4 ततो हेमोपम (B3 हिमोपम , B4 हेममय) श्रीमान्, D3 4 11 विंध्यमदरसकाश .—^{b}) Ś1 D12 त्वब्रवीद् , D4 11 प्राब्रवीद् , D6 वानरान् , G2 ह्यब्रवीद् (for अब्रवीद्). —^{c}) G2 सहस्राणि, L(ed.) तु वै पश्चिम् (for गमिष्यामि) —^{d}) Ś1 Ñ1 D2 12 13 इति मे म(D13 ग)ति , D1 च न स°, G1 तु प्लवगमा (for तु न सशय) L(ed) अहं प्लवितुमुत्सहे ❀ Cm चत्वारिंशत्पञ्चाशच्छब्दयोर्द्वितीयार्थे प्रथमा ❀ —For 6^{cd}, Ñ2 V1 B1 3 4 D3 4 7 11 subst

1310* सुख योजनपञ्चाशत्क्रमेय वानरर्षभा ।

[D3 4 अहं, D11 अहो (for सुख) B4 पचाशत योजनानां (for the prior half) V1 क्रमो मे, D4 क्रमेयुर् (sic) (for क्रमेय) D3 4 11 इति वानरा (for वानरर्षभा)]

7 ^{ab}) Ś1 Ñ1 D2 12 13 हि (for तु) D12 lacuna for वानरस्तत्र Ñ1 illeg for ^{b} G2 ह्य (for ह) Ñ2 V1 B1 3 4 D7 ततस्तु हिमवत्प्रा(D7 हि महाप्रा)णो(B1 °यो) मैंदो वाक्यमथाब्रवीत्, D3 4 11 मैंद प्राह महातेजा वानर पर्वतोपम· (D11 °त्तम [corrupt]) —^{cd}) Ś1 Ñ1 D2 12 तु वे, Ñ2 V1 B1 3 4 D1 3 4 7.11 अहं, D13 च वे, M2 (*sec m*) परा (for पर) D1 3 4 अद्य, D11 सद्य (for अहं) Ñ2 V1 B1 3 4 D7 क्रमे(B3 गच्छे)य नात्र सशय , G(ed) उपक्रमितुमुत्सहे (for ^{d}) G2 पश्चिमेव गमिष्यामि योजनाना प्लवगमा

8 ^{a}) D1 तु तान् (for तत्र) Ñ2 V1 B1 3 4 D7 द्विविदस्तु (for ततस्तत्र) D3 4 11 ततस्तु हिमवत्प्राणो —^{b}) Ś1 D12 द्विविध (for °द) Ś1 Ñ1 D1 2 11–13 प्रत्युवाच ह (for प्रत्यभाषत) Ñ2 V1 B1 3 4 D7 प्रत्युवाचेदमगद —Ñ1 illeg from 8^{c} up to हरि in l 1 of 1311* —^{c}) D3 4 11 लवयिष्ये (for गमिष्यामि) —^{d}) D1 3 4 11 योजनाना तु सप्तति

9 For 9–14^{b}, Ñ2 V1 B1 3 4 D7 subst 1315* —^{a}) D5 8–10 महातेजा , G2 कपि°, Cv as in text (for हरिश्रेष्ठ) —^{b}) D6 G1 M1.3 कपि(D6 G1 [before corr] M1 हरि)सत्तम , T2 3 M2 हरि° (for कपिसत्तमान्) D5 8–10 सत्त्ववान्कपिसत्तम —^{d}) D6 G1 2 वानरर्षभा , T1 2 G3 M3 प्लवगेश्वरा (for प्लवगर्षभा) —For 9, Ś1 Ñ1 D1–4 11–13 subst , while D5 8–10 subst l 2 for 9^{cd}

1311* सुषेणश्च हरिश्रेष्ठ सत्त्ववान्बलवानपि ।
अशीतिं प्रतिजानीते योजनाना पराक्रमम् ।

[Ñ1 illeg up to हरि in l 1 (cf v l 8) —(l 1) D1 3 4 11 तु कपिश्रेष्ठ (for च हरि°) —(l 2) D3 प्रविजानीते, D5 8–10 प्रतिजानेह (for प्रति°) D2 13 पराक्रमी, D5 8–10 °क्रमे (for °क्रमम्).]

—Thereafter D3 cont l 3–4 and 7–8 of 1315*

51 10 41 तेषां कथयतां तत्र सर्वास्ताननुमान्य च ।
ततो वृद्धतमस्तेषां जाम्बवान्प्रत्यभाषत ॥ १०
पूर्वमस्माकमप्यासीत्कश्चिद्गतिपराक्रमः ।
ते वयं वयसः पारमनुप्राप्ताः स्म साम्प्रतम् ॥ ११
किं तु नैवं गते शक्यमिदं कार्यमुपेक्षितुम् ।
यदर्थं कपिराजश्च रामश्च कृतनिश्चयौ ॥ १२
साम्प्रतं कालभेदेन या गतिस्तां निबोधत ।
नवतिं योजनानां तु गमिष्यामि न संशयः ॥ १३
तांश्च सर्वान्हरिश्रेष्ठाञ्जाम्बवान्पुनरब्रवीत् ।
न खल्वेतावदेवासीद्गमने मे पराक्रमः ॥ १४

10 For subst in Ñ2 V1 B1 3 4 D7, cf v l 9 and 14 —^{a}) T1 M2 तत्तत (for तत्र) ❀ Cv तत्तेषु तत्तत्कथयत्सु।, Cm g तेषा कथयता तेषु कथयत्सु (Cg °यत्सु सत्सु) ❀ —^{b}) M1 त्र (for च) —^{c}) D5 6 वृद्धतरस् (for °तमस्) T G2 3 तत्र (for तेषा). ❀ Ck t वृद्धतमस्तेषामिति निर्धारणे षष्ठी ❀ —For 10, Ś1 Ñ1 D1–4 11–13 subst

1312* स मारुतसमो वीर्ये धार्तराष्ट्रसमो जवे ।
जाम्बवांस्तु महाप्राज्ञो वृद्ध परमसमत ।
वानराणा वच श्रुत्वा सागरप्लवन प्रति ।
तान्सर्वान्वानरश्रेष्ठानिदं वचनमब्रवीत् ।

[D8 om l 1 —(l 1) D1 4 11 मारुतस्य समो वेगे (for the prior half) D1 प्लुते (for जवे) —(l 2) D1 3 च (for तु) —Ñ1 D1 om l 3 —(l 4) Ñ1 illeg from त्वा up to वचन D1 3 4 11 सहितान्व्यक्तम् (D1 °न्वाक्यम्) (for वानरश्रेष्ठान्)]

—Thereafter Ñ1 cont l 6 of 1314*, repeating it in its proper place

11 For subst in Ñ2 V1 B1 3 4 D7, cf v l 9 and 14 —^{a}) M1 [आ]स्ति (for [आ]सीत्) —D3 om 11^{cd} —^{c}) M1 वयसा (for °स) Ś1 Ñ1 D2 12 13 वृद्धभावा (Ñ1 D12 °वं) हि (for वयस पारम्) —^{d}) D6 अनुप्रासी (sic), D13 ननु प्राप्ता , M1 अतिक्रान्ता (for अनुप्राप्ता) ❀ Cv ते वृद्धतमा पारमनुप्राप्ता इति सम्यक्।, Cr ते वय वयस पारमनुप्राप्ता स्म साम्प्रतमिति पाठ ।, Ck t स्म स्म इति यावत् (Ct स्म इत्यर्थ) ❀—After 11, Ś1 Ñ1 D1 2 4 11–13 ins , while D8 ins l 2–3 after 11^{ab}

1313* जराशिथिलता प्राप्तो मन्ददृष्टिपराक्रम ।
स्मराम्यजात गरुडममृतस्य च मन्थनम् ।
देवासुरविमर्दाश्च दृष्टा मे बहव पुरा ।

[(l 1) D1 4 11 -शैथिल्यता (for -शिथिलता) Ś1 Ñ1 D2 13 प्राप्ता (for प्राप्तो) D1 11 -चक्षु , D4 -चेत- (for -दृष्टि) Ś1 Ñ1 D2 13 -पराक्रमा (for °म) —(l 2) Ñ1 क्षुत (sic) D1 3 4 11 जात (for [अ]जात) D4 समुद्रस्य (for अमृतस्य)]

12 For subst in Ñ2 V1 B1 3 4 D7, cf v l 9 and and 14 —^{a}) D5 [ए]व (for [ए]व) Ś1 D12 13 गत, D3 गतं (for गते) —^{b}) D1 11 उपेक्षितं, D13 उपोषितु (for उपेक्षितुम्) —^{c}) D2 13 यदय, M1 यदा तु (for यदर्थं) —^{d}) Ś1 D1 9 12 M1 -निश्चय (for °यौ)

13 For subst in Ñ2 V1 B1 3 4 D7, cf v l 9 and 14 For 13–14^{b}, Ś1 Ñ1 D1–4 11–13 subst. 1314*. —^{a}) D5 8–10 कालमस्माक (for °भेदेन). —^{c}) G3 M1 च (for तु)

14 ^{a}) M3 तु (for च) D6 G2 हरिश्रेष्ठो, T1 3 G3 M1 कपि° (for हरिश्रेष्ठान्) —^{b}) D5.8–10 G2 इदम् (for पुनर्) ❀ Cr ताश्च सर्वान्हरिश्रेष्ठाञ्जाम्बवान्पुनरब्रवीदिति पाठ ❀—For 13–14^{b}, Ś1 Ñ1 D1–4 11–13 subst , while Ñ2 V1 B1 3 4 D7 ins l 4 after 17^{ab}.

1314* साम्प्रत कालमस्माक योऽयं गतिपराक्रम ।
त पुरस्कृत्य वक्ष्यामि न हि किंचिन्मृषा वदे ।
अहमस्य समुद्रस्य यास्यामि प्लवने वृत ।
दशोन योजनशत नवत्येव न सशय ।
ताश्च सर्वान्हरिवराञ्जाम्बवाननुमान्य वै । [5]
उवाच हरिमुख्याना सनिधौ वचन पितु ।

[(l 1) Ś1 Ñ1 D12 13 बलम् (for का°) Ś1 D12 योग्य, D1 कोय (for योऽय) Ś1 D12 -पराक्रम, Ñ1 D2 13 °मे (for °म) —D1 om l 2–3 —(l 2) D4 रक्षामि (sic) (for वक्ष्यामि) D12 [ए]व (for हि) D13 कृत (for वदे) —D3 repeats l 3–4 after 17^{ab}. —(l 3) D11 अयम् (for अहम्) Ś1 D3 (first time) 12 प्लवन वृ(Ś1 त, L(ed) ग)त , Ñ1 प्लवने धृत , D3 (second time) प्लवने मत (for प्लवने वृत) —(l 4) Ñ1 D4 11 नवोन वा (for नवत्येव) D1 नवतिं योजनान्यद्य गच्छेयमिति मे मति —(l 5) Ś1 D12 हरिवरो, D1 कपि° (for हरिवरान्) D1 अनुमानय (sic) (for °न्य वै) —Ñ1 repeats here l 6 (cf v l 1312*) D1 om l 6 —(l 6) Ñ1 (second time) illeg for सनिधौ वच Ś1 transp सनिधौ and वचन Ñ1 (both times) सुन , D2 पिता, D3 4 11 पुन (for पितु)]

—For 9–14^{b}, Ñ2 V1 B1 3 4 D7 subst , D3 cont. l 3–4 and l 7–8 after 1311* and along with Ś1 Ñ1 D2 4 11–13 ins l 11 after 14.

1315* अग्निपुत्रस्ततो धीमान्नीलो वचनमब्रवीत ।
अशीति वै गमिष्यामि योजनाना प्लवगमा ।
त्वष्टु पुत्रो नल श्रीमानब्रवीद्धरिपुंगव ।
गच्छेय नवति पूर्णां योजनानीति हृष्टवत् ।
तारोऽब्रवीत्तनस्तत्र महाबलपराक्रम । [5]

मया महाबलेश्चैव यज्ञे विष्णुः सनातनः ।
प्रदक्षिणीकृतः पूर्वं क्रममाणस्त्रिविक्रमः ॥ १५

स इदानीमहं वृद्धः प्लवने मन्दविक्रमः ।
यौवने च तदासीन्मे बलमप्रतिमं परैः ॥ १६

G 5 1 55
B 4 65 16
L 4 56 55

नवति योजने द्वे च गमिष्यामीति वीर्यवान् ।
तत सागरगम्भीरो वानर पवनो जवे ।
मन्दरस्य प्रमाणेन भास्कराग्निसमप्रभ ।
तत्र सर्वान्हरिवराञ्जाम्बवाननुमान्य ह ।
उवाच हरिमुख्याना सनिधौ प्रहसन्निव ।
तारुण्ये मे बल वीर्यं यशश्चासीद्विक्रमो मम ।

[(l 1) B3 वचन चेदम् (for नीलो वचनम्) —(l 2) B3 च (for वै) —(l 4) B3 तूर्ण, D3 पूर्वं (for पूर्णा) V1 हृष्टवान्, B3 योजनानि प्रहृष्टवत् (for the post half) —(l 5) Ñ2 D7 त तु (for तत्र) —(l 6) B1 transp द्वे and च Ñ2 B3 D7 योजनान्येव (for योजने द्वे च) —(l 7) B3 पवनोपम (for पवनो जवे) V1 ततो मरुत्समो वीर्ये धार्त्रराष्ट्रसमो जवे —(l 8) Ñ2 D3 7 मदरश्च (for °स्य) V1 मदराभ प्रमाणे च (for the prior half) —(l 9) V1 हरिश्रेष्ठान् (for °वरान्) B3 अनुशास्य (for °मान्य) B1 च (for ह) —(l 11) D13 तारुण्य (for °ण्ये) Ś1 [s]पि, Ñ1 D2-4 11-13 हि (for मे) Ś1 Ñ1 V1 विक्रमे (for °मो) B3 यशश्चासीद्विक्रमोत्तम (hypm) (for the post half)]

—Thereafter Ś1 Ñ1 D2-4 11-13 cont , while Ñ2 V1 B1 3 4 D7 cont l 1 and V1 alone cont l 2-4 after 1317*, D1 ins l 2-4 after 14[ab]

1316* यत्कृत यौवनस्थेन मया तच्छ्रोतुमर्हथ ।
सर्वस्य वृद्धस्य बल पौराणं यौवने गते ।
आचक्षाणस्य बहुधा हास्य भवति वानरा ।
कि तु वक्ष्याम्यह वीर्यमात्मनो यौवनोदये ।

[(l 2) Ñ1 illeg from बल up to l 4 D3 4 पौराणे (for °ण) D1 गत (for °ते) —(l 4) D1 11 वीरा श्चा(D11 °श्चा)त्मान (for वीर्यमात्मनो) Ś1 D12 यौवनोदय]

—Thereafter V1 cont 1319*, D1 cont l 1-2 of 1318* —c) Ś1 D12 स (for न) Ś1 [आ]स्ते (for [आ]सीद्) Ñ2 B1 4 D7 नैतावानेव खल्वा(B4 मेवा)सीद् , V1 नैतावन्मम खल्वासीद्, B3 नैतावन्मे बल त्वासीत्, D1 नैव तावत्तदासीन्मे, D3 4 11 न खल्वेवैषम पूर्वं —d) Ñ2 B1 4 D7 वा, V1 य , B3 च, D1 हि (for मे) B3 पराक्रमे (for °म)

15 a) D5 6 8-10 वैरोचनेश् (for महाबलेश्) —b) D5 6 8-10 प्रभ(D9 °भुर्)विष्णु (for यज्ञे विष्णु) —c) G3 प्रदक्षिण, Cm as in text (for °णी) —d) D5 M3 क्रममाण (for °णस्) D1 5 6 T G M1 3 Cm g त्रिविक्रम, D3 4 °दर्पं, Cv r k as in text (for त्रिविक्रम) —For 15, Ś1 Ñ V1(followed by l 2-4 of 1316*) B1 3 4 D2 7 12 13 subst , while D1 3 4 subst l 1 for 15[ab] and (all except D1) cont l 2 , D11 subst l 1 for 15[ab] and cont l 2 after l 1(r)

1317* सुषेणेन मया चैव बलियज्ञे सनातन ।
विक्रमाक्षीन्क्रमन्विष्णुस्त्रि प्रदक्षिणमावृत ।

[(l 1) D3 4 11 repeat l 1 after l 2 of 1318* Ś1 D12 सुपर्णेन मया, Ñ2 V1 B1 3 4 D3 4 7 11 मया जटायुषा (D3 4 11 [first time] transp मया and जटायुषा), D13 मुखेन च मया (for सुषेणेन मया) D1 3 4 11 (all except D1 second time) तदा विष्णु (for बलियज्ञे) D2 13 ममागत (for सनातन) —(l 2) Ñ2 B4 D3 विक्रमन्क्षीन्क्रमान् V1 चव (for विष्णुस्) Ś1 D3 13 त्रि (for त्रि) D3 4 11 आगत (for आवृत) Ñ2 V1 B4 D7 त्रि प्रद(V1 विष्णुर्द)क्षिणन कृत , B1 3 त्रि त्रि प्रदक्षिणीकृत (for the post half)]

—Thereafter Ś1 D2 12 13 cont , Ñ1 D3 4 cont l 1-2 after 1317* and l 3 after 1320*, Ñ2 V1 D7 cont l 3 only after 1320*, D1 cont l 1-2 after 1316* and l 3 after 1320*, D11 cont l 1 after 1317*, l 2 after l 1 (first occurrence) of 1317* and l 3 after 1320*

1318* त्रिविक्रमे मया तात सशैलवनकानना ।
त्रि सप्तकृत्व पृथिवी परिक्रान्ता प्रदक्षिणम् ।
गत्वा प्राप्य च कैलास गच्छामि त्रिदुधालयम् ।

[(l 1) D13 विक्रमेण (for त्रिविक्रमे) Ś1 Ñ1 D12 त्रिविक्रमेण या क्राता(Ñ1 - [illeg]) (for the prior half) —(l 2) D3 13 त्रि- (for त्रि-) Ñ1 -सप्त , (for -सप्तकृत्व) D1 3 4 11 परिक्षिप्ता (for °क्रान्ता) —(l 3) V1 transp प्राप्य and च D1 त तु प्राप्यावगच्छामि, D3 4 11 त गत्वा चैव गच्छामि (for the prior half) D1 3 4 11 केलास (for गच्छामि)], while Ñ2 D7 cont after 1317*, V1 cont after 1316*

1319* पुनरन्यत्तु वक्ष्यामि तदपि श्रोतुमर्हथ ।
[V1 अत्यर्थं (for अन्यत्तु)]

—After 15, D1 3 4 11 ins , Ñ1 cont after l 2 of 1318, Ñ2 V1 D7 cont l 3 only after 1319*

1320* यदा चौषधयोऽस्मामि सचिता देवशासनात् ।
निष्पन्नममृत ताभ्यस्तदासीन्नो महद्बलम् ।
उदयात्पर्वताच्चाहमस्त गिरिवरोत्तमम् ।

[(l 1) Ñ1 तदा (for यदा) Ñ1 illeg after चाष up to न्नो in l 2 D1 सेविता (for सचिता) —(l 2) D11 याभ्यस (for ता°) D1 नि पतत्यमृत याभ्यस (for the prior half) D11 महाबल (for महद्बलम्) —(l 3) V1 damaged for मस्त गिरिव- Ñ1 गिरिमनुत्तम (for °वरोत्तमम)]

16 Ś1 Ñ V1 B1 3 4 D1-4 7 11-13 transp [ab] and [cd] —a) Ś1 महा (for अह) G2 क्रुद्ध (for वृद्ध) —b) D1 नयने (for प्लवने) Ñ2 V1 B1 3 4 D3(both times) 4 7,11

सम्प्रत्येतावतीं शक्तिं गमने तर्कयाम्यहम् ।
नैतावता च संसिद्धिः कार्यस्यास्य भविष्यति ॥ १७
अथोत्तरमुदारार्थमब्रवीदङ्गदस्तदा ।
अनुमान्य महाप्राज्ञो जाम्बवन्तं महाकपिम् ॥ १८
अहमेतद्गमिष्यामि योजनानां शतं महत् ।
निवर्तने तु मे शक्तिः स्यान्न वेति न निश्चितम् ॥ १९

न तथा विक्रमान्वित —After 16^{ab} (transp), D3 repeats l 4–5 of 1321* and 16^{ab} —^{c}) M2 तु (for च) Ś1 Ñ V1 B1.3.4 D1–6.7.11–13 बालभावे (for यौवने च) Ś1 D12 तदा स्यात् (sic), B4 T3 त(T3 य)थासीत्, T1 G2 य(G2 स)दासीत (for तदासीत्) D4 तु (for मे) —^{d}) B1 D5.6.8–10 पर (for पर) —After 16, Ś1 D2.12.13 ins, while D3.4 ins. l 1–4 of 1326* and then cont.

1321* पद्मस्ताश्च जिघासु वै वचनमब्रवीत्तदा ।
दैत्य पर्वतहस्तस्तु न भविष्यथ मत्क्षुधा ।
इत्युक्त्वा पर्वतं दोर्भ्यां चिक्षेपासुरनन्दन ।
तदा एतेन खेदात्तु पर्वतो जानुनाहत ।
तेन भग्नश्च मे जानु खञ्ज शिथिलविक्रम । [5]

[(l 1) D2.13 [आ]जिघासुश्च (for जिघासु वै) D3.4 यज्ञम् ताञ्जिघासुश्च (for the prior half) D2.13 वसेंद्रान्, D3 विप्रेंद्रान्, D4 विप्रेंद्रम् (for वचनम्) —(l 2) D3 च (for तु) D13 दैत्या पर्वतहस्तास्तु (for the prior half) D2 भविष्यति (for °थ). D3.4 न भविष्यति मे क्षुधा (for the post half). —D3 repeats l. 4–5 after 16^{ab} —(l 4) D2.13 पतन, L(ed) [आ]घातेन (for एतेन) Ś1 [आ]धृत (for [आ]-धृत) D3(both times).4 तदा पतन्खे मभ(D4 °म)या जानुना पर्वतो धृत. —(l 5) D3(both times).4 transp मे and जानु D13 खञ्ज (for खञ्ज)]

17 ^{a}) B3 मप्राप्य (for सम्प्रति) B3 D3 तावर्ती (for [ए]तावर्ती) —^{b}) B4 विक्रमे (for गमने) —For 17^{ab}, Ś1 Ñ1 D1.2.12.13 subst

1322* साम्प्रत प्लवने शक्तिं नवतिं प्रवितर्कये ।

[D1 नवतिं शक्तो (for प्लवने शक्तिं) D1 गमन (for नवतिं) D1.2.13 प्रति- (for प्रवि-)],

while D5.8–10 subst

1323* सम्प्रत्येतावदेवाद्य शक्य मे गमने स्वत ।

—After 17^{ab}, Ñ2 V1 B1.3.4 D7 ins l 4 of 1314*, while D3 repeats l 3–4 of 1314* —^{c}) D1.5.6 G1 M1.2 नैतावत्या, D3.4.11 ए° (for नैतावता) G3 M1 हि (for च) Ś1 Ñ1 D2.12.13 च ससिद्धिं, D1 सुससिद्ध (for च ससिद्धि) —^{d}) Ś1 Ñ1 D1.2.12.13 गतु(D1 गत्वा) कार्यमिदं भवेत्, D3.4.11 नास्य कार्यस्य दृश्यते —For 17^{cd}, Ñ2 V1 (damaged) B1.3.4 D7 subst.

1324* एतावता समाप्तिश्च न कार्यस्यास्य दृश्यते ।

[B4 transp न and कार्यस्यास्य B1 एतावतास्य कार्यस्य समाप्तिर्नैव दृश्यते.]

—Thereafter they cont, Ś1 D2.4.11–13 cont l 2–3 after 1326*, while D3 ins l 2–3 after 17

1325* हेतुमद्गाढक वाक्य तयोत्तरति जाम्बवे ।
तत पर्वतसकाशो हनुमानञ्जनीसुत ।
न किंचिदब्रवीत्तत्र बल पौरुषमात्मन ।

[(l 2) Ś1 D3.4.11–13 तत्र (for तत) Ñ2 V1 B1.3.4 D2 अजना- (for °नी-) —(l 3) V1 damaged from तत्र up to प Ś1 D2–4.11–13 न तत्र सो(D3.4.11 प्रा)ब्रवीत्किंचित् (for the prior half) D2.3.11.13 बल (for बल).]

—After 17, Ś1 D2.12.13 ins, D3.4 ins l 1–4 after 16, D4.11 ins l 5–7 after 17

1326* न कदाचिद्गतोऽहं तु यज्ञे तेषां महात्मनाम् ।
ऋषीणामग्निवपुषां कैलासस्य समीपत ।
ततोऽहमभिराधैव मुनीञ्ज्वलनतेजस ।
बलिपुत्रं च हतवान्क्रुद्ध मृत्युमिवापरम् ।
अथोक्तवति तस्मिंस्तु हरीणां प्रवरे वच । [5]
नलश्चाप्याह तेजस्वी ज्ञातीन्परमदु खितान् ।
नवतिं चैव सहाधिगमिष्यामि प्लवंगमा ।

[(l 1) D3.4 ततोहमाग्म केषांचित् (for the prior half) D2–4.13 यज्ञ (for °ज्ञे) D3.4 द्रष्टु (for तेषां). —(l 4) D3.4 ततोपश्य बलिमर (for the prior half) —After l 4, D3.4 cont 1321* —(l 5) D4 तथा (for अथ) D11 तथोक्ते प्रति तस्मिंश्च (for the prior half) D4.11 कपीना (for हरीणा). D4.13 प्रवरो (for °रे) D2 प्लवनेन च (for प्रवरे वच) —(l 7) Ś1 [अ]पि, L(ed) [अ]थ (for [अ]धि-)]

18 ^{a}) G3 अनिरुत्तरम् (for अथोत्तरम्) Ś1 Ñ1 D2–4.11–13 उदार च, V1 °रोथ, D1 °र्त्तं च, M3 °त्तार्थम् (for उदारार्थम्) —^{b}) G2 तथा (for तदा) Ś1 Ñ1 D1.2.12.13 प्रत्युवाचेदमगद, Ñ2 V1 B1.3.4 D7 अंगदो वाक्यमब्रवीत्, D3.4.11 प्राब्रवीद्वाक्यमंगद —^{c}) Ñ2 B1.3.4 D7 महात्मान, V1 D1.3.4.12 M3 °प्राज्ञं, D2.13 °तेजा, D5.8–10 तदा प्राज्ञो, D11 °बाहु (for महाप्राज्ञो) —^{d}) Ñ2 -बल, D1.6 T G2.3 M -कपि (for -कपिम्)

19 ^{ab}) D3.4 एत, D6 एव (for एतद्). Ś1 Ñ1 D2–4.11–13 ध्रुव (for महत्). Ñ2 V1 B1.3.4 D7 क्रमेय योजनशत सदेहो नास्ति वानरा. —^{c}) D1.13 च (for तु) Ś1 Ñ1 D1.12.13 मे बुद्धिर्, G2 शक्ति स्यान (for मे शक्ति). D2 निवर्त + . + द्धि —^{d}) D6 M3 न निश्चिता, G3 विनिश्चित (for न निश्चितम्) Ś1 Ñ1 D1.2.12.13 निश्चय नाधिगच्छति, G1 M1.2 न स्यादिति मतिर्मम, G2 न चेति न तु निश्चय. —For 19^{cd}, Ñ2 V1 B1.3.4 D3.4.7.11 subst, while Ś1 D2.12.13 ins l 2–3 after 19

तमुवाच हरिश्रेष्ठो जाम्बवान्वाक्यकोविदः ।
ज्ञायते गमने शक्तिस्तव हर्यृक्षसत्तम ॥ २०
कामं शतसहस्रं वा न ह्येष विधिरुच्यते ।
योजनानां भवाञ्शक्तो गन्तुं प्रतिनिवर्तितुम् ॥ २१
न हि प्रेषयिता तात स्वामी प्रेष्यः कथंचन ।
भवतायं जनः सर्वः प्रेष्यः प्लवगसत्तम ॥ २२

G 5. 1 68
B 4 65 22
L 4 56 73

1327* पुनस्त्वागमने शीघ्र शक्ति नामर्षयाम्यहम् ।
बाल्यादक्लिष्टभावाच्च गुणदोषाविचारणात् ।
पित्राह लालित स्नेहान्न श्रम ग्राहित पुरा ।

[(l 1) D3 4 11 आगमने (for त्वा°) B3 शक्तिं (for शीघ्र) Ñ2 B1 4 D7 transp शीघ्र and शक्ति B3 न तावत्तर्कयाम्यह (for the post half) —(l. 2) Ś1 D11 अकृष्ट- (for अक्लिष्ट-) Ś1 (after corr. marg as above) D12 गुरु- (for गुण-) B3 -विचारणात्, D2 4 -विचारत, D3 11 13 -[अ]विचारत (for -[अ]विचारणात्) —(l 3) D2 reads पित्राह लालि in marg Ś1 D12 नित्य च, D13 पित्रा वा (for पित्राह) Ś1 शास्त्राणि, B3 न स्वय, D2 4 11 न शास्त्र, D12 सच्छला (sic), D13 सर्वाखीं (sic) (for न श्रम)]

20 ^{a}) Ñ2 V1 B1 3 4 D3 4 7 11 महाप्राज्ञो, D5 6 8–10 M1 3 °ष्ठ (for हरिश्रेष्ठो) —^{b}) Ñ2 V1 B1 3 4 D7 प्रहसन्निव (for वाक्यकोविद) ॐ Cv हरिश्रेष्ठ इति जाम्बवतो व्यपदेशो हरिसाधर्म्यात्। अल्प ह्यन्तर हर्यृक्षाणाम्। अत एवासौ हर्यृक्षसत्तमेत्यङ्गद सबोधयति। सजातीयस्य निर्धारण भवति। निर्धारणेऽपि समस्यन्ति मुनय ।, Cr तमुवाच हरिश्रेष्ठ जाम्बवान्वाक्यकोविद इति पाठ । हर्यृक्षसत्तमसुग्रीवस्य वानरराज्याभिषेकेण ऋक्षबिलस्यापि प्राप्ते । ऋक्षो वानरावान्तरजातिरित्यवगम्यते। तत समानजातीयत्वान्निर्धारणमुपपद्यते। न निर्धारणे (इति) षष्ठीसमासस्य निषेधेऽपि मुनिप्रयोगात्साधुत्वम्।, Cm "तमुवाच हरिश्रेष्ठो जाम्बवान्वाक्यकोविद." हरिश्रेष्ठ इति जाम्बवतो व्यपदेशो हरिसाधर्म्यात्, अल्पमन्तरमृक्षाणा हरीणा च। अत एवासौ हर्यृक्षसत्तमेत्यङ्गद सबोधयति। सजातीयस्य हि निर्धारण भवति। "न निर्धारणे" इति षष्ठीसमासस्य निषेधेऽपि मुनिप्रयोगात्साधुत्व सप्तमीसमासो वा।, Cg हर्यृक्षसत्तमेति। ऋक्षत्व वानरावान्तरजाति, अत सुग्रीवादेर्ऋक्षराजत्वमिति ॐ —After 20^{ab}, Ñ2 V1 B1 3 4 D3 4 7 11 ins

1328* नैव युक्त त्वया वीर वक्तु वानरससदि ।

[B3 उक्त (for युक्त) D3 transp युक्त and वक्तु D3 4 11 सन्निधौ (for -ससदि) B3 कथित जनससदि (for the post half)]

—^{c}) G2 जायते (for ज्ञा°) Ś1 Ñ1 D2 12 13 बुद्धिस् (for शक्तिस्) —^{d}) Ś1 Ñ1 D1 2 12 13 M3 हर्य(Ñ1 °र्यृ)-क्षपुगव, D5 हर्यक्ष°, D8 10 M1 3 हर्यक्षं° (sic) (for हर्यृक्षसत्तम) —For 20^{cd}, D11 subst l 1 of 1329*

21 ^{a}) D6 M2 Cv r m g शत, Ct as in text (for शत) Ś1 Ñ1 D1 2 11–13 शत वा भूयो (for शतसहस्र) D1 तु, D11 च (for वा).—^{b}) Ś1 Ñ1 D1 2 11–13 गत्वा प्रतिनिवर्तितु (D13 °र्तने) —For 20^{c}–21^{b}, Ñ2 V1 B1 3 4 D3 4 7 subst., while D11 subst. l 1 only for 20^{cd}

1329* वय सर्वे विजानीमो युवराज बलं तव ।
गत्वा गत्वा निवर्तेथा शतकृत्वो महार्णवम् ।

[(l 1) D3 4 11 वय जानीम गमने (for the prior half) —(l 2) D4 निवर्तेस्त्व (for °र्तेथा)]

—^{c}) Ś1 Ñ1 D1–4 11–13 भवेच्छक्तो, Ñ2 V1 B1 3 4 D7 सहस्रस्य (for भवाञ्शक्तो) —^{d}) Ś1 Ñ1 D1–4 11–13 न त्वे (D3 4.11 °न्वे)प विधिरुत्तम, Ñ2 V1 B1 3 4 D7 भवाञ्शक्तो हि लघने.—After 21, Ś1 D2–4 11–13 ins, Ñ2 V1 B1 3 4 D7 cont l 1 after 1329* and ins l 3–8 after 21

1330* त्व हि वालिबलाद्धीन किंचिद्वानरपुगव ।
योजनाना सहस्रस्य लङ्घने शक्तिमान्विभो ।
यादृशो हरिशार्दूलो वाली प्रख्यातविक्रम ।
सुग्रीवश्च महाबाहु तादृशस्त्व हरीश्वर ।
त्व हि प्रेषयितास्माक निग्रहानुग्रहे प्रभु । [5]
तवाज्ञानिरता सर्वे वयमादाय मैथिलीम् ।
अस्माक यदि न स्यास्त्वमग्रणीर्वानरेश्वर ।
न कस्यचिद्द्वय किंचिच्छृणुयाम परस्परम् ।

[(l 1) D3 4 न (for हि) B3 D2 4 -वधाद् (sic) (for -बलाद्) D2 13 सत्तम (for -पुगव) —(l 2) Cf 21^{cd} —(l 3) V1 सदृशो, B3 यान्येव (for यादृशो) V1 -शार्दूल Ñ2 V1 B1 3 4 D7 प्रथित- (for प्रख्यात-) —(l 5) Ñ2 V1 B1 -[अ]नुग्रह- (for °हे) —(l 6) Ñ2 V1 B1 3 4 D3 4 7 11 मार्गाम (for आदाय) —After l 6, L (ed) ins

1330(A)* आगमिष्याम एतस्मिन्क्षणे नास्त्यत्र सशय ।

—(l 7) Ś1 D12 transp स्यास् and त्वम् —Ś1 om l 8 —(l 8) D13 न कस्यचिद्धि यत्किंचिच् (for the prior half)]

22 ^{a}) Ñ2 V1 B1 3 4 D7 11 च (for हि) Ś1 तत्र, Ñ2 V1 B1 3 4 D7 कश्चित् (for तात) —Ñ1 illeg for 22^{b}–23^{b} —^{b}) Ś1 प्रेष्य, D1 2 12 13 प्रेष्यै (for स्वामी) Ś1 D12 कथं भवेत् (for कथचन) Ñ2 B1 4 D7 प्रेष्यै (B4 °ष्ये) समनुयुज्यते, V1 प्रेष्य कर्मसु पूज्यते, B3 प्रेष्य' समनुपद्यते, D3 4 11 प्रेष्यकर्मसु युज्यते —After 22^{ab}, D1 reads 24^{ab} D1 om 22^{cd} —^{c}) D6 T G M1 2 भवतो (for °ता) —^{d}) Ś1 D2 12 13 पालनीय प्रयत्नत —For 22^{cd}, Ñ2 V1 B1 3 4 D3 4 7 11 subst.

1331* भवतश्च वय सर्वे प्रेष्या वानरसत्तम ।

68 भवान्कलत्रमस्माकं स्वामिभावे व्यवस्थितः ।
23 स्वामी कलत्रं सैन्यस्य गतिरेषा परंतप ॥ २३
74 तस्मात्कलत्रवत्तात प्रतिपाल्यः सदा भवान् ।
अपि चैतस्य कार्यस्य भवान्मूलमरिंदम ॥ २४
मूलमर्थस्य संरक्ष्यमेष कार्यविदां नयः ।
मूले हि सति सिध्यन्ति गुणाः पुष्पफलादयः ॥ २५
तद्भवानस्य कार्यस्य साधने सत्यविक्रमः ।
बुद्धिविक्रमसम्पन्नो हेतुरत्र परंतप ॥ २६
गुरुश्च गुरुपुत्रश्च त्वं हि नः कपिसत्तम ।
भवन्तमाश्रित्य वयं समर्था ह्यर्थसाधने ॥ २७
उक्तवाक्यं महाप्राज्ञं जाम्बवन्तं महाकपिः ।
प्रत्युवाचोत्तरं वाक्यं वालिसूनुरथाङ्गदः ॥ २८

[D11 भवतश् (for भव°) B3 वानरपुंगव, B4 °सत्तमा, D3 4 प्लवग° (for वानरसत्तम)]

23 ^{a}) Ñ1 illeg for 23^{ab} (cf v 1 22) D1 किल त्वम्, D11 (gloss) कलत्रवद्दृढस्वीयत्वबुद्धया यावत्प्राणवल परिपाल्य इत्यर्थः (for कलत्रम्) D9 अस्मासि· (for °क) Ś1 D3 12 भवान्किलात्र चास्माक, Ñ2 B1 3 4 D7 भवान्सर्वत्र चास्माक, V1 भवान्समक्षमस्माक —^{b}) B3 स्वामी तत्र, D5 G2 °व्ये (for स्वामिभावे) G1 व्यवस्थित (for °त) —^{c}) Ś1 D3 12 किलात्र, B3 दर क्षीश-, D1 किल त्व (for कलत्र) D4 11 सर्वस्य (for सैन्यस्य) —^{d}) G(ed) मतिर् (for ग°) Ś1 D3 12 पुरू, D4 6 M3 °षा, L(ed) °का (for एषा) Ś1 Ñ1 D1 2 12 13 प्लवगमा (Ś1 °म, Ñ1 D1 2 °म), Ñ2 V1 B4 D7 11 परा सता, B1 परायणा, B3 सनातनी (for परतप)

24 Ś1 Ñ V1 B1 3 4 D2 3 5-10 12 13 G M1 2 Cr k t transp 24^{ab} and 24^{cd} D1 reads 24^{ab} after 22^{ab} —^{a}) D8 10 यस्मात् (for त°) Ś1 D2 12 13 तु त्व, T G1 M2 तत्र, [L(ed)तस्त्व (for तात) —^{b}) Ñ V1 B1 3 4 D1-4 7 11-13 G1 Ct परिपाल्य (for प्रति°) G3 M1 म नो (for सदा) ※ Cv तत्र प्रतिपाल्यम्। कार्यप्रतिपाल्यम्।, Cr तस्मात्कलत्रवत्तात प्रतिपाल्य इति पाठ ※ —^{c}) Ś1 Ñ1 D2 12 13 चैवास्य, D6 8-10 M1 वे तस्य, G2 चेदस्य, Cr as in text (for चैतस्य) Ñ2 V1 B1 3 4 D3 4 7 11 अस्माक च (B3 हि) महाबाहो, D1 तद्भवानस्य कार्यस्य —^{d}) Ś1 Ñ1 D2 12 13 गतिर् (for मूलम्) D4 13 अरिंदम (for °म) D1 मूल हरिवरोत्तम

25 ^{a}) M1 damaged for मूलमर्थ D13 सरक्षम् (for °क्ष्यम्) —^{b}) D1.11 एषा (for °ष) D10 कार्ये (for कार्य-) D1 11 गति (for नय) Ś1 D2 12 13 कार्यविनिश्चय, Ñ1 illeg. (for °विदा नय) —For 25^{ab}, Ñ2 V1 B1 3 4 D3 4 7 subst

1332* मूल हि सर्वथा रक्ष्य वृक्षस्य हरिपुंगव ।

[D3 4 त्र (for हि) B1 3 4 D7 सवदा (for °था) D4 रक्ष (for रक्ष्य) D3 4 वृक्षस्येव परतप (for the post half)] —^{c}) Ñ2 मूल (for °ले) M1 तु (for हि) D1 खलु (for सति) D4 शुद्धयति, T2 सत्मति (for सिध्यन्ति) Ñ2 V1 B1 3 4 D7 रक्षिते तान सिध्यन्ति —^{d}) D6 8-10 सर्वे, D11 फुल्ल, G2 चापि (for पुष्प-) Ñ2 V1 B1 4 D1-5 7-11,13 T2 M2 3 Ct -फलो(B4 °ला)दया (D9 M2 °य·), G2 -फलाधिका (for फलादय) ※ Cv r गुणा पुष्पफलोदय इति सम्यक् ※

26 ^{a}) Ñ2 V1 B1 4 D1 4 7 सैन्यस्य (for कार्यस्य) B3 ऋक्षवानरसैन्यस्य —^{b}) Ñ1 D1 6 8-11 साधन (for °ने). Ñ1 D5 6 8-10 G -विक्रम (for °म) Ñ2 V1 B1 3 4 D3 4 7 M1 मूल सत्यपराक्रम (D3 4 °म) —^{c}) G1 M2 मति- (for बुद्धि-) Ś1 D12 -सपत्ता (for °न्नो) —^{d}) D2 बुद्धिर् (for हेतुर्) Ś1 D1-3 11-13 पुरू, Ñ1 पुत्र (for अत्र) Ś1 D2-4 11-13 परतप (for °प) —For 26^{cd}, Ñ2 V1 B1 3 4 D7 subst, while Ś1 D2-4 11-13 ins after 26

1333* वय तव महाबाहो शाखापत्रफलोपमा ।

[B3 तत्र (for तव) D13 वयस्तद्वत् (for वय तव) Ś1 D3 11-13 -पुष्प- (for -पत्र-) B3 शाखास्तत्र, D2 4 7 शाखा· पुष्प (D7 पत्र) (for शाखापत्र-) D2 11 13 -फलोपगा (for फलोपमा)]

27 ^{a}) D5 lacuna for गुरु V1 damaged from -पुत्रश up to कपि in ^{b} —^{b}) B4 -नंदन, D1-4 7 9 11 13 -सत्तम (for -सत्तम) —^{c}) Ñ1 lacuna for वयं Ś1 D2 12 13 वय भवतमाश्रित्य, B3 तवाशामाश्रिता ह्येते —^{d}) Ś1 अर्थ-, Ñ1 D12 lacuna, D7 ह्यस्य (for ह्यर्थ-) Ś1 Ñ V1 B1 3 4 D7 11 12 -निश्चये (for -साधने) D1 शक्ताश्चार्थविनिश्चये, D2 13 समर्थाश्च (D13 °र्थे) विनिश्चये, D3 4 समर्था· कार्यनिश्चये —After 27, Ñ2 V1 B1 3 4 D3 4 7 11 ins

1334* तत्र शक्य त्वया गन्तुमस्मानुत्सृज्य वै क्वचित् ।
न चास्माक क्षम वीर त्वा मोक्तु हरिपुंगव ।

[(1 1) B3 शक्यस्तु (sic) (for शक्य) —(1 2) B4 हि (for च) B3 वीर क्षेम न चास्माक (for the prior half) Ñ2 B4 transp त्वा and मोक्तु]

28 ^{a}) Ś1 Ñ2 V1 B1 3 4 D1-4 7 11-13 G2 उक्तवत (for °वाक्य) D5 om (hapl) from -प्राज्ञ up to महा- in ^{b} D1 4 11 तत प्राज्ञ, G2 M1 स (M1 damaged after स up to जा in ^{b}) हाप्राज्ञो (for महाप्राज्ञ) —^{b}) Ś1 Ñ1 D1 4 11 जाबुवन, D3 ज्ञान° (for जाम्बवन्त) B3 हरींद्रक, D1 2.4 11 13 T1 G1 3 M2 °कपि (for महाकपि) Ñ2 D7 जाबव (D7 [marg] °त) हरिपुंगव, V1 damaged, B1 4 जाबव हरियूथपं. —Ñ1 illeg for 28^{cd} —^{c}) V1 damaged from वय up to वानर- in 29^b Ś1 D1-4 11-13 तत.

यदि नाहं गमिष्यामि नान्यो वानरपुंगवः ।
पुनः खल्विदमस्माभिः कार्यं प्रायोपवेशनम् ॥ २९
न ह्यकृत्वा हरिपतेः संदेशं तस्य धीमतः ।
तत्रापि गत्वा प्राणानां पश्यामि परिरक्षणम् ॥ ३०

स हि प्रसादे चात्यर्थं कोपे च हरिरीश्वरः ।
अतीत्य तस्य संदेशं विनाशो गमने भवेत् ॥ ३१
तद्यथा ह्यस्य कार्यस्य न भवत्यन्यथा गतिः ।
तद्भवानेव दृष्टार्थः संचिन्तयितुमर्हति ॥ ३२ G 5 1 86 B 4 65 32 L 4 56 84

श्रीमान् (for [उ]त्तर वाक्य) —^{d}) Ñ2 B1 3 D7 हृष्ट(B1 हृष्ट, B3 क्लिष्टो)दीनमुखोगद, B4 किंचिद्दीनमुखोगद

29 V1 damaged up to वानर in ^{b} (cf v l 28) Ś1 Ñ1 D2 12 13 om 29^{ab} —^{a}) M3 वा (for न) V3 resumes (cf v l 1) —^{b}) D1 3–5 7 11 M3 [अ]न्ये (for °न्यो) B1 D1 3–5 11 M3 -पुगवा, B3 °व (for -पुगव) D6' नान्यो वा हरिपुगव, G(ed) न चान्यो वानरर्षभ —After 29^{ab}, Ñ2 V1 3 B1 3 4 D4 7 11 ins

1335* गमिष्यति द्रुत लङ्का ते वय सशय गता ।

[D4 7 11 गमिष्यति (for °ष्यति) B3 पुरीं (for द्रुत) G(ed) गन (for °ता)]

—^{c}) Ś1 Ñ V1 3 B1 3 4 D2 7 12 13 अस्माक (for °भि) —^{d}) Ñ2 B1 3 4 D7 प्राहं (for कार्यं)

30 ^{a}) V1 damaged from त्वा up to ^{d} D13 हरिपति (for °ते) —^{b}) D9 om (hapl) from धीमत up to तस्य in 31^c.—B3 om 30^{cd} —^{c}) B4 न तत्र गत्वा पश्याम —^{d}) Ñ2 V3 B1 D7 पश्याम, B4 प्राणाना, D5 8 10 न पश्ये (for पश्यामि) Ś1 Ñ1 D2 12 13 -रक्षय (for -रक्षणम्) —After 30, Ñ2 V1 3 B1 4 D3 4 7 11 ins, while B3 ins 1 4–8 after 30^{ab} (due to om)

1336* अतीतसमयानस्मान्दृष्ट्वा च हरिसत्तम ।
शङ्कमानश्च मा दृष्ट्वा वधायाज्ञापयिष्यति ।
विशेषेण च सुग्रीवो मय्येव हरिपुगव ।
निपातयिष्यति क्रूर दण्ड प्राणापहारिणम् ।
नि मशयोऽपि हि वध सुग्रीवान्मम दृश्यते । [5]
ससशय च गत्वा मे पुन प्रतिनिवर्तनम् ।
नि सशयादभावाच्च श्रेयान्सशयितो वध ।
इत्येवमर्थशास्त्रेषु प्रवृत्तिरुपलभ्यते ।

[(l 1) V1 reads the prior half in marg V3 सर्वान् (for अस्मान्) V3 D3 4 7 11 म (for च) B1 -मत्तमा, D3 4 11 यूथप (D11 °पा) (for -सत्तम) —(l 2) B4 स (for च) D3 4 11 मुक्तशक(D11 °क) कपिश्रेष्ठा (D11 °ष्ठान्) (for the prior half) Ñ2 D7 वधम् (for वधाय) —(l 3) D3 4 11 मय्येव (for सुग्रीवो) D7 मन्ये च (for मय्येव) D3 4 11 सुग्रीवो वानरेश्वर (for the post half) V1 निर्विशेषेण चास्माक सुग्री . . पुगव (moth-eaten) —(l 4) V1 हरि (for क्रूर) B3 नत्र गत्वाप्यतिक्रूर (for the prior half) V1 damaged for ण्ड प्राणा- B3 दड- (for दण्ड) —D11 repeats l 5 after l 6 —(l 5) Ñ2 D7 मदान्दड, V1 damaged, B3 वध सम्यक्, D11 वध सोय (for ऽपि हि वध) D3 4 नि सशय विनाशोय (for the prior half) V1 नेह, D3 4 11 मयि (for मम) Ñ2 D7 सुग्रीवाद्यो (D7 °च) वधस्तथा, B3 सुग्रीवान्न प्रदृश्यते (for the post half) —(l 6) V1 सशय चापि (for ससशय च) B3 हि, D4 11 [अ]त्र (for मे) V3 B4 मन (for पुन) —(l 7) B4 हि (for च) V1 सशयतो (for °यितो) —(l 8) V3 D11 [ए]व (for [ए]वम्) V3 B4 D11 मर्व- (for अर्थ-) D4 11 -शास्त्रेण (for °षु) B3 D3 4 11 उपपद्यते (for °लभ्यते)]

31 D9 om up to तस्य in ^{c} (cf v l 30) —^{a}) D6 न (for स) Ś1 Ñ1 D2 12 13 कोपे च, D1 क्रोधे वा, G2 वात्यर्थं (for चात्यर्थं) —^{b}) D6 वा (for च) D5 [अ]पि हरीश्वर (for हरिरीश्वर) Ś1 Ñ1 D1 2 12 13 हरीणा नित्यश प्रभु ✠ Cr कोपे हरीश्वर इति सम्यक्।, Ck कोपे चेश्वर ✠ —For 31^{ab}, Ñ2 V1 3 B1 3 4 D3 4 7 11 subst

1337* स हि क्रोधे प्रमादे च प्रभुरस्माकमीश्वर ।

[Ñ2 D7 निग्रहे (for हि क्रोधे) V3 B4 प्रमादे (for प्रमादे) Ñ2 D7 ईदृश (for ईश्वर)]

—D6 om 31^{cd} —^{c}) Ś1 Ñ V1 3 B1 3 4 D1–4 7 11–13 अकृत्वा (for अतीत्य) G2 (after corr as in text) अतीतस्य च त देशं —^{d}) D13 विनाश, T3 असिना (sic) (for विनाशो) Ñ2 V1 3 B1 3 4 D7 नियतो (V3 B1 3 °त) (for गमने) D3 4 ध्रुव, D11 ध्रुव (for भवेत्) —After 31, Ñ2 V1 3 B1 3 4 D3 4 7 11 ins

1338* सोऽह नि सशय यास्ये पर पार महोदधे ।
आगमिष्यामि च पुन दृष्ट्वैव जनकात्मजाम् ।
तदेतत्सुविनिश्चित्य बुद्ध्या सर्वे वनौकस ।
यत्र क्षम कृत्यतम द्रुत तद्वक्तुमर्हथ ।

[(l 1) D11 नि मशयो (for °य) —(l 2) B4 दृष्ट्वा च (for दृष्ट्वैव) —(l 3) V1 moth-eaten from दे up to विनि D3 4 11 वे (for सु-) B4 तत्सर्वं हि मुनिश्चित्य (for the prior half) Ñ2 B1 मर्व- (for मर्वे) —(l 4) B4 व (for न) B1 3 क्षेम (for क्षम) V1 यत्र क्षमतर कृत्य (for the prior half). V1 moth-eaten for द्रुत तद्व B4 transp द्रुत and तद D3 4 11 नच्छीघ्र कर्तुमर्हथ (for the post half)]

—Thereafter D11 cont 1340*.

32 D11 om 32.—^{a}) D8–10 M1 तथा (for यथा) Ś1 D2 12,13 [ए]वास्य, T2 तस्य, G2 त्वस्य (for ह्यस्य) —^{b}) Ñ2 B1 3 4 D3 4,7 भवेद् (for भवति) G2 न

89 33 84 सोऽङ्गदेन तदा वीरः प्रत्युक्तः प्लवगर्षभः ।
जाम्बवानुत्तरं वाक्यं प्रोवाचेदं ततोऽङ्गदम् ॥ ३३

अस्य ते वीर कार्यस्य न किंचित्परिहीयते ।
एष संचोदयाम्येनं यः कार्यं साधयिष्यति ॥ ३४

किंचित्परिहीयते —For 32^{ab}, D1 subst l. 3 of 1341* —After 32^{ab}, D3 4 ins

1339* भवन्तो बुद्धिसंपन्ना संचिन्तयितुमर्हथ ।

—^{c}) Ś1 D2 12 13 इह, D6 एष (for एव) D3 4 दृष्टतत्त्वार्थं (for एव दृष्टार्थं) Ñ2 V1 3 B1 3 4 D7 यूयं हि बुद्धि(V1 यद्दु, B3 वृद्ध)शास्त्रज्ञा —^{d}) Ñ2 V1 3 B1 3.4 D7 अर्हथ (for अर्हति) —After 32, Ñ2 V1 3 B1 3 4 D7 ins, D3 4 cont after 1339*, while D11 cont after 1338*

1340* तथोक्तवति तद्वाक्य युवराजेऽङ्गदे तदा।
कृताञ्जलिपुटा सर्वे वानरा सप्रणेमिरे।
न शक्य भवता गन्तुमित पदमपि क्वचित् ।
दृष्ट्वा मन्यामहे सर्वे त्वा वय वालिदर्शनम् ।
शुभ वा यदि वा पाप प्रिय वा यदि वाप्रियम् ।　[5]
सहिता तत्सहिष्याम सुग्रीवाद्यद्भविष्यति ।

[(l 1) V3 अथोक्तवति, D3 °मपि (for तथोक्तवति) D3 4 11 अगदं कपिसंसदि (for the post half) —(l 2) B1 तत्र, D3 4 11 वाक्य (for सर्वे). B3 सप्रशसिरे, B4 सप्रणेमिरे, D3 4 11 इदमब्रुवन् (for सप्रणेमिरे) —(l 3) B3 पादम् (for पदम्) V1 moth-eaten for क्वचित् —(l 4) D3 4 11 त्वा हि दृष्ट्वा वय सर्वे (for the prior half) B3 त्वां च यद्, D3 4 11 मन्यामो (for त्वा वय) —(l 6) B3 तान्, D3 4 11 स- (for तद्) B4 अपेष्यति (for भवि°)]

—D3 4 further cont, while D1 subst l 3 only for 32^{ab}

1341* अङ्गदस्तु तथा वीरो प्रत्युक्तो वानरर्षभैः ।
अथाब्रवीन्महाबाहुर्जाम्बवन्त च वानर ।
तद्यथा स्याच्च रामस्य कार्यसिद्धिर्महात्मन ।

[(l 2) D4 जाम्बुवत —(l 3) D1 तु (for च)]

33 ^{a}) Ś1 D2-4 6 12 G2 M2 तथा, D13 ततो (for तदा) Ñ2 V1 3 B1 3 4 D7 अगदे तु (B3 च) शुभं वाक्य, D11 अंगदं तु तथा वीरे —^{b}) Ñ2 V1 B1 प्रत्यक्षे, V3 B3 4 D7 11 °क्ते (for प्रत्युक्त) Ś1 Ñ1 D2 12 13 प्लवगेश्वर , Ñ2 B1 4 D7 11 °भे , V1 वानरर्षभैः (for प्लवगर्षभ) —After 33^{ab}, Ñ2 V1 3 B1 3 4 D7 ins , while D3 4 11 ins l 1 after 33^{ab} and l 2 after 33

1342* अथ तत्र महाबुद्धिर्बुद्ध्या संचिन्त्य वानरान् ।
वानरप्रीतिजननमुदार वाक्यकोविद ।

[(l. 1) B1 बुद्ध्वा (for °द्ध्या) D3 4 11 वानर (for °रान्) —(l 2) D3 4 वानर (for °र-) B3 -संयुक्तम् (for -जननम्) D3 4 11 हितमुत्तम (for वाक्यकोविद)]

—whereas D1 reads 34^{cd} after 33^{ab}.

—^{cd}) B1 अब्रवीद्, B3 अंतर, D7 10 उत्तम (for उत्तर). D11 ततो वै जाववान्वाक्य (for °) G3 M1 तदा (for ततो) Ñ2 V1 3 B3 4 D3 4 7 11 अब्रवीद्वालिन सुतं, B1 उत्तरं वालिन सुत (for ^{d}) Ś1 Ñ1 D1 2 12 13 जाव (Ś1 D1 °बु)-वानर्थवत्प्राह वालिपुत्रमनिंदित

34 ^{a}) Ś1 Ñ1 D2 12 13 येन ते, Ñ2 V1 3 B1 4 D1 3 7 11 सेत्स्यते, B3 D4 शस्यते, D5.6.8-10 G1 M1 तस्य ते (for अस्य ते) Ś1 D12 व (D12 वी)र्योय (L[ed.] °ह) Ñ1 कार्यर्थे, Ñ2 V1 3 B1 3 4 D1 3 4 7 11 कार्यार्थो, D2 13 कार्याय (for कार्यस्य) —^{b}) D1 किंचिन्न (by transp), D6 यत्किंचित् (for न किंचित्) Ś1 Ñ1 D2 4 12 13 परिहास्यति, Ñ2 V1 3 B1.3 4 D1 3 5-11 °हास्यते (for °हीयते). ※ Ct कार्यस्य न परिहास्यते शेषे षष्ठी अनुष्ठानमिति शेषो वा ※ —D1 reads 34^{cd} after 33^{ab} —^{c}) Ś1 Ñ1 D1 2 12 अय, Ñ2 V1 3 B1 3 4 D3 7 11 13 अह, D4 अद्य (for एष) Ś1 D2 12 13 संदेशयामि (for संचोद°) —^{d}) D11 यत् (for य) —After 34, Ñ2 V1 3 B1 3 4 D3 4 7 11 ins

1343* मुहूर्तमात्र नि शब्दा भवन्तु प्लवगर्षभा ।
यावन्नि श्रेयम वाक्य किंचित्प्रकथयाम्यहम् ।
जाम्बवेन तथोक्ते तु वाक्ये वानरससदि ।
सर्वा सा वानरचमूस्तूष्णीं तममित स्थिता ।
सोऽब्रवीत्तं महाबाहु जाम्बवान्हरियूथप ।　[5]
अङ्गदाभिमुख स्थित्वा सप्रहृष्टतनूरुह ।
अह जानामि त वीर वानर वानरर्षभा ।
यो गत्वा योजनशत कृतार्थ पुनरेष्यति ।
शलाकाक्षिप्रविष्टा तु सन्निकर्षान्न दृश्यते ।
सैव दूरस्थिता दृश्या भवत्यनभिसवृता ।　[10]

[(l 1) V1 B1 मुहूर्तमात्र, B3 °मिव, D3 4 11 किंचिन्मुहूर्तं (for मुहूर्तमात्र) V1 D7 अभवन्, V3 B1 भवत (for भवन्तु). D3 4 11 भवध्व वानरर्षभा (for the post half) —(l 2) D4 भवन्-, D11 अथ (for यावन्). D3 नि सशय, D11 संचोदित (for नि श्रेयस) D7 विचित्र (for किंचित्प्र-) D4 11 transp. वाक्य and किंचित् —(l 3) B3 जांबवता (for °वेन) Ñ2 तथोक्तेन, B4 D7 तथोक्ते च (for तथोक्ते तु) D4 11 उक्ते जाबवता वाक्ये (D11 चैव) (for the prior half) D4 11 तथा (for वाक्ये) —(l 4) D11 तूष्णींभूय व्यवस्थिता (for the post. half) D3 4 सर्वे ते वानरास्तूष्णीं भूयश्चैव व्यवस्थिता —(l 5) V1 B1 3 तु, D3 4 तान् (for त). V1 3 B1 3 D3 4 महाबाहुर् (for °हु) V1 3 B1 D7 जावबो (for °वान्). V3 -यूथप (for °प) —(l 6) D3 4 11 वानर- (for अङ्गद-). V1 B1 -[अ]भिमुख, V3 °खे (for °ख) V1 moth-eaten from स्थि up to ह —(l 7) V3 illeg from वानर up to श in l 8 D7 om (hapl) वानर. B3 वानरर्षभ (for °भा) —(l. 9)

ततः प्रतीतं प्लवतां वरिष्ठ-
मेकान्तमाश्रित्य सुखोपविष्टम् ।
संचोदयामास हरिप्रवीरो
हरिप्रवीरं हनुमन्तमेव ॥ ३५

G 5 1 97
B 4 65 35
L 4 56.87

इति श्रीरामायणे किष्किन्धाकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

B3 गणा क्षिप्र- (sic) (for शलाकाक्षि-) V1 [अ]पि, D3 4 हि (for तु) D11 विशालाक्षिप्रविष्टो हि (for the prior half) —(l 10) D3 न (for स) D3 4 दूरे, D7 दूर (for दूर-)]

—Thereafter V3 cont

1344* * * . . * * * * * * * * * * . * * ।
कर्मणा चाप्युपायज्ञ सोऽस्यां तु विनियुज्यते ।
अथाब्रवीन्महातेजा तारेयो वालयोऽङ्गद (sic) ।
अहमेतान्गुणान्मन्ये भूयिष्ठ त गुणोत्तरान् ।
वानरा वानरश्रेष्ठे वपुष्मति हनुमति । [5]
एष वायोर्बले तस्य तार्क्ष्य इव शीघ्रग ।
हनुमान्वायुपुत्रस्तु कार्ये च विनियुज्यताम् ।
यशस्वी * * * * . * * * * * * (illeg) ।
अनेन सह * * * * * * * * * * * (illeg) ।
* * * * (illeg) मिद कार्यं लोकजुष्ट यशस्करम् । [10]
प्रिय वानरराजस्य करिष्यति न सशय ।
इति वानर * * * * * * * * * * (illeg) ।
* * * * * * * * * * * * * * * * ।

[Lines 1 and 13 are illeg]

35 [ab]) Ś1 Ñ1 D2 11–13 M1 प्रवीर(M1 °ण), V3 महात्मा, G2 [ऽ]प्रवीत्त (for प्रतीत) D3 4 11 प्लवग, D6 पतता (for प्लवता) D1 तत कपीना प्रवर वसिष्ठम् (for [a]) Ś1 Ñ1 D2 12 13 आविश्य (for आश्रित्य) M3(after corr as in text) -[उ]पविष्ट (for °ष्टम्) Ñ2 V1 B1 3 4 D7 तत कपिवृद्धतम(V1 °मति)स्तु(V1 moth-eaten from स्तु up to Kānda name) जाबवास्तूष्णीकमासाद्य सुखोपविष्ट ❀ Cv r प्लवता वसिष्ठमिति पाठ ❀ —[c]) Ś1 D2 12 13 सदेशयामास(D2 13 °मीह), Ñ2 B1 3 4 D3 4 7 आमन्त्र° (for सचोदयामास) Ś1 Ñ1 V3 D2 12 13 महानुभाव, Ñ2 B1 3 4 D7 कपिप्रवीरम्, D1 3 4 11 महाप्रभाव (for हरिप्रवीरो) —[d]) Ś1 D12 हरि ससि(D13 °मि)द्ध, Ñ1 D11 हरि स(D11 स)वृद्धो, Ñ2 B1 3 4 D7 एकातशातं, D1 हरि न नीत्वा (corrupt), D2 13 हरिं सवृन्द्रो, D3 4 °रो (for हरिप्रवीर) D4 हनुमत (sic). Ñ2 D7 एव, B1 3 D3 एक, D4 एहि (for एव)

Colophon —*Kānda name* Ñ2 V1(moth-eaten) 3 B1 3 4 D7 सुदरकाडे —*Sarga name* Ś1 D2 12 13 वानरमन्त्रण, Ñ1 D11 वानरमन्त्र, Ñ2 V1 B1 4 D7 समुद्रक्रमण (B1 °णे)चिता(V1 °ताया), V3 समुद्रक्रमण, B3 समुद्रलघनप्रक्रम, D1 सागरलघने वानरमंत्र, D3 4 वानरक्र(D3 °प्रक्र)मणविनिश्चय· —*Sarga no* (figures, words or both) Ś1 Ñ1 B1 D2 4 12 13 om, Ñ2 V3 B3 4 D7 1, D1 38 (sic), D3 |G3(before corr as in G2) 64 (as in text), D5 62, D6 8–10 T G1 2 M2 3 65, D11 63, M1 66, L(ed) 56 —After colophon, G concludes with श्रीरामाय नम

६५

अनेकशतसाहस्रीं विपण्णां हरिवाहिनीम् ।
जाम्बवान्समुदीक्ष्यैवं हनुमन्तमथाब्रवीत् ॥ १
वीर वानरलोकस्य सर्वशास्त्रविदां वर ।
तूष्णीमेकान्तमाश्रित्य हनुमन्किं न जल्पसि ॥ २
हनुमन्हरिराजस्य सुग्रीवस्य समो ह्यसि ।
रामलक्ष्मणयोश्चापि तेजसा च बलेन च ॥ ३
अरिष्टनेमिनः पुत्रो वैनतेयो महाबलः ।
गरुत्मानिव विख्यात उत्तमः सर्वपक्षिणाम् ॥ ४
बहुशो हि मया दृष्टः सागरे स महाबलः ।
भुजगानुद्धरन्पक्षी महावेगो महायशाः ॥ ५

65

M1 begins with श्रीरामाय नम

1 ^{a}) D4 5 11 13 G -साहस्रा —^{b}) D10 lacuna for पण्णा B4 कपि- (for हरि-) V3 विष * * * * * * (illeg) —^{c}) Ś1 D1 3 जाबुवान् Ś1 D1 6 11 12 T1.3 G2 3 M1 2 [ए]व, Ñ2 V1 3 B1 4 D3 4 [अ]थ, Ck t as in text (for [ए]व) B3 प्रसमीक्ष्याथ, D2 13 समुपागम्य, D5 सपरीक्ष्यैव, T2 समवेक्ष्यैव (for समुदीक्ष्यैव) —^{d}) Ñ2 V1 3 B1 3 4 D3 4 7 उवाच ह (for अथाब्रवीत्) —After 1, D3 4 11 ins

1345* कार्यं वानरसैन्यस्य मर्वशास्त्रार्थकोविदे ।

[D3 -कार्यार्थ- (for -शास्त्रार्थ-)]

—Then they cont l 5–11 of 1346*

2 ^{a}) Ñ2 V1 3 B1,3 4 D7 ऋक्ष (V3 वीर, B1 मुख्य, B3 मुख्यो) वानरसैन्यस्य —^{b}) D5 6 9 G1 2 M -विशारद, G3 -विदा वर (for -विदां वर) Ś1 Ñ1 D2 12 13 सर्वधर्मार्थकोविद°, Ñ2 V1 3 B1 3 4 D1 3 4 7 11 सर्वशास्त्रार्थकोविद (Ñ2 °द, G[ed]°द) —^{c}) V1 moth-eaten from मा up to हनुम in ^{d} Ñ2 V3 B1 4 D7 आसाद्य, B3 D11 आस्थाय (for आश्रित्य) D1 तूष्णीमेका समासाद्य (sic), D2 13 तूष्णीमेव समागम्य (D12 after corr °श्रित्य, D13 °वेश्य) —^{d}) Ś1 वक्ष्यसे, Ñ V1 3 B1 D1 2 4 7 11 13 भाषसे (for जल्पसि) B3 4 D3 हनूमान्कि न भाषते (D3 °से), D12 हनुमन्किं नु वक्ष्यसे ❀ Ck एवमब्रवीदित्येवशब्दार्थं एव वीर वानरेत्यादि । वानरलोकस्य ।, Ct एवमब्रवीदित्येवशब्दार्थं वीर वानरेति । वानरलोकस्य वीरेत्यन्वय, निर्धारणे षष्ठी । यद्वा हे वीर! वानरलोकस्य कृत्यमुद्दिश्य किं न जल्पसीत्यन्वय ❀ —After 2, Ñ2 V1 B1 3 4 D7 ins, while D3 4 11 cont l 5–11 after 1345*

1346* यो युक्तो बुद्धिशास्त्राभ्या यशसा विक्रमेण च ।
कर्मणा चाप्युपायज्ञ सोऽस्या धुरि नियुज्यते ।
अथाब्रवीन्महातेजास्तारेयो वानरोऽङ्गद ।
अहमेतान्गुणान्मन्ये भूयिष्ठाश्च गुणोत्तरान् ।
वानरा वानरश्रेष्ठे वपुष्मति हनूमति ।
एष वायोर्बले तुल्यस्तद्वेग इव शीघ्रग ।
हनुमान्वायुपुत्रस्तु कार्येऽत्र विनियुज्यताम् ।
यशस्वी द्युतिमांश्चैव रामसुग्रीवयोर्हित ।
अनेन सह सख्य च विदित लोकवीरयो ।
धर्मजुष्टमिद कार्यं लोकजुष्टं यशस्करम् ।
प्रिय वानरराजस्य करिष्यति न सशय
इति वानरमुख्यस्य समनुज्ञाय शासनम् ।
अथोचुर्हनुमन्त ते वानरा वानरर्षभम् ।

[(l 1) B3 वृद्धो वृद्ध-(sic) (for युक्तो बुद्धि) —(l 2) B4 कर्मणा Ñ2 B4 वा (for च) V1 नियुज्यता (for °ज्यते) B3 कर्मणा समुपाज्ञाय कथ त्व दूरमास्थित —(l 4) Ñ2 B3 4 D7 भूयिष्ठ वा (B3 4 च) B1 गुणोत्तमान् (for °त्तरान्) —(l 5) V1 व * * ति (moth-eaten), B3 सर्वमेव (for वपुष्मति) Ñ2 D3 4 7.11 transp वपुष्मति and हनूमति. —(l 6) B3 अपि समस् (for बले तुल्यस्) —(l 7) B4 -पुत्रश्च, D3 4 11 -तनय (for -पुत्रस्तु) V1 तु, D3 4 11 [ऽ]स्मिन् (for ऽत्र) B3 कार्येण विनियुज्यते (for the post half) —D3 4 11 om l 9 —(l. 9) B1 विहित (for विदित) —(l 10) D3 * *जुष्टम्, D11 धर्मदृष्टम् (for धर्मजुष्टम्) B4 स्वर्ग-, D4 लोकैर् (for लोक-) —(l 12) B1 3 -राजस्य (for -मुख्यस्य) D7 ममनुज्ञाप्य (for °ज्ञाय) —(l 13) D7 न (for ते) V1 B3 अथोवाच (B3 °चुस्ते) हनूमत (for the prior half) V1 जाबवान् (for वानरा)]

3 V3 illeg for ^{a} —^{a}) Ś1 Ñ1 D1–4 11–13 कपि- (for हरि-) —^{c}) D1 3 4 [ए]व (for [अ]पि) D2 वह्ने मसीरणस्यापि, D13 वह्निमारुतयोश्चापि —^{d}) B1 [अ]पि (for first च)

4 V3 illeg for 4^{ab} —^{a}) Ñ2 B1 3 4 D7 भ्राता (for पुत्रो). ❀ Cv अरिष्टनेमि काश्यप । नकारान्तत्वमार्षम् ।, so also the other Cs ❀ —B1 3 om 4^{c}–6^{b} Ś1 D12 13 om 4^{c}–5 —^{c}) Ñ V1 3 B4 D1–8 10 11 T2 3 M3 इति, Ct as in text (for इव).

5 Ś1 B1 3 D12 13 om 5 (cf v l 4) —^{a}) B4 G3 [ऽ]पि (for हि) —^{b}) D5 6 G3 हि, G1 2 M2 (after corr *sec m* as in text) सु- (for स) Ñ2 V1 D2 7 सागरे मकरालये, V3 B4 सपतन्सागरे पुरा, D3 4 सोबरे सुमहाबल .—D1 om 5^{cd} —^{c}) D8–10 G3 M1 भुजगान् (for भुज°) Ñ2 D2 7 पूर्वं (for पक्षी) V3 B4 भुजंगानुत्क्षिपन्पक्षी —^{d}) V3 B4 D6 महाबल (for °यशा) Ñ V1 D2–4 7 11 महातेजा महाबल (D3 4 11 °यशा), D5 8–10 महाबाहुर्महाबल

पक्षयोर्यद्बलं तस्य तावद्भुजबलं तव ।
विक्रमश्चापि वेगश्च न ते तेनापहीयते ॥ ६

बलं बुद्धिश्च तेजश्च सत्त्वं च हरिसत्तम ।
विशिष्टं सर्वभूतेषु किमात्मानं न बुध्यसे ॥ ७

अप्सराप्सरसां श्रेष्ठा विख्याता पुञ्जिकस्थला ।
अञ्जनेति परिख्याता पत्नी केसरिणो हरेः ॥ ८

अभिशापादभूत्तात वानरी कामरूपिणी ।
दुहिता वानरेन्द्रस्य कुञ्जरस्य महात्मनः ॥ ९

G 5 2 13
B 4 66 10
L. 4 57 8

6 B1 3 om 6[ab] (cf v l 4) —[a]) V3 यद्बलपक्ष, D4 भुजयोर्यद् (for पक्षयोर्यद्) —[b]) D8–10 भुजवीर्यं, M1 भुजयोस्तद् (for तावद्भुज-) —V3 mostly illeg for [cd] —[c]) Ñ2 V1 B1 2 4 D7 [ए]व (for [अ]पि) Ś1 Ñ1 V1 D G2 तेजश् (for वेगश्) —Ś1 D12 om (hapl) 6[d] – 7[a] —[d]) D1 8 10 11 G1 M1 [अ]पि, D3 4 6 [अ]व- (for [अ]प-) Ñ2 V1 B1 3 4 G3 ते न(B3 न च) तेनाव(G3 °पि)-हीयते, D2 नो भयं तद्विहीयते, D7 भवतो नैव हीयते, D13 न भय तव हीयते ❀ Cv r पक्षयोर्यद्बल तस्य तावद्भुजबल तव। विक्रमश्चापि वेग(Cv तेज)श्च न ते (Cr ते न) तेनापहीयते इति पाठ (Cv तेनापहीयते । ततो नु ततोऽपहीयते ?, Cr अत्र) समानपदमध्याहर्तव्यम्। विक्रमादिक तेन गरुत्मता समान नापहीयते। न न्यून भवतीति योजना। यद्वा तेनेति पञ्चम्यर्थे तृतीया।, Cm g पक्षयोरिति (Cg अत्र समानपदमध्याहार्यम्) विक्रमादिक तेन गरुत्मता समानम्(Cm °मिति शेष ।) नावहीयते न न्यून भवति(Cm °तीत्यर्थ) । यद्वा तेनेति पञ्चम्यर्थे तृतीया(Cg तेनेति पञ्चम्यर्थे तृतीया वा)।, Ck तस्य पक्षयोर्यद्बल तव च यद्भुजवीर्यबलमुभय तुल्यमिति शेष । पक्षयोर्यद्बल तस्य भुजवीर्यबल तवेति पाङ्क । योजना-शक्त्यान्यथा पठति पर । ते वेगो विक्रमश्च तेन गरुत्मद्बलेन वेगेन च नावहीयते न्यूनो न भवति। आत्माभिजनबलपराक्रम-वैभवमित्यर्थ ।, Ct 'भुजवीर्यबल तव' इति प्राचीनपाठे तस्य पक्षयोर्यद्बल तव च यद्भुजवीर्यबलमुभय तुल्यमिति शेष । ते विक्रमश्च तेजश्च तेन गरुत्मता नापहीयते न न्यूनो भवति ❀

7 Ś1 D12 om 7[a] (cf v l 6) —[ab]) V3 वेगश्, D11 सत्त्व (for तेजश्) D11 वेग (for सत्त्व) B1 4 transp तेजश् and सत्त्व Ś1 Ñ V1 B1 3 4 D2,6–10 1. 13 M3 हरि-पुगव D3 4 तेजो बुद्धिर्बल चैव वेग च हरिपुगव —[c]) V3 B3 D7 वरिष्ठ, G M2 विशिष्ट (for विशिष्टं) Ś1 Ñ V1 3 B1 3 4 D7 सर्वभूताना, D3 4 11 °भूतेभ्य, D12 हरिभूताना (for °भूतेषु) D1 न दृष्ट सर्वभूतेस्ते, D2 13 विभूयात्सर्वभूताना —[d]) Ñ2 V1 3 B1 4 D7 transp किम् and आत्मान D5 8–10 Ct सज्जसे, D7 मुह्यसे (sic) (for बुध्यसे) B3 आत्मान न च बुध्यसे —After 7, Ś1 Ñ1 D2 11–13 ins

1347* यादृशो वैनतेयस्य वेगो वेगवतो महान्।
तादृशस्तव वेगो हि किमात्मान न बुध्यसे।

[(l 1) D12 lacuna for वेगो D13 वेगवता (for °वतो) —(l 2) D13 च (for हि) D12 lacuna for न]

8 [a]) D2 13 उत्तमा, D6 अप्सरो, T G1 2 M1 आसीद्, (for अप्सरा) Ñ2 B3 4 अप्सर-, B1 [अ]प्सरस (for [अ]प्सरसा) Ś1 Ñ1 D12 उत्तमाप्सरसाप्येषा, D1 अप्सरोभ्योप्सर श्रेष्ठा, D3 4 अप्सरस्त्वप्सर श्रेष्ठा, D7 अप्सरास्त्वप्सरा श्रेष्ठा, D11 अप्सराश्चाप्सर श्रेष्ठा, M3 अप्सरा सुरसा श्रेष्ठा(sic) ❀ Cr m अप्सराप्सरसामिति निर्देश आर्ष ।, Cg अप्सरेति निर्देश आर्ष, Ck अप्सराप्सर-सामिति सधिश्छान्दस । 'अप्सरा' इत्येकवचनान्तोऽप्यस्ति।, Ct अप्सराप्सरसामिति । 'अप्सरा' इत्येकवचनान्तोऽपि । सधिरार्ष । 'अप्सरा' इत्यावन्त आर्ष इत्यन्ये ❀ —[b]) G1 2 M2 विज्ञाता, Ck t as in text (for विख्याता). B3 (with hiatus) अजना तदा, D3 6 9 11 M1 पुजिकस्थली, Ct as in text (for °स्थला) —After 8[ab], B1 reads 9[ab], 10[cd], 9[cd] and 8[cd], while Ñ2 V1 3 B4 D7 read 9 Ś1 Ñ1 D1–4 11–13 transp 8[ca] and 9[ab] B3 transp 8[cd] (followed by 1349*) and 9 —[c]) D1 3 12 अंजनी B1 D1 7 परिज्ञाता, B3 T G1 च विख्याता (for °ख्याता) M1 अजना चेति विख्याता —[d]) B1 3 4 केशरिण Ñ2 V1 3 B1 4 D7 कपे, B3 तथा (for हरे) —After 8, Ñ2 V3 D6–10 S ins

1348* विख्याता त्रिषु लोकेषु रूपेणाप्रतिमा भुवि।

[G1 3 M1 माता ने, G2 विज्ञाता (for विख्याता)]

—Then Ñ2 V1 D7 cont, while V1 B1 3 4 D1 ins after 8, whereas Ś1 Ñ1 D2–4 11–13 ins after 9

1349* अभिशापक्षयाज्जाता पुनस्त्रिदिवचारिणी।

[B1 एषा, D1 4 याता (for जाता) Ñ2 V1 3 B1 4 D7 पुनश्च(Ñ2 °वें) दिवि चारिणी, D1 3 4 भूयस्त्रिदिवमगना (for the post half)]

9 For the sequence in Ñ2 V1 3 B1 4 D7, cf v l 8 Ś1 Ñ1 D1–4 11–13 transp 8[bd] and 9[ab] B3 transp 8[cd] and 9 —[a]) D3 4 G2 M1(before corr) अपि (for अभि-) Ñ2 D7 प्रसूता सा, B1 (marg also) अभूत्पश्चाद्, B4 अभूत्तत्र (for अभूत्तात) —[b]) D8–10 Ct कपित्वे (for वानरी). —After 9[ab], B3 reads 10[c] – 11[b], repeating them in their proper place D1 om 9[cd] —[c]) Ś1 Ñ1 D12 दुहिता विरज(Ñ1 कुजर)स्यासौ, Ñ2 V1 3 B1 3 4 D7 °ता हरिमुख्यस्य, D2 13 °नागराजस्यासौ —[d]) Ś1 Ñ1 D2 12 13 वानरस्य (for कुञ्ज°) ❀ Cv r अभिशापाद-भूत्तात वानरी कामरूपिणी। दुहिता वानरेन्द्रस्य कुञ्जरस्य महात्मन । इति पाठक्रम ❀ —After 9, Ś1 Ñ1 D2–4 11–13 ins 1349*

15 10 9 कपित्वे चारुसर्वाङ्गी कदाचित्कामरूपिणी ।
मानुषं विग्रहं कृत्वा यौवनोत्तमशालिनी ॥ १०
अचरत्पर्वतस्याग्रे प्रावृडम्बुदसंनिभे ।
विचित्रमाल्याभरणा महार्हक्षौमवासिनी ॥ ११
तस्या वस्त्रं विशालाक्ष्याः पीतं रक्तदशं शुभम् ।
स्थितायाः पर्वतस्याग्रे मारुतोऽपहरच्छनैः ॥ १२
स ददर्श ततस्तस्या वृत्तावूरू सुसंहतौ ।
स्तनौ च पीनौ सहितौ सुजातं चारु चाननम् ॥ १३
तां विशालायतश्रोणीं तनुमध्यां यशस्विनीम् ।
दृष्ट्वैव शुभसर्वाङ्गीं पवनः काममोहितः ॥ १४
स तां भुजाभ्यां पीनाभ्यां पर्यष्वजत मारुतः ।
मन्मथाविष्टसर्वाङ्गो गतात्मा तामनिन्दिताम् ॥ १५
सा तु तत्रैव संभ्रान्ता सुवृत्ता वाक्यमब्रवीत् ।
